# Gadyakavya and Khandakavya

## Module - III

# B.A. SANSKRIT

CORE COURSE (2)

II SEMESTER

## (2011 Admission)

**UNIVERSITY OF CALICUT**

**School of Distance Education**

**CALICUT UNIVERSITY P.O., MALAPPURAM, KERALA, INDIA-673 635**

# UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

**STUDY MATERIAL**

## B.A SANSKRIT

II SEMESTER

CORE COURSE (2) – MODULE III

## *Gadyakavya and Khandakavya*

**Prepared by :**

Dr.. M.Sathyan,
Associate Professor,
Dept. of Sanskrit,
Govt. College, Pattambi.

**Edited and Scrutinised by :**

Sri.K.Jayanarayanan,
Associate Professor,
Department of Sanskrit,
Sree Kerala Varma College,
Thrissur.

Lay out :

Computer Section, SDE.

©
Reserved

# Module III

# खण्डकाव्यानि

महाकाव्यस्यैकदेशानुवर्ति खण्डकाव्यं भवति। महाकाव्ये हि एकस्य वा एकाधिकानां नायकस्य नायकानां समग्रमेव जीवनं चित्रितं भवति काव्यसम्बद्धम्। खण्डकाव्ये तु तस्यैकदेश एव चित्रितो भवति। तेन खण्डकाव्यं हि वस्तुतो लघुकाव्यमेव। यत्र हि महाकाव्ये जीवनस्य समग्रताया प्रसारस्तत्र खण्डकाव्ये जीवनस्यैकस्यैव पक्षस्य तन्मयता भवति। तेन हि खण्डकाव्यमाकारेण प्रकारेण च महाकाव्याल्लघुतरं तु भवत्येव। अपि च महाकाव्ये जीवनस्यैकाधिकमपि पक्षं प्रस्तोतुं शक्यते खण्डकाव्ये तु एक एव पक्ष उन्नीयते। अतो विस्तृतकलेवरान्महाकाव्याल्लघुकलेवरं हि खण्डकाव्यं सशक्ततरं प्रभावितरञ्च भवति। खण्डकाव्येऽत एव महाकाव्यापेक्षया समधिकमेव लालित्यं माधुर्यञ्च भवति।

खण्डकाव्यं हि मुख्यतश्चतुर्विधं दृश्यते शाङ्गारिकं, धार्मिकं, नैतिकं साङ्ग्रहिकञ्च। प्रथमोऽपि भेदः गीति-प्रस्तुति-स्फुटभेदेन विविधः। द्वितीयो हि स्तुतिकाव्यमेवष तृतीयस्तु नीतिपरको वोपदेशपरकः अन्योक्तिरूपश्च। चतुर्थभेदस्तु सङ्ग्रहपरकः सुभाषितसङ्ग्रहः कोषश्चास्य भेदौ।

**खण्डकाव्यस्योत्पत्तिः**

यद्यपि लौकिकसाहित्ये खण्डकाव्यस्योद्घाटनं कालिदासेनैव कृतं तथापि नैतावता तस्य तस्मादपि प्राचीनतरत्वं व्याहन्यते। ऋग्वेदादावपि खण्डकाव्यस्य स्वरूपमुपलभ्यते। कमनीयार्थद्योतकं वाक्यमेव भवति काव्यम्। यत्र हि किञ्चिदपि वाक्यं तथारूपेणोपन्यस्तं भवति, तत्र खण्डकाव्यस्य विषय उत्पद्यते एव। तेन हि वाक्यस्य काव्यत्वेऽन्तस्तत्वमेव हेतुर्न तु बाह्यम्। वाक्यौघो वा एकमेवापि वाक्यं काव्यं भवति यदि तत्कमनीयमर्थं प्रकाशयति। ऋग्वेदादौ सन्ति एतादृशानि वचनानि यानि खलु काव्यत्वं बिभ्रति। यथा हि उषःसूक्तं, विपाशाशुतुद्रीसूक्तं, सुदासविजयसूक्तं भूमिसूक्तञ्चेत्यादिसूक्तौघे।

हंसराजप्रभृतयः समालोचकाः खण्डकाव्यं पञ्चविधं मन्यन्ते सूक्तमयं भक्तिरसमयमैतिहासिकं रूपकान्तर्गतं सङ्कीर्णञ्च। तेषु हि वेदेषु समुपन्यस्तं सूक्तमयं यथोषःसूक्तम्, भक्तिरसमयं यथोपनिषत्सु बौद्धादिग्रन्थेषु च, ऐतिहासिकं यथा रामायणे महाभारते प्रस्तुतं प्रकृतप्रकृतिवर्णनम्, रूपकान्तर्गतं यथा रूपकान्तरुपस्थापितपद्यानि, सङ्कीर्णञ्च श्रृङ्गारप्रधानं मेघदूतादिकमिति।

**शाङ्गारिककाव्यानि**

शाङ्गारिकगीतिकाव्यमपि दूतकाव्य-प्रस्तुतिकाव्य-मुक्तककाव्यभेदादनेकविधं भवति। तत्र दूतकाव्यं यथा मेघदूतं कालिदासस्य, जिनसेनस्य पार्श्वाभ्युदयः, विक्रमकवेर्नेमिदूतं, धोयिकवेः पवनदूतं, वेदान्तदेशिकस्य हंससन्देशः, उद्दण्डकवेः कोकिलसन्देशः, वामनभट्टबाणस्य हंससन्देशः, रूपगोस्वामिनो हंसदूतं, उद्धवसन्देशः, रामशास्त्रिणः मेघप्रतिसन्देशः, पूर्णसरस्वत्याः हंससन्देशः, 'विष्णुत्राता' इत्यस्य कोकसन्देशः, वासुदेवस्य भृङ्गसन्देशः, विनयप्रभस्य इन्दुदूतं विष्णुदासस्य मनोदूतं, रामरामस्य मनोदूतं तथाच घटकर्परस्य घटकर्परकाव्यञ्च।

प्रस्तुतिकाव्येषु कालिदासस्येत्यभिमतं श्रृङ्गारतिलकं, कालिदासस्य ऋतुसंहारम्, पुष्पबाणविलासः, राक्षसकवेः राक्षसकाव्यं, अमरुकस्य अमरुशतकं, भर्तृहरेः श्रृङ्गारशतकं, बिल्हणस्य चौरपञ्चाशिका, जयदेवस्य गीतगोविन्दं, रायभट्टस्य श्रृङ्गारकल्लोलश्च प्रसिद्धग्रन्थाः।

स्फुटपद्यानां तु सङ्ख्या गणनातीतैव। स्फुटपद्यमेव मुक्तकमपीत्युच्यते। अस्य स्वरूपं प्रस्तुतिकाव्येष्वपि दृश्यते।

**धार्मिककाव्यानि**

धार्मिकगीतिकाव्येषु हि कालिदासस्य श्यामलादण्डकं, अश्वघोषस्य गण्डीस्तोत्रगाथा, सिद्धसेनदिवाकरस्य कल्याणमन्दिरस्तोत्रं, श्रीहर्षस्य सुप्रभातस्तोत्रं, अष्टमहाश्रीचैत्यस्तोत्रं, बाणस्य चण्डीशतकं, मयूरकवेः सूर्यशतकं, मातृतुङ्गस्य भक्तामरस्तोत्रं, सर्वज्ञमित्रस्य स्रग्धरास्तोत्रं, शङ्कराचार्यकृतित्वेन प्रसिद्धानि विविधस्तोत्राणि, सौन्दर्यलहरी, अन्नपूर्णादशकं,

अन्नपूर्णाष्टकं, कनकधारास्तवः, दक्षिणामूर्त्यष्टकं, रामभुजगस्तोत्रं, लक्ष्मीनृसिंहस्तोत्रम्, विष्णुपादादिकेशान्तवर्णनं, शिवभुजगस्तोत्रं, शिवानन्दलहरी, शिवमानसपूजास्तोत्रम्, कुलशेखरस्य मुकुन्दमाला, मूककवेर्मूकपञ्चशती, काश्मीरस्य पुष्पदन्तस्य महिम्नःस्तवः, रत्नाकरस्य वक्रोक्तिपञ्चाशिका, आनन्दवर्धनस्य देवीशतकं, उत्पलदेवस्य स्तोत्रावली, यामुनस्य चतुःश्लोकीस्तोत्ररत्नञ्च, रामानुजस्य शरणागतिगद्यं, वैकुण्ठगद्यं, श्रीरङ्गगद्यं, पञ्चाङ्कस्य पञ्चस्तवः श्रीस्तवोऽतिमानुषस्तवो वरदराजस्तवः सुन्दरबाहुस्तवो वैकुण्ठस्तवश्च, पराशरभट्टस्य श्रीरङ्गराजस्तवः, श्रीगुणरत्नकोशः, जयदेवस्य गङ्गास्तवः, गीतगोविन्दञ्च, कृष्णलीलांशुकस्य कृष्णकर्णामृतं, मध्वाचार्यस्य द्वादशस्तोत्रम्, वेदान्तदेशिकस्य पादुकासहस्रं, गरुडदण्डकं, रघुवीरगद्यं, अच्युतशतकं, अप्पयदीक्षितस्य वरदराजस्तवः, नारायणभट्टस्य नारायणीयम्, मधुसूदनस्य आनन्दमन्दाकिनी, रूपगोस्वामिनो गन्धर्व-प्रार्थनाष्टकं, मुकुन्दमुक्तावली, जगन्नाथस्य सुधालहरी, अमृतलहरी, लक्ष्मीलहरी, करुणालहरी, गङ्गालहरी च। नीलकण्ठदीक्षितस्य आनन्दसागरस्तवः, शिवोत्कर्षमञ्जरी, वेङ्कटाध्वरिणः लक्ष्मीसहस्रम्, रामभद्रस्य रामबाणस्तवः अद्भुतसीतारामस्तोत्रं, नारायणतीर्थस्य कृष्णलीलातरङ्गिणी, लोकमणिदाहालस्य सूर्यमहिम्नःस्तोत्रं देवीमहिम्नःस्तोत्रञ्च प्रसिद्धा ग्रन्थाः।

### नीतिकाव्यानि

### १. नीत्युपदेशपरककाव्यानि

नीतिपरककाव्येषु चाणक्यशतकं, सुन्दरपाण्ड्यस्य नीतिद्विषष्टिका, शान्तिदेवस्य बोधिचर्यावतारः, शिक्षासमुच्चयः, सूत्रसमुच्चयश्च, भर्तृहरेर्नीतिशतकं, वैराग्यशतकं, शङ्कराचार्यस्य मोहमुद्गरः, दामोदरगुप्तस्य कुट्टिनीमतं (शम्भलीमतम्), अमितगतेः सुभाषितरत्नसन्दोहः, धर्मपरीक्षा, क्षेमेन्द्रस्य चारुचर्या, चतुर्वर्गसङ्ग्रहः, सेव्यसेवकोपदेशः, समयमातृका, कलाविलासः, दर्पदलनं, हेमचन्द्रस्य योगशास्त्रं, जल्हणस्य मुग्धोपदेशः, शिल्हणस्य शान्तिशतकं, सोमप्रभस्य श्रृङ्गारवैराग्यतरङ्गिणी, वेदान्तदेशिकस्य सुभाषितनीवी, वैराग्यपञ्चकम्, कुसुमदेवस्य दृष्टान्तशतकं, द्याद्विवेदस्य नीतिमञ्जरी, जगन्नाथस्य भामिनीविलासः, नीलकण्ठस्य कलिविडम्बनं, सभारञ्जनशतकं, शान्तिविलासः, वैराग्यशतकं, गुमानिकवेः उपदेशशतकम्, वेङ्कटाध्वरिणः सुभाषितकौस्तुभश्च।

### २. अन्योक्तिकाव्यानि

भल्लटस्य भल्लटशतकं, शम्भुकवेः अन्योक्तिमुक्तालता, जगन्नाथस्य भामिनीविलासः, नीलकण्ठस्य अन्योक्तिशतकं, वीरेश्वरस्य अन्योक्तिशतकं च।

### साङ्ग्रहिककाव्यानि

### १. सुभाषितकाव्यानि

सातवाहनस्य गाथासप्तशती, अज्ञातसङ्ग्रहीतृकः, कवीन्द्रवचनसमुच्चयः, सोमेश्वरस्य अभिलषितार्थचिन्तामणिः, गोवर्धनस्य आर्यासप्तशती, श्रीधरदासस्य सदुक्तिकर्णामृतं, जल्हणस्य सूक्तिमुक्तावली, कलिङ्गरायसूर्यस्य सूक्तिरत्नहारः, सायणस्य सुभाषितसुधानिधिः, शाङ्र्गधरस्य शाङ्र्गधरपद्धतिः, सकलकीर्तेः सुभाषितावली, पोतयार्यस्य प्रसङ्गरत्नावलिः, श्रीधरस्य सुभाषितावलिः, वल्लभदेवस्य सुभाषितावलिः, रूपगोस्वामिनः पद्यावलिः, पोड्डभट्टस्य सूक्तिवारिधिः, हरिकवेः सुभाषितहारावलिः, शम्भुकवेर्बुधभूषणं, वाटलिकस्य भारतीयसूक्तिसङ्ग्रहः, हरिभास्करस्य पद्यामृततरङ्गिणी, शिवदत्तस्य सुभाषितरत्नभाण्डागारश्च।

### २. कोशग्रन्थाः

यास्कस्य निरुक्तम् व्याडेः उत्पलिनी, कात्यस्य नाममाला, भागुरेस्त्रिकाण्डकोषः, अज्ञातकर्तृका रत्नमाला, अमरदत्तस्य अमरमाला, वाचस्पतेः शब्दार्णवः, धन्वन्तरैर्वैद्यकनिघण्टुः, क्षपणकस्य अनेकार्थ-ध्वनिमञ्जरी, अनेकार्थमञ्जरी, अमरसिंहस्य अमरकोषः, शाश्वतस्य अनेकार्थसमुच्चयः, धनञ्जयस्य नाममाला, पुरुषोत्तमदेवस्य त्रिकाण्डशेषः, हारावलिः, वर्णदेशना, हलायुधस्य अभिधारत्नमाला, यादवप्रकाशस्य वैजयन्तीकोशः, महेश्वरस्य विश्वप्रकाशकोषः, अजयपालस्य नानार्थसङ्ग्रहः,

मेदिनिकरस्य मेदिनीकोषः, मङ्खस्य अनेकार्थकोषः, हेमचन्द्रस्य अभिधानचिन्तामणिः, अनेकार्थसङ्ग्रहः, निघण्टुकोषः, देशीनाममाला च, केशवस्वामिनो नानार्णवसंक्षेपः, केशवस्य कल्पद्रुमकोषः, शाहस्य शाहरत्नसमन्वयकोषः, हर्षकीर्तेः शारदीयाभिधानमाला च। एवमेव शब्दकल्पद्रुमः, सुखानन्दनाथस्य शब्दार्थचिन्तामणिः, तारानाथतर्कवाचस्पतेः वाचस्पत्यम्, तारानाथस्य शब्दस्तोममहानिधिः, रायबोथलिकयोः संस्कृतकोषः, वामनसदाशिवस्य संस्कृतकोषः, रामावतारस्य वाङ्मयार्णवः, विद्वन्मण्डलसम्पादितो बृहद्वैदिकशब्दकोषः, द्वारकाप्रसादस्य संस्कृत-शब्दार्थकौस्तुभः, लोकमणिदाहालस्य मणिसंस्कृतकोषश्च।

## शाङ्र्गारिकगीतिकाव्यानि

शाङ्र्गारिकगीतिकाव्यं हि प्रायः श्रृङ्गारवर्णनपरमेव। यद्यपि तत्र सम्भवन्तीतरे प्रसङ्गगता विषया अपि तथापि तस्य मुख्यं प्रयोजनं तु श्रृङ्गारजन्यानन्द एव। शाङ्र्गारिकं हि गीतिकाव्यं दूतकाव्यं-प्रस्तुतकाव्यस्फुटकाव्यभेदेन त्रिविधं दृश्यते।

## दूतकाव्यानि

संस्कृतसाहित्ये दूतकाव्यपरम्पराऽतिप्राचीना। काव्यशास्त्रस्याद्याचार्यो भामहो निर्दिशति-

अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः।
तथा भ्रमरहारीतचक्रवाकशुकादयः।।

अवाचोऽयुक्तवाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन् इति युक्त्या न युज्यते।। इति।

पुराकाले हि अद्यतनीनपत्रप्रेषणादिव्यवस्था नैवासीत्। तेन हि दूरदेशस्था वियोगिनः स्वावस्थाद्योतकं सन्देशं मेघ-वायु-चन्द्र-काक-शुक-पारावतादिभ्यः कथयित्वाऽपि सन्तेषं कुर्वन्ति स्म। न केवलं काव्येऽपि तु लोकेऽपि पारावतदौत्यघटना काकसन्देशहारिता च कर्णपरम्परया श्रूयते एव। लोकगीतेष्वपि एतादृशं वृत्तं बहुशो दृश्यते। इदमेव लोकवृत्तं काव्ये कवयो वदन्ति चमत्कारिण्या वाण्या। प्रकरणेऽस्मिन् वैदिकमन्त्रा अपि साक्षिणो भवन्ति। अप्रतिरथसूक्ते वायुः अगसैनिकत्वेन प्रयुक्तोऽस्ति।

वायुरिन्द्रस्य दूत इति सर्वत्र प्रसिद्धिः। परम्परामिमामनुसरन्ति कवयः काव्येषु कमनीयत्वेन। रामायणे हि हनुमान् रामेण दौत्ये नियुक्त इति दृश्यते तथैव रावणेन शुकः। कुमारसम्भवेऽग्निर्दौत्येन देवैः प्रहितो रुद्रस्य पार्श्वं गच्छति। महाभारते स्वयमेव श्रीकृष्णः पाण्डवानां दौत्यं करोति। इत्थं प्रचलितामेव परम्परामाश्रित्य इति भामहीयकथनमनुसरन् कालिदासो मेघदूतं नाम गीतिकाव्यं प्रणयति। ततश्च प्रवर्तते लौकिकदूतकाव्यपरम्परा। मेघदूतमिन्दुदूतं मनोदूतं पवनदूतं हंसदूतं पिकदूतमित्यादिकाव्यानि कविभिः प्रणीतानि।

## १. कालिदासः - मेघदूतम्

कालिदासस्य उज्जयिनीविशेषपक्षपातिनो मेघदूतं नाम गीतिकाव्यं स्वप्रकृत्यन्यकाव्यानि नितान्तमतिशेते। मेघदूतं हि काव्यं पूर्वोत्तरभागयोर्विभक्तम्। पूर्वभागे मिता उत्तरभागे मिता इति कृत्वा समष्ट्या १२१ मितश्लोकाः सन्त्यत्र। किन्तु सङ्ख्यैषा नैव निर्विवादा। मल्लिनाथेन १२१ मिताः, पूर्णसरस्वतिना ११० मिता, वल्लभदेवेन १११ मिताः, दक्षिणावर्तनाथेन ११० मिताः, भरतसेनेन ११४ मिताः श्लोका अस्य व्याख्याता दृश्यन्ते।

काव्यमिदं कालिदासस्य मनोज्ञतमा कृतिर्यद्धि कविना स्वीयैर्हार्दिकभावैः पूरितम्। एतद्धि कवेर्मानवहृदयगतभावानां समग्राध्ययनस्य साक्षित्वेनास्ति। अत्र हि मानवहृदयं प्राकृतिकवस्तुना सह सम्बद्धं तथा कल्पितं यत्र न लेशमात्रमपि शङ्कावसरः। परिष्कृतवाचा कमनीयत्वेन गुम्फितोऽयं ग्रन्थो न कस्य सहृदयस्यामोदायैव भवति। काव्येऽस्मिन् व्यवहृता मन्दाक्रान्ता क्षेमेन्द्रेणेत्थं प्रशस्यते –

सुयशा कालिदासस्य मन्दाक्रान्ता विराजते।
सदश्वदमकस्येव काम्बोजतुरगाङ्गना।। इति।

कुबेरस्य वर्षभोग्येन शापेन रामगिरिं परिव्राजितो यक्षः प्रावृट्काले गिरिशिखरं मेघाच्छन्नं दृष्ट्वा कान्तास्मृत्या विह्वलश्चेतनातेचेतनेषु प्रकृतिकृपणः सन् प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी मेघद्वारेण प्रियायौ सन्देशं हारयिष्यंस्तं सम्पूज्य नवैः पुष्पैः कथयितुमुपक्रमते। तत्कथने प्रथमं स मार्गनिर्देशनं करोति येन मेघेन गन्तव्यम्। तत्क्रमे क्रमेण माल-आम्रकूट-नर्मदा-दशार्ण-विदिशा-वेत्रवती-नीलगिरि-निर्विन्ध्या-सिन्धु-अवन्ति-विशाला-उज्जयिनी। शिप्रा-गम्भीरा-देवगिरि-चर्मण्वती-दशपुर-ब्रह्मावर्त-कुरुक्षेत्र-सरस्वती-कनखल-गङ्गानदी-हिमालय-क्रौञ्चरन्ध्र-कैलाश-मासरोवर-अलकाश्च निर्दिष्टाः।

उत्तरभागे यक्षोऽलकां वर्णयति परिचाययति च स्वगेहं स्वप्रेयस्याः परिचयनिमित्तकलक्षणान्यपि कथयति। ततश्च कथयति सन्देशम्। सन्देशे स प्रथमं स्वीयां विरहजनितावस्थां निर्वर्ण्य तदनु स कथयति यत्सा नैवोद्विग्ना भवितुमर्हति। तत आरभ्य चतुर्मासानन्तरं तयोः संयोगोऽवश्यम्भावी। सोऽपि तच्चिन्तयैव कथमपि कृच्छ्रादेव दिनानि यापयन्नस्ति। सुखदुःखचक्रं तु सततं भ्रमणशीलमेवेति।

इदं विचिन्तयति समालोचका यन्मेघदूतस्याधारेणावश्यमेव कवेः स्वकीयजीवनेन सह सम्बद्धेन भाव्यम्। तदनुसारेण नितान्तमसम्बद्धे विषये न कोऽपि तथा भावमग्नो भवति। प्रियतमाया वियोगेन यदा कश्चित्भावमग्नो भवति तदैव तथा कश्चिदपि विचिन्तयितुं प्रभवति। वियोगस्य तथाविधकाष्ठा, भावाना-मुत्कटता प्रेम्णस्तन्मयता च यन्मेघदूते दृश्यते तेनावश्यमेवानुभूतेन भाव्यम्। इदमपि निश्चेतुं शक्यते यत्तदा कालिदास उज्जयिनीतोः विप्रकृष्टदेशे वसन्नासीत्। प्रेम्ण इयमेवोपनिषद् यत्संयोगापेक्षया विप्रयोग एव तस्य प्राकर्ष्यं वर्धते।

कालिदासः केनाऽपि कार्येण उज्जयिनीतो दूरदेशे राज्ञा प्रेषितः सम्भवति, सम्भवति च कुन्तलेषु। तदा हि प्रावृषि प्रियाविरहेण तप्तहृदयः स उज्जयिनीस्थितां स्वां प्रियां विचिन्त्य काव्यमिदं कृतवानित्यपि। केचिदस्य बीजं रामायणे विचिन्वन्ती। यथाऽऽह मल्लिनाथोऽपि 'सीतां प्रति रामस्य हनुमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवानिति आहुः' इति। ब्रह्मवैवर्तपुराणे आषाढकृष्णस्य योगिन्येकादशीव्रतप्रसङ्गे कुबेरस्य यक्षं प्रति वर्षभोग्यस्य शापस्योल्लेखो दृश्यते, किन्तु कालिदासब्रह्मवैवर्तपुराणयोः पौर्वापर्यं सम्प्रत्यपि अनिर्णीतमेव। सम्भवति कविना मानवेतरदूत्यकल्पना महाभारतस्य नलोपाख्याने हंसदूत्याद्गृहीतमपि भवेत्किन्तु काव्यस्वरूपं कवेर्नितान्तमेव मौकिलमविच्छिन्नञ्च।

केचिदत्र मेघं कामं महाकालं तन्नियन्तारं यक्षमात्मानं तत्प्रेयसीं परमात्मानं कल्पयित्वा अक्षरब्रह्म-साक्षात्कार एव कवेरत्राभिप्राय इत्यपि विचिन्तयन्ति। वयं तु तत्कोमलया मानवभावनया सह पण्डितैः कृतं महान्तमन्यायमेव मन्यामहे। सर्वत्र दर्शनस्य परुषं बीजं पश्यन्त एते पण्डिता नैव सहृदयकथनार्हाः। काव्यस्यास्य सन्ति पञ्चाशदधिकाष्टीकाः तासु मल्लिनाथस्य प्राचीनासु शेषराजरेग्मीमहोदयस्य नवीनासु प्रसिद्धा।

पश्चाद्वर्तिसाहित्ये मेघदूतस्य प्रभावः स्पष्टमेव लक्ष्यते। एतदनुकृत्य बहवो हि काव्यग्रन्थाः प्रणीताः। तदनुकरणमपि द्विविधं दृश्यते रूपानुकरणं भावानुकरणञ्च। रूपानुकरणे हि मेघदूतगतपद्यानामेकां वा एकाधिकां पङ्क्तिं गृहीत्वाऽवशिष्टभागः स्वकीयपद्येन पूर्यते। जिनसेनस्य पार्श्वाभ्युदयः, विक्रमकवेर्नेमिदूतञ्चास्योदाहरणम्। भावानुकरणे हि भावमात्रमनुक्रियते न तु शब्दावल्यपि। पवनदूत-प्रभृतयोऽस्योदाहरणानि।

**घटकर्परः - घटकर्परकाव्यम्**

अज्ञातविशेषपरिचयस्य घटकर्पराख्यस्य कृतित्वेन सम्मतं यत्र कुत्र तु कालिदासस्यैव कृतित्वेनापि गृहीतं घटकर्पराख्यं काव्यं मेघदूतस्य भावानुकरणेन प्रणीतं तद्विपरीतकाव्यम्। अत्र हि काचित्सद्यः परिणीता किन्तु दैवाद्विप्रकृष्टस्थपतिका युवतिः स्वं प्रियं मेघद्वारैव सन्देशं प्रेषयति। अत्र हि केवलं द्वाविंशच्छ्लोकाः। प्रतिश्लोकमत्र यमकस्य चमत्कारः।

कवेरस्यैतिह्यं न मनागपि ज्ञातम्। एताबदेवोच्यते तद्विषये यत्स विक्रमादित्यस्य नवरत्नेष्वेक आशीत्। ग्रन्थस्यास्य सन्त्यष्टाधिकाष्टीका यासु महामाहेश्वराभिनवगुप्तप्रणीताप्येका कुलकवृत्तिसंज्ञिता। कथ्यते यत्स हि काव्यमिदं कालिदासप्रणीतमेव मन्यते।

## धोयी कवीन्द्रः - पवनदूतम्

धोयी कविः लक्ष्मणसेनाख्यस्य वङ्गेशस्य सभाकविरासीत्। तं हि जयदेवो गीतगोविन्दे 'श्रुतिधरो धोयी कविक्ष्मापतिः' इति स्मरति। लक्ष्मणसेनो हि १२२६ मितवैक्रमाब्दाभ्यर्णे अङ्गभुवं शशासेति तदाश्रितस्य धोयिनः तन्निकटवर्त्येव स्थितिकालः ११९०-१२६० मितवैक्रमान्तरालगः। काव्येऽस्मिन् काचिद्गन्धर्वकन्या लक्ष्मणसेनं पवनद्वारेण प्रणयसन्देशं प्रेषयति।

## वेदान्तदेशिकः - हंससन्देशः

काञ्चीपुरीनिवासी १३२५-१४२६ मितवैक्रमाब्दान्तरालस्थितिमान् वेदान्तदेशिको हंससन्देशसंज्ञकं दूतकाव्यं प्रणीतवान्। अत्र हि हनुमत्कथितसीतावृत्तान्तो रामस्तां हंसद्वारा सन्देशं प्रेषयति। अत्र हि कतिपयेषां दाक्षिणात्यतीर्थस्थलानामपि वर्णनं लभ्यते। काव्येऽस्मिन् ११० पद्यानि सन्ति। प्रत्येकमेवास्य पद्यं मेघदूतपद्येन सह संवदते भावभाषाप्रस्तुतीकरणदृष्ट्या। ग्रन्थस्यास्य सन्ति बह्वष्टीकाः।

## उद्दण्डः - कोकिलसन्देशः

१४६० मितवैक्रमाब्दमभितः स्थितिमता तामिलाभिजनेन मालावारनिवासिना केनचिदुद्दण्डाख्येन कविना मेघदूतं हि भावभाषादिभिरनुकृत्य कोकिलसन्देशनामकं काव्यं प्रणीतमस्ति, यत्र हि प्रेमी प्रेमिकायै कोकिलद्वारेण सन्देशं प्रेषयति।

## प्रस्तुतिकाव्यम्

प्रस्तुतिकाव्यस्येदमेव लक्षणं यदत्र कश्चिदपि विषयः प्रबन्धरूपेण प्रस्तूयते किन्तु स्वरूपेण महाकाव्यलक्षणं नैव सङ्गृह्णाति। कानिचित्प्रस्तुतिकाव्यान्यत्र प्रस्तूयन्ते।

### १. ऋतुसंहारम्

ऋतुसंहार नाम काव्यं षड्तुवर्णनपरम्। अत्र हि ग्रीष्मत आरभ्य वसन्तपर्यन्तं क्रमेण षड्तवो वर्णिताः सन्ति। अत्र सन्ति षडध्यायाः प्रत्यध्यायमेकर्तुवर्णनञ्च। अत्र हि समष्टौ १४४ पद्यानि सन्ति। अस्य कर्तृत्वमादाय पण्डिता वैमत्यं भजन्ते। केचिद्धि मल्लिनाथस्य-

मल्लिनाथः कविः सोऽयं मन्दात्मानुजिघृक्षया।

व्याचष्टे कालीदासीयं काव्यत्रयमनाकुलम्।।

इत्युक्तिमनुसृत्य ऋतुसंहारं कालिदासस्य कृतिं न मन्यन्ते। ते हि कथयन्ति यन्मल्लिनाथसदृशै-रुच्चस्तरीयटीकाकृद्भिरस्य डीका नैव प्रणीता, नैव च साहित्यशास्त्रिभिरस्यैकमपि पद्यं कुत्रापि समुद्धृतम्। तेन नासौ कालिदासस्य कृतिरिति। अपरे कथयन्ति यत्सत्यपि तथा भावभाषादिदृष्ट्यैषा कृतिः कालिदासीयैव। इतरग्रन्थापेक्षया ग्रन्थस्यास्य सरलतया टीकाकृद्भिर्नैवैष टीकितः। साहित्यशास्त्रिणस्तु सरलग्रन्थेन उद्धरणं कदापि नैव गृह्णन्ति। सन्त्यत्रैतादृशानि लक्षणानि यैरिदं कालिदासीयमेव सूचयन्ति। किन्तु सन्त्यन्येऽपि ग्रन्था एतादृशानि चिह्नानि सन्ति किन्तु ते कालिदासस्य नैव। अपरञ्च ग्रन्थेऽस्मिन् 'सोऽयं वो विपरीतरीतु वितनुर्भद्रं वसन्तान्वितः' इत्यत्र यदप्रचलितरूपप्रयोगः कृतः तादृशः प्रयोगः कालिदासस्यान्यासु कृतिषु नैवोपलभ्यते। तेन नासौ कालिदासस्य कृतिः। यद्यैषा कालिदासस्यैव तर्हि स्यात्कस्यचिदपरस्य कालिदासाख्यस्य कवेरिति विदुषां संहतिः।

### २. श्रृङ्गारतिलकम्

श्रृङ्गारतिलकं नाम एकत्रिंशच्छ्लोकात्मिका कृतिः। अत्र हि श्रृङ्गारस्य विविधरूपाणां सजीवं चित्रणमुपलभ्यते। अस्य हि कतिपयं वैशिष्ट्यं ह्यस्य कालिदासकृतित्वं समर्थयति। काव्येऽस्मिन् त्रयोविंशत्पद्यानि लभ्यन्ते सम्प्रति। पण्डितेषु कृतिरियं कालिदासस्यैवेति प्रसिद्धिः, किन्तु न किमपि तत्र प्रमाणम् तथापि अत्रत्या प्रसादगुणसम्पन्नता स्वाभाविकी चोक्तिश्च तथा समर्थयत्यपि। कालिदासस्तेयतरस्य वाऽपि किं न स्यात्कृतिरियं प्रसादमनोहरा कस्यचिदपि रससिद्धस्यैव कवेरेव।

गीतगोविन्दम् हि जयदेवस्य कृतिः। जयदेवो हि वङ्गनरेशस्य लक्ष्मणसेनस्य सभापण्डित आसीत्। तस्य च स्थितिकालः १२२६ मितवैक्रमाब्दमभितः। तेन जयदेवोऽपि १२००-१२८० मितवैक्रमाब्दानभितः स्थितिमान्। उत्कलस्य

बिन्दुबिल्वग्रामे तस्य जन्म कथ्यते। अद्यापि तत्र तत्पुण्यस्मृतौ प्रतिवर्षं समारोह आयुज्यते गीयन्ते च गीतगोविन्दपद्यानि।

गीतगोविन्दं १२ सर्गेषु विभक्तं गीतिकाव्यम्। अत्र हि नायकस्याचरणानुसारेणाध्यायनाम अक्लेश-केशवः, मुग्धमधुसूदनः इत्यादिः। अत्र राधाकृष्णयोः प्राञ्जलं प्रेम वर्णितमस्ति। इदमष्टपदीसंज्ञयाऽपि ज्ञायते। अत्र सङ्गीतगानवर्णनभाषणानां सुन्दरसमन्वयो दृश्यते। कथ्यते हि कृष्णो ब्रह्म राधिका तु जीवात्मा। तेन ह्यत्र ब्रह्मजीवात्मनो नायकनायिकासम्बन्धोऽत्र कल्पितः। शृङ्गारात्मकगीतिकाव्येष्विदं नृपायते।

ग्रन्थस्यास्य सन्ति बह्वष्टीकाः। कथ्यते हि यदि अननूद्यता खलु उत्कृष्टकाव्यस्य लक्षणं तर्हि तद्गीतगोविन्दमेव।

**शृङ्गारकल्लोलः**

शृङ्गारकल्लोलो हि रामभट्टस्य कृतिः। रामभट्टस्य समयः १६६० मितवैक्रमाब्दमभितोऽनुमितः।

**स्फुटकाव्यानि**

स्फुटकाव्येषु सर्वाण्यपि मुक्तकानि समाविष्टानि भवन्ति। तेन नाऽस्य गणना सम्भवा। सामान्यतः प्रबन्धासम्बद्धकाव्यमेव स्फुटकाव्यम्।

**धार्मिकगीतिकाव्यानि**

धार्मिकगीतिकाव्यानामपि सुदीर्घा पङ्क्तिर्विद्यते। सर्वाण्यपि स्तोत्राण्यस्मिन् समाविष्टानि भवन्ति। शाङ्गारिकगीतिकाव्यापेक्षया धार्मिकगीतिकाव्यानां प्रभावोऽधिकतरो जनमानसे। एतानि हि भक्त्युद्बोधनेन भावविशोधनाय समर्थानि भवन्ति। एतानि हि बुद्धेर्वैशद्याय कल्पन्ते। काव्यानीमानि प्रायः पद्यमयानि कानिचित्तु गद्यमयान्यपि। एतेषां ह्युत्पत्तिरपि अनादिरेव दृश्यते। ऋग्वेदस्य 'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।' इत्यारभ्य प्रवर्तितेयं काव्यपरम्परा साम्प्रतिकयुगेऽपि तथैव विलसन्ती दृश्यते। समग्रमेव वैदिकसाहित्यं सङ्गीतमयं दृश्यते। अथाऽत्रोपस्थाप्यन्ते कानिचिदेव धार्मिकगीतिकाव्यानि स्तुतिकाव्यत्वेन सम्मतानि।

**श्यामलादण्डकम्** - स्तुतिकाव्यमिदं कालिदासप्रणीतत्वेन सम्मतम् अत्र हि श्यामा देवी स्तुताऽस्ति।

**गण्डिस्तोत्रगाथा** - अश्वघोषस्य कृतावस्यां धार्मिकसंवादो दर्शितः।

**कल्याणमन्दिरस्तोत्रम्** - सिद्धसेनदिवाकरप्रणीते स्तोत्रेऽस्मिन् जैनतीर्थङ्कराणां स्तुतिर्विद्यते।

**चण्डीशतकम्** - बाणभट्टप्रणीते स्तोत्रेऽस्मिन् भगवती चण्डी शतमितैः पद्यैः स्तुताऽस्ति।

**सूर्यशतकम्** - मयूराख्येन कविना प्रणीते स्तोत्रेऽस्मिन् भगवान् सहस्ररश्मिः सादरं स्तुतोऽस्ति शतमितपद्यैः। कथ्यते हि मयूरो बाणभट्टस्य श्वसुरो वा ज्येष्ठश्यालक आसीत्। स ह्येकदा पुत्र्या वा भगिन्या गृहं गत आसीत्। बहिः स्थितः स रात्रौ दम्पत्योः प्रणयकलहं श्रुतवान् तामनुलालयता बाणेनोक्तं तत्र -

गतप्राया रात्रिः कृशतनु शशी शीर्यत इव।

प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव।

प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो।।

इति। प्रयतमानोऽपि बाणश्चतुर्थं चरणं नैव पूरयितुमशकत्। तदेव पुनः पुनः कथयन्नेव स्थितः एतच्छ्रुत्वोद्बुद्ध-भावो मयूरः कुत्रास्मीति विस्मृत्य चतुर्थं चरणमित्थमुक्तवान् 'कुचप्रत्यासक्त्या हृदयमपि ते चण्डि कठिनम्।' इति। प्रणयकलहविघ्नाज्जातमन्युर्बाणपत्नी स क इत्यविचिन्त्यैव तं 'क्रुष्ठाक्रान्तो भव' इति शशापेति एका परम्परा। अपरजनश्रुत्यनुसारं तु प्रणयकलहविघ्नेन जातमन्युर्बाणो बहिरागत्य तं 'क्रुष्ठाक्रान्तो भव' इति शशाप। निरर्थकशापेनः क्रुद्धः सोऽपि बाणं 'क्षयरोगाक्रान्तो भव' इति शशाप। ततश्च जातपश्चात्तापौ तौ परस्परमाशिषा संयोजयामासुः। अथ च कुण्ठाक्रान्तो मयूरः सूर्यशतकं प्रणीय तत्प्रसादान्मुक्तरोगो बभूव, बाणश्च चण्डीशतकं निर्मायेति।

काव्यस्यास्य सन्त्येकादशाधिकाष्टीकाः। तासु वल्लभदेवकृता सूर्योनुवादिनी प्राचीनतमा।

**सौन्दर्यलहरी** - शङ्कराचार्यस्य ६८९ मितवैक्रमाब्दमभितः स्थितिमानित्यनुमितस्य सौन्दर्यलहरी स्तोत्रकानन‌ेन पुष्पायते। स्तोत्रमिदं शाक्तपरम्परापोषकं शङ्करश्च ब्रह्मसूत्रभाष्ये शाक्तागमस्य प्रामाणिकत्वं खण्डयतीति ग्रन्थस्यास्य तत्कर्तृकत्वं ससन्देहमिति केचिद्वदन्ति। धार्मिकगीतिकाव्येष्वस्य काव्यस्य महत्त्वपूर्णं स्थानम्।

**त्रिपुरामहिम्नः स्तोत्रम्** - स्तोत्रमिदमपि शङ्कराचार्यकृतित्वेन प्रसिद्धम्। अत्र हि दशमहाविद्यास्वेका त्रिपुरा स्तुताऽस्ति।

**मुकुन्दमाला** - वैष्णवेषु लोकप्रियमिदं गीतिकाव्यं कुलशेखरप्रणीतम्। कुलशेखरो हि विक्रमस्याष्टमशतकेकेरलान् शासति स्म। केचिद्वासुदेवमस्यैव सभाकविं कथयन्ति। काव्यस्यास्य शैली परिष्कृता प्राञ्जला च।

**पञ्चशती** - मूककृते कृतित्वेन ख्यातमिदं काव्यं रचनासौष्ठवेऽद्वितीयम्। अत्र हि पञ्चशतमित-श्लोकैर्देवी स्तूयते। कविरसौ शङ्कराचार्यसमकालीन इति पण्डिता वदन्ति। असौ काञ्चीनिवासी।

**शिवमहिम्नः स्तोत्रम्** - पुष्पदन्तप्रणीतमिदं शिवमहिम्नः स्तोत्रं स्तोत्रराजत्वेन प्रसिद्धम्। अत्र भगवान् शिवः सर्वतोभावेन स्तुतोऽस्ति। पुष्पदन्तस्य स्थानस्थितिकालादि सम्प्रत्यपि अज्ञातमेव। केचिदमुं काश्मीरं वैक्रमनवमशतकभवं मन्यन्ते। केचित्तु कविममुं विक्रमादपि सुदूरं पूर्ववर्तिनमामनन्ति। श्लोका-श्चास्य श्रुतिकल्पा इति केषाञ्चिन्मतम्। परिष्कृतशैल्यां भावगाम्भीर्येण प्रणीतमिदं काव्यं सर्वत्र संस्तुतम्। अत्र वृत्तं शिखरिणी अन्त्यभागे वृत्तान्तरमपि। काव्यस्यास्य मधुसूदनप्रणीता हरिहरपक्षीया टीका प्रसिद्धा। तथैव लोकमणिदाहालस्य हरपक्षीया टीका च बालाख्या।

**वक्रोक्तिपञ्चाशिका** - इयं हि रत्नाकरस्य कवेः कृतिः वक्रोक्तिप्रदर्शकं काव्यमिदं गौरीशिव-संवादात्मकम्। रत्नाकरो हि ८५०-९४० मितवैक्रमाब्दानभितः स्थितिमानिति तु अवन्तिवर्मणः समकालिकत्वेन ज्ञायते।

**देवीशतकम्** - आनन्दवर्धनस्य (९०७ वै.) कृतिरियं काव्यात्मकतया नितान्तमेवोत्कृष्टम्। अत्र शब्दालङ्काराणां छटा दर्शनीयाऽस्ति।

**स्तोत्ररत्नम्** - विष्णुस्तुतिसम्बद्धं पञ्चषष्टिमितश्लोकात्मकं काव्यमिदं यामुनाचार्यस्य कृतित्वेन प्रसिद्धम्। इदं हि भावानामनुभूतेरुत्कृष्टतया सर्वोत्कृष्टं मतम्। अस्यैव चतुःश्लोकी अपि प्रसिद्धा लक्ष्मीस्तवनपरा चतुःश्लोकात्मिका। यामुनाचार्यस्य स्थितिकालो हि १०७० मितवैक्रमाब्दमभितोऽनुमितः।

**गद्यत्रयम्** - रामानुजप्रणीते गद्यत्रये शरणागति-वैकुण्ठ-श्रीरङ्गाख्यानि त्रीणि गद्यानि सन्ति। अस्य हि कालः १०७२-११८२ मितवैक्रमाब्दान्तराले।

**पञ्चस्तवः** - श्रीवत्साङ्कस्य पञ्चस्तवः उत्कृष्टतमः स्तुतिकाव्येषु गण्यते। अत्र हि श्री-अतिमानुष-वरदराज-सुन्दरबाहु-वैकुण्ठस्तवाः सन्ति।

**कृष्णकर्णामृतम्** - कृष्णलीलाशुकाख्यस्य बिल्वमङ्गलस्य कृतित्वेन ख्यातमिदं काव्यं त्रिषु विभागेषु विभक्तम्। अत्र हि सन्ति ३१० सङ्ख्याकश्लोकाः। चैतन्यान्दोलनस्योत्पत्तौ विकासे चास्य महान् प्रभावः।

**पादुकासहस्रम्** - पादुकासहस्रं हि वेदान्तदेशिकस्य (१३२५-१४२६ वै.) कृतिः। तस्य हि सन्ति पञ्चविंशतिमितानि गीतिकाव्यानि। पादुकासहस्रे हि सहस्रश्लोकैः रामपादुका स्तुताऽस्ति। रचनादृष्ट्या काव्यमिदं सर्वोत्कृष्टमतीव सरसम्। अस्य अच्युतशतकमपि तथैव।

**वरदराजस्तवः** - अप्पयदीक्षितस्य (१६११-१६८३ वै.) काञ्चीनिवासिनो वरदराजस्तवोऽपि काव्यस्यौत्कर्षमावहति। अत्र हि शतं पद्यानि सन्ति। अस्योपरि ग्रन्थकर्तुरेव स्वोपज्ञा टीकाऽपि वर्तते।

**नारायणीयम्** - केरलवास्तव्यो नारायणभट्टोऽस्य प्रणेता प्रणयनकालश्च १६४२ मितवैक्रमाब्दः। नारायणीयं हि भागवतस्य सङ्क्षेपः। अत्र हि द्वादशस्कन्धाः १०३६ श्लोकाश्च। ग्रन्थोऽयं मालावारादिप्रदेशे बहु मतः।

**आनन्दमन्दाकिनी** - मधुसूदनस्य (१६५० वै.) कृतित्वेन ख्यातमिदं काव्यं श्रीकृष्णस्य नखशिखवर्णनपरम्।

**गङ्गालहरी** - पण्डितराजस्य जगन्नाथस्य (१६४७-१७२२ वै.) गङ्गालहरी गङ्गायाः स्तवनपरा। सन्त्यस्य ५२ श्लोकाः। अस्यैव सुधालहरी सूर्यस्तुतिपरा ३० श्लोकात्मिका, यमुनास्तवपरा दशश्लोकात्मिका अमृतलहरी, अन्वर्थनाम्नी एकचत्वारिंशच्छ्लोकनिबद्धा लक्ष्मीलहरी, विष्णुस्तवनपरा ४३ पद्यात्मिका करुणालहरी च। काव्यानीमानि भावभाषादृष्ट्या उत्कृष्टानि।

**आनन्दसागरस्तवः** - नीलकण्ठदीक्षितस्य (१७०७ वै.) आनन्दसागरस्तवः पार्वतीस्तवनपरः। अस्यैव शिवोत्कर्षमञ्जरी च। उभेऽपि काव्ये भावभाषादिदृष्ट्या उत्कृष्टे।

**लक्ष्मीसहस्त्रम्** - वेङ्कटाध्वरिणः (१७०७ वै.) कृतित्वेन प्रसिद्धेऽस्मिन् काव्ये लक्ष्मीः विष्णुश्च स्तूयेते। अत्र हि सहस्त्रं पद्यानि सन्ति। कवेः कल्पनाऽतीवोत्कृष्टा। अतीवकठिनमिदं काव्यं प्रयत्नसाध्यमपि सरसमेव।

**देवीमहिम्नः स्तोत्रम्** - लोकमणिदाहालस्य कृतित्वेन ख्यातमिदं काव्यं चत्वारिंशत्पद्यात्मकम्। काव्येऽस्मिन् देव्याः सर्वतोमुखी महिमा वर्णिताऽस्ति शिखरिणीवृत्ते। अस्यैव सूर्यमहिम्नः स्तोत्रमपि तथैव।

धार्मिकगीतिकाव्यानामिदं तु केवलमेकदेशमात्रमेव। सन्त्यनेकानि शतकानि, विविधानि महिम्नः स्तोत्राणि, अनेकानि पञ्चकानि, अष्टकानि, दशकानि, पञ्चाशतानि, सहस्रकाणि च येषां सङ्ख्यापि ग्रहीतुं नैव शक्या किमुत वर्णनम्। तानि हि तत्र तत्र स्तोत्ररत्नाकरप्रभृतिसङ्ग्रहग्रन्थेषु द्रष्टव्यानि।

## नीतिकाव्यानि

## नीत्युपदेशकाव्यानि

नीतिपरकाव्यं हि अनुभवसिद्धतथ्ये समाधृतं भवति। सामान्यतः तानि आचारसम्बद्धविषयं वर्णयन्ति। तथैवोपदेशात्मककाव्यानि उपदेशपराणि। किन्त्वेतयोर्मार्गविभेदो न सुकरो यतो हि एकस्मिन्नपरस्य सन्निवेशोऽपरिहार्यः।

नीतिपरकाणां वोपदेशपरकाणाञ्च काव्यानामतिप्राचीनकालादेवास्तित्वमासीत्। एतेषां हि विकासे धर्मस्य दर्शनस्य च सुस्पष्टः प्रभावो लक्ष्यते। पुनः पुनर्जन्ममरणकष्टज्जीवात्मनो मुक्त्यर्थं सत्यान्वेषणेच्छा समुद्भूता। प्रसङ्गेऽस्मिन् सुखदुःखयोरध्ययनं विहितं जीवने तयोः स्थानञ्च निर्धारितम्। सद्गुणदुर्गुणयोर्मूल्यमपि निर्धारितम्। जीवनस्य भव्यत्वमभव्यत्वञ्चावधारितम्। भव्याभव्यजनस्य लक्षणमपि पठितम्। सदाचारदुराचारविषयाश्च निर्धारिताः। एते एव विषया एतादृशे काव्ये सन्निवेशिताः। एतानि काव्यानि मानवजीवनस्य सर्वतो विकासाय प्रयतन्ते खलु। मनुष्येण सफलजीवनयापनाय किं कर्तव्यमिति विषय उपदेशपरककाव्यानाम्। एतादृशानि काव्यान्यपि कानिचिद्धर्मसम्बद्धानि अन्यानि कानिचिदर्थपराणि, कानिचित्तु कामपराणि, इतराणि मोक्षपराण्यपि। किन्तु सर्वत्र सर्वेषामेव समष्टित्वमपि नैव खण्डितम्। धर्माविरुद्धेनार्थोपार्जनमर्थाविरुद्धेन कामोपभोग एव तत्र तत्र वर्णितः। एवमेव सर्वाविरुद्धेन मोक्षसिद्धिश्च। सज्जनपूजा, दुष्टनिन्दा, न्यायः शीलमार्जवं सत्यं धर्मश्चेषां नित्यसन्देशः। काव्यानीमानि सदाचारे एव बलं ददति।

गीतिकाव्यमिव नितिकाव्यमपि बहुविधम्। एषामधिकांशो भागः पद्यमयो यत्र कुत्र गद्यमयश्च। एकस्माच्छ्लोकादारभ्य बहूनां श्लोकानामपि तत्र संस्थितिः।

**१. चाणक्यशतकम्** - चाणक्यशतकं हि चाणक्यनाम्ना विदुषा प्रणीतत्वेन ख्यातेऽस्मिन्नीतिकाव्ये सन्ति ३४० मिताः श्लोकाः। अत्र हि सामान्येन आचारविषयकपक्षस्य समावेशः। यथाऽनुमीयते ग्रन्थस्यास्य सङ्ग्रहीता कश्चिदपर एव कविर्न तु चाणक्यः। सैव स्थितिः राजनीतिसमुच्चयस्य वृद्धचाणकस्य च।

**२. नीतिद्विषष्टिका** - एषा हि सुन्दनपाण्ड्यस्य कृतिः। सुन्दरपाण्ड्यो हि मधुराया निवासी कथितः। तस्य स्थितिकालः ५६० मितवैक्रमाब्दमभितोऽनुमितः कैश्चित्। अरिकेसरिराजशासनेष्वयं पाण्ड्यराज्यव्यवस्थापको मतः। यदि तथा तदा त्वस्य स्थितिकालो नृपविक्रमार्कादपि पूर्ववर्ती सम्पद्यते। कालिदाससमये एव पाण्ड्यानां ख्यातिरासीत्। अत्र हि ११६ मिताः श्लोकाः सन्ति नीतिनिर्देशकाः।

**३. बोधिचर्यावतारः** - शान्तिदेवस्य (६५८ वै.) कृतित्वेन ख्याते काव्येऽस्मिन् बोधिसत्त्वकर्तव्यानि निरूपितानि सन्ति। अत्र हि मनुष्यमात्रेण सह प्रेमभावो निर्दिष्टः। शिक्षासमुच्चयः सूत्रसमुचयश्चास्यैव ग्रन्थौ पूर्वापेक्षयाऽल्पमहत्त्वौ।

**४. नीतिशतकम्, वैराग्यशतकम्** - भर्तृहरेः शतकत्रयेषु द्वितीयमिदं नीतिशतकम्। अत्र हि जीवनोपयोगिनीतयः सङ्कलिताः सन्ति। तृतीयं वैराग्यशतकमपि अस्यैव कृतिः। उभयोरेव प्रत्येकं शतं पद्यानामस्ति। नीतिशतके हि नीति-रीति-सदाचार-धैर्य-शौर्यसाहसौदार्य-परोपकाराद्यनेकविषयाः सप्रपञ्चं निरूपिताः एकाधिकशतश्लोकेषु।

शतकत्रयमालक्ष्य समालोचकाः कथयन्ति यत्काव्यप्रतिभायाः दार्शनिकतया सह यादृशोऽनन्यः प्रसङ्गोऽत्र दृश्यते न तथा क्वचिदप्यन्यत्रेति।

**५. मोहमुद्गरः** - शङ्कराचार्यस्य कृतित्वेन ख्यातं काव्यमिदं सांसारिकविषयं त्यक्त्वा मायाजालच्छेदनाय मार्गमुपदिशति। सन्त्यन्येऽपि शङ्कराचार्यकृतित्वेन सम्मता ग्रन्था यत्र हि दार्शनिको भावः स्पष्टमेव व्यज्यते।

**६. कुट्टिनीमतम्** - कुट्टिनीमतं हि दामोदरगुप्तस्य कृतिः। कविरसौ काश्मीरस्य जयापीडस्य (८३६-८७० वै.) राजसभासत्। यथोक्तं राजतरङ्गिण्याम् -

> तं दामोदरगुप्ताख्यं कुट्टिनीमतकारिणम्।
> कविं कविं बलिरिव धूर्यधीसचिवं व्यधात्।।

ग्रन्थेऽस्मिन् ९७० श्लोकाः सम्प्रति लभ्यन्ते। ग्रन्थोऽयमपूर्ण एवम्। इदं हि शम्मलीमतमित्यप्युच्यते। अत्र वेश्यानां कृते शिक्षासहिता सङ्कलिताऽस्ति। कथं हि वेश्या पुरुषं मोहयेत्कथं वा ततोऽधिकमर्जयेदित्यत्र सप्रपञ्चं निरूपितम्। अस्य हि बहवः श्लोकाः सुभाषितग्रन्थेषु समुद्धृता दृश्यन्ते। क्षेमेन्द्रः कविकण्ठाभरणे मम्मटश्च काव्यप्रकाशे कुट्टिनीमतश्लोकानुद्धरतः।

**७. सुभाषितरत्नसन्दोहः** - काव्यमिदं कविवरस्यामितगतिनाम्ना ख्यातस्य। इदं हि १०५९ मितवैक्रमाब्दे प्रणीतमासीत्। अस्यैवापरो ग्रन्थो धर्मपरीक्षनाम। प्रथमे ३२ मिता अध्याया यत्र जैनसाधूनामाचरव्यवहारविषया उपदिष्टाः। द्वितीये सनातनधर्मापेक्षया जैनधर्मस्योत्कर्षः प्रतिपादितः सप्रपञ्चम्।

**८. चारुचर्या, चतुर्वर्गसङ्ग्रहः, सेव्यसेवकोपदेशः, समयमातृका, कलाविलासः, दर्पदलनम्** - क्षेमेन्द्रो हि काश्मीरजन्मा महाकविः ११०७ मितवैक्रमाब्दाभ्यर्णे स्थितिमान् नीतिविषयकाणि उपदेशपराणि काव्यान्यपि प्रणीतवानासीत्। अस्य हि चारुचर्या शतपद्यात्मिका सद्व्यवहारनिमित्तकनियमानां सोदाहरप्रतिपादिका। चतुर्वर्गसङ्ग्रहे जीवनोद्देश्यभूतानां धर्मार्थकाममोक्षाणां सिद्धेरुपायः प्रदर्शितः। सेव्यसेवकोपदेशे एकषष्टिमितश्लोकाः सन्ति यत्र स्वामिसेवकाभ्यामुभाभ्यामेव व्यङ्ग्यात्मकध्वन्या उपदेशः प्रदत्तोऽस्ति।

**९. योगशास्त्रम्** - योगशास्त्रं हि हेमचन्द्राचार्यस्य (११४५-१२२९ वै.) कृतिः। अत्र हि जैनसाधूनां तपोविधयो जैनानां कर्तव्याणि च निरूपितानि।

**१०. मुग्धोपदेशः** - काश्मीरजनुषा १२०७ मितवैक्रमाब्दमभितः स्थितिमता जल्हणाख्येन विदुषा प्रणीते काव्येऽस्मिन् वेश्यानां छलप्रपञ्चं निरूप्य ततो मोक्षोपायोऽपि वर्णितः।

**११. शान्तिशतकम्** - शान्तिशतकं हि शिल्हणस्य (१२६२ वै.) काश्मीरस्य कृतिः। भर्तृहरेः शतकत्रयीपद्धत्या प्रणीतमिदं काव्यं मानसिकशान्त्युपायान् निर्दिश्य तत्साधनायोपदिशति। सदुक्तिकर्णामृतेऽस्योद्धरणानि दृश्यन्ते।

**१२. श्रृङ्गारवैराग्यतरङ्गिणी** - इदं हि सोमप्रभस्य (१३३३ वै.) कृतिः। अत्र हि स्त्रीसंसर्गसम्भविदोषानुद्घाट्य वैराग्यस्य प्रशंसा कृताऽस्ति।

**१३. सुभाषितनीवी, वैराग्यपञ्चकम्** - भर्तृहरेरेवनीतिशतकपद्धत्यां प्रणीतमिदं काव्यं वेदान्त-देशिकस्य (१३२५ - १४२६ वै.) कृतिः। अत्र हि द्वादश पद्धतयः १४५ सुभाषितश्लोकाश्च सन्ति। तस्यैव वैराग्यपञ्चके स्वानुभूतवैराग्यस्य रहस्योद्घाटनं कृतमस्ति।

**१४. दृष्टान्तशतकम्** - कुसुमदेवाऽऽख्येन विदुषा (१५०० वैक्रमाब्दपूर्वं) दृष्टान्तशतकं प्रणीतम्। अत्र हि जीवनसाफल्यायावश्यका आदर्शाः सदृष्टानां निरूपिताः। वल्लभदेवः (१५५५ वै.) ग्रन्थमिमं स्मरति।

**१५. नीतिमञ्जरी** - द्याद्विवेदाख्येन विदुषा १५५९ मितवैक्रमाब्दे प्रणीतायां नीतिमञ्जर्यां नीतिविषयः सप्रपञ्चं निरूपितोऽस्ति। स हि वेदादिभ्योऽपि उदाहरणं गृह्णाति।

**१६. भामिनीविलासः** - पण्डितराजजगन्नाथ(१६४७-१७२२ वै.) प्रणीतेभामिनीविलासे सन्ति चत्वारो विलासा। तत्र प्रथमो हि अन्योक्तिविलासो यत्र एकाधिकशतश्लोकाः सन्ति। द्वितीयस्तु श्रृङ्गारविलासो यत्र शतं श्लोकाः सन्ति। तृतीयो हि करुणविलासो यत्र १९ श्लोकाः सन्ति। चतुर्थस्तु शान्तरसविलासो यत्र सन्ति द्वात्रिंशच्छ्लोकाः। श्लोका इमे भावेनौजसा च आप्लाविताः सन्ति। ग्रन्थेऽस्मिन् कविर्जीवात्मानं शान्तरसावलम्बनाय सन्दिशति।

**१७. कलिविडम्बनम्, सभारञ्जनशतकम्, शान्तिविलासः, वैराग्यशतकम्** - काव्यानीमानि नीलकण्ठदीक्षितप्रणीतानि। स हि १७०७ मितवैक्रमाब्दमभितः स्थितिमान्। कलिविडम्बने कलियुगघटनोपरि व्यङ्ग्यप्रधानं काव्यम्। यथा हि -

यत्र भार्यागिरो वेदा यत्र धर्मोऽर्थसाधनम्।

यत्र स्वप्रतिभा मानं तस्मै श्रीकलये नमः।।

इत्यादि। सभारञ्जनशतके हि सभासद्रञ्जनोपाया वर्णिताः सन्ति। निभाल्यतामत्र व्यङ्ग्योक्तिः -

जानाते यन्न चन्द्रार्कौ जानते यन्न योगिनः।

जानीते यन्न भर्गोऽपि तज्जानाति कविः स्वयम्।। इति।

शान्तिविलासे हि ५१ मितश्लोकाः सन्ति। अत्र मानसिक शान्तेर्लाभः सप्रपञ्चे निरूपितः। वैराग्यशतके हि वैराग्येन सम्भवी लाभो वर्णितः।

**१८. उपदेशशतकम्** - गुमानिकवेः कूर्माचलीयस्य उपदेशशतके मानवजीवन-सम्बद्धोपदेशपराः शतमितश्लोकाः सन्ति। कवेरस्य समयः वैक्रमाष्टादशशतकपूर्वार्द्धोऽनुमितः।

**१९. सुभाषितकौस्तुभः** - वेङ्कटाध्वरिणः (१७०७ वै.) सुभाषितकौस्तुभो हि व्यवहारोपयोगिनीतीनामेव सङ्ग्रहः।

एतानि अन्यान्यानि च नीत्युपदेशपरकाव्यानि सन्ति नयनपथमनागतान्यपि वा दृष्ट्वाऽप्युपेक्षितानि। तान्यपि क्रमशोऽन्वेष्टव्यानि सन्ति।

**अन्योक्तिकाव्यानि**

तादृशं काव्यमन्योक्तिकाव्यं भवति यत्र जीवनसम्बद्धतथ्यमन्यमिषेणाप्रत्यक्षतया कथ्यते। एतदेव अन्यापदेशकाव्यमित्यप्युच्यते। संस्कृतवाङ्मये एतादृशानामपि काव्यानां नास्त्यभावः। अथाऽत्र कानिचिदन्योक्तिकाव्यान्युपस्थाप्यन्ते।

**१. भल्लटशतकम्** - भल्लटशतकं हि अन्योक्तिपरम्परायाः प्रथमं काव्यम्। अस्य प्रणेता भल्लटाख्यः कविः। स हि काश्मीरस्य शङ्करवर्मणः (९४३-९५९ वै.) राजकविरासीत्। तेन तस्य कालः ९१०-९८० मितवैक्रमाब्दान्तरालेऽनुमितः। सरलया रीत्या रसवत्त्वेन प्रणीतस्यास्य काव्यस्य सन्त्यनेके श्लोकाः सङ्ग्रहग्रन्थादौ समुद्धृताः।

**२. अन्योक्तिमुक्तालता** - काश्मीरस्य हर्षस्य राज्ञः (११४६-११५८ वै.) सभाकविना ११२०-१२०० मितवैक्रमाब्दान्तरालस्थितिमता शम्भुकविना अन्योक्तिमुक्तालताख्यं काव्यं प्रणीतमस्ति। अत्र ह्यन्योक्तिपद्धत्या प्रणीताः १०८ मिताः श्लोकाः सन्ति।

**३. भामिनीविलासः, अन्यापदेशशतकम्** - पण्डितराजजगन्नाथप्रणीतस्य भामिनी-विलासस्य प्रथमो विलासः अन्यापदेशशतकाख्यः। अत्र हि १०१ मिताः श्लोकाः सन्ति।

**४. अन्यापदेशशतकम्** - नीलकण्ठदीक्षितेन प्रणीतं हि अन्योक्तिशतकमेतद्विधकाव्येषु नितान्तमुत्कृष्टतमम्। एतद्धि कवेः प्रतिभायाः निदर्शनमेव। वीरेश्वरस्य अन्योक्तिशतकमपि तत्स्तरीयमेव। एतान्यन्यान्यपि अन्यापदेशकाव्यानि विलसितं संस्कृतवाङ्मये।

**साङ्ग्रहिककाव्यानि**

साङ्ग्रहिककाव्यानि हि परप्रणीतकाव्यादिभ्यः सुभाषितादीन्यादाय वा शब्दान् गृहीत्वा सम्पादितानि भवन्ति। तानि हि खलु द्विविधानि सुभाषितासङ्ग्रहाः कोषग्रन्थाश्च।

**सुभाषितसङ्ग्रहाः**

सुभाषितसङ्ग्रहे हि विविधकविविरचितश्लोकानां विषयक्रमेण सङ्ग्रहः कृतो भवति। तादृशा हि श्लोकाः काव्यग्रन्थेभ्यो गीतिकाव्येभ्यः सामान्यसङ्ग्रहेभ्यश्च गृहीता भवन्ति। तादृशोद्धरणे कविपयेषां कवीनां तत्प्रणीतग्रन्थानाञ्च नामान्यपि स्मृतानि भवन्ति। यद्यपि कतिपये तादृशाः श्लोकाः सम्प्रति समुपलब्धसंस्करणेषु नैवोपलभ्यन्ते तथापि एभ्यः कविग्रन्थादीनां परिचयान्वेषणाय विशेषतः कालनिर्धारणाय सौकर्यं किमपि सञ्जायत एव। सातवाहनस्य गाथासप्तशती, एषु प्रथमो ग्रन्थः। अथैतेषां संक्षेपेण परिचयोऽत्र प्रस्तूयते।

**१. गाथासप्तशती** - गाथासप्तशती हि हालकविना सङ्ग्रहिता इति प्रसिद्धिः। किन्तु बाणभट्टस्तु कृतिमिमां सातवाहनस्येति मन्यते। अत्र हि सन्ति महाराष्ट्रीलिखिताः सप्तशतश्लोकाः, श्लोका इमे श्रृङ्गारसम्बद्धाः। तत्र प्रवरसेन-मायुराज-हालप्रभृतिकवीनां श्लोकाः गृहीताः सन्ति। सातवाहनो हि शालिवाहन एव। सातवाहनो हि आन्ध्रामृत्यनृपाणां पारिवारिकं नाम। सातवाहनराजानो हि महाराष्ट्रे षोडशमितवैक्रमवर्षादारभ्य २७५ मितवैक्रमवर्षपर्यन्तं सत्तासीनां आसन्। वंशेऽस्मिन् हालो नाम राजाप्यासीत्, यो हि विक्रमसमकालीन आसीत्। गाथासप्तशत्यां हालस्यापि सन्ति केचन श्लोकाः उद्धृताः। तेन ग्रन्थस्यास्य सङ्ग्रहो हि वैक्रमद्वितीयशतकपूर्वार्द्धे सम्पन्नः सम्भवति। अनेनैव शालिवाहनेन प्रवर्तितः शक्रयुगे १३५ मितवैक्रमवत्सरादारब्धो भवति प्रचलितोऽस्ति च शाकेनाम्ना। प्रायशः ज्योतिषग्रन्थेषु अस्य प्रयोगो दृश्यते। शिलालेखेष्वपि 'शकानामपि भूभुजाम्' इत्युक्तं दृश्यते।

**२. कवीन्द्रवचनसमुच्चयः** - अयं हि संस्कृतश्लोकानां प्रथमः सङ्ग्रहः। अत्र हि राजशेखरः (९५७ वै.) पर्यन्तानां कवीनां श्लोकाः सङ्गृहीताः सन्ति। तथैवास्य वैक्रमद्वादशशतकोत्तरार्धे नेपालीभाषायामनुवादः कृतो लभ्यते। तेनैवास्य सङ्ग्रहकालो वैक्रमैकादशशतकमभितोऽनुमीयते। सङ्ग्रहेऽस्मिन् ५२५ श्लोकाः समुद्धृताः सन्ति। अत्र ग्रन्थकारनाम तु नैव गृहीतो दृश्यते।

**३. मानसोल्लासः** - मानसोल्लासश्चालुक्यवंश्यस्य सोमेश्वरभूपस्य (११८ वै.) कृतिः। अयमेव अभिलषितार्थचिन्तामणिरित्यप्युच्यते। यद्यप्ययं नैव सुभाषितानामेव सङ्ग्रहोऽपि तु निखिलानामेव ज्ञानविभागानामयं सङ्ग्रहः। अत्र हि सर्वोऽपि विषय उपस्थापितो दृश्यते।

**४. आर्यासप्तशती** - कृतिरेषा गोवर्धनस्य वङ्गभूपलक्ष्मणसेनसभाकवेः १२२६ मितवैक्रमाब्दमभितः स्थितिमतः। अत्र हि वर्णक्रमेण आर्याच्छन्दोनिबद्धाः श्रृङ्गारसम्बद्धा सप्तशतमितश्लोकाः सन्ति।

**५. सदुक्तिकर्णामृतम्** - वटुदासात्मजेन श्रीधरदासेन १२६२ मितवैक्रमाब्दमभितः सङ्ग्रहितेऽस्मिन् ग्रन्थे ४४६ कवीनां २३३८ श्लोकाः समुद्धृताः सन्ति।

६. **सूक्तिमुक्तावली** – यादवराजस्य कृष्णाख्यस्य (१३०४-१३१७ वै.) मन्त्रिणा जल्हणेन १३१४ मितवैक्रमाब्दे सङ्ग्रहितेऽस्मिन् ग्रन्थे २४३ कवीनां २७९० मितश्लोकाः समुद्धृताः सन्ति।

७. **सूक्तिरत्नहारः** – सूक्तिरत्नहारः कलिङ्गरायसूर्यस्य कृतिः। अस्य सङ्ग्रहकालः वैक्रमचतुर्दशशतकोत्तरार्द्धोऽनुमितः।

८. **सुभाषितसुधानिधिः** – १४०७ मितवैक्रमाब्दपर्यन्तं जीवितेन सायणाचार्येण विजयनगरराज्यमन्त्रिणा सङ्ग्रहितेऽस्मिन् ग्रन्थे सर्वेषामेव प्रसिद्धकवीनामुद्धरणानि दत्तानि सन्ति।

९. **शाङ्र्गधरपद्धतिः** – दामोदराख्यस्य सुतेन १४२० मितवैक्रमाब्दमभितः स्थितिमता शाङ्र्गधरेण सङ्ग्रहितेऽस्मिन् ग्रन्थे १६३ विभागेषु २६४ कवीनां ४६८९ श्लोकाः समुद्धृताः सन्ति। सन्ति तस्यापि स्वप्रणीतश्लोकास्तत्र समावेशिताः।

१०. **सुभाषितावलिः** – ग्रन्थोऽयं सकलकीर्तिकवेः। इदं नैव ज्ञातं यत्स स एव जैनविद्वान् सकलकीर्तिर्यः १५०७ मितवैक्रमाब्दपर्यन्तं जीवति आसीद्वा नेति।

११. **प्रसङ्गरत्नावलिः** – पोतवार्यस्य कृतिरियं १५२३ मितवैक्रमाब्दे प्रणीता। अ्र विभिन्नविषयकश्लोकानां सङ्ग्रहः कृतोऽस्ति।

१२. **सुभाषितावलिः** – जोनराजस्य शिष्येण श्रीधरेण १५३७ मितवैक्रमाब्दे सङ्ग्रहिते ग्रन्थेऽस्मिन् ३८० तोऽप्यधिककवीनां श्लोकाः समुद्धृताः सन्ति।

१३. **सुभाषितावलिः** – १५३० मितवैक्रमाब्दमभितः स्थितिमता वल्लभदेवेन सङ्ग्रहिते ग्रन्थेऽस्मिन् १०१ विभागाः सन्ति, यत्र ३५० कवीनां ३५२७ श्लोकाः समुद्धृताः सन्ति।

१४. **पद्यावली** – कृष्णचैतन्यशिष्येण रूपगोस्वामिना १५६० मितवैक्रमाब्दमभितः स्थितिमता प्रणीतेऽस्मिन् ग्रन्थे कृष्णास्तवनपराः १२५ कवीनां ३८६ श्लोकाः समुद्धृताः सन्ति।

१५. **सूक्तिवारिधिः** – १५६० मितवैक्रमाब्दाभ्यर्णवर्तिना पेड्डभट्टेन सङ्ग्रहितोऽयं ग्रन्थः सूक्तिसरिदेव।

१६. **सुभाषितहारावली** – १७६० मितवैक्रमाब्दमभितः स्थितिमतो हरिवकवेरस्यां कृतौ पूर्ववर्तीनां समकालीनानाञ्च कवीनां श्लोकाः समुद्धृताः सन्ति। तत्र पण्डितराजजगन्नाथप्रणीतश्लोका अपि दृश्यन्ते।

१७. **बुधभूषणम्** – शिवाजीपुत्रेण शम्भुना १७४७ मितवैक्रमाब्दमभितः सङ्ग्रहिते ग्रन्थेऽस्मिन् त्रिषु भागेषु ८८३ श्लोका सन्ति।

१८. **पद्यामृततरङ्गिणी** – अज्ञातस्थितिकालस्य हरिभास्करस्य कृतावस्यां सन्ति विविधानि सरसपद्यानि सङ्कलितानि।

१९. **सुभाषितरत्नभाण्डागारः** – ग्रन्थोऽयं शिवदत्तेन सङ्कलितः। अत्र हि सर्वेऽपि कवयः समुद्धृता विषयानुसारेण। ग्रन्थेऽस्मिन् एकादशसहस्रश्लोकाः १६०० लोकोत्तयश्च सन्ति सङ्कलिताः। अस्य प्रणयनकालः २००९ मितवैक्रमाब्दः।

२०. **सूक्तिमुक्तावली** – ग्रन्थोऽयं नरेन्द्रदेवसङ्कलितः। अस्य च प्रणयनकालो वैक्रमैकविंशतिशतकपूर्वार्द्धः।

२१. **संस्कृतसूक्तिरत्नाकरः** – रामजी उपाध्यायेन २०२५ मितवैक्रमाब्दे सम्पादितेऽस्मिन् ग्रन्थे सन्ति १२६२ सुभाषितानि।

एतदतिरिक्तं जर्मनदेशीयविपश्चिता वाटलिकाख्येन ८००० सङ्ख्याकपद्यानां सङ्कलनं कृत्वा जर्मनभाषायां गद्यमयमनुवादञ्च विरचय्य 'इण्डिशेस्प्रुखे' नाम्ना ग्रन्थरत्नं प्रकाशितमस्ति।

**कोषग्रन्थाः**

कोषाः सामान्यतो द्विविधाः नानार्थककोषाः पर्यायवाचककोषाश्च। नानार्थककोषेषु एकस्य शब्दस्य एकाधिका अर्था उपस्थाप्यन्ते पर्यायवाचककोषे एकस्यैवार्थस्य वाचकशब्दा निर्दिश्यन्ते। केषुचित्कोषेषु उभय्येव गतिरपि दृश्यते। तत्र हि परिशिष्टरूपेण नानार्थकोषोऽपि प्रस्तूयते। विषयेऽस्मिन् वयं पृथगेव निरूपयिष्यामः।

# कालिदासस्य मेघदूतम् (पूर्वमेघम्)

## कालिदासः

कविकुलगुरुः कालिदासः प्राचीनकालस्य राष्ट्रकविः उच्यते। कालिदासस्य जन्मस्थानं काश्मीरं वा वङ्गभूमिर्वा राजस्थानं वा उज्जयिनी वेति निश्चितं वस्तुं न शक्यते। न चास्य महानुभावस्य जीवनकालविषये कश्चित् निर्णयः। महाराजविक्रमादित्यस्य राजसभायां अयं प्रतिष्ठितो विद्वान् इति सर्वैः स्वीक्रियते।

कालिदासेन अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम् च इति त्रीणि रूपकाणि, रघुवंशम्, कुमारसम्भवम् च इति द्वे महाकाव्ये, ऋतुसंहारम्, मेघदूतम् च इति द्वे खण्डकाव्ये विरचितानि। तस्य प्रतिभावैशिष्ट्यं यथा पद्यरचनायां तथैव नाटकेषु वर्तते।

महाकवेरस्य काव्यसौष्ठवं दृष्ट्वा विद्वांसः विविधाः उद्गाराः उद्घोषितवन्तः। ते सूक्तयः उक्तयश्च -दीपशिखा कालिदासः, उपमा कालिदासः, वैदर्भीरीतिसन्दर्भे कालिदासो विशिष्यते। मेघदूतं कविकुलगुरोः कालिदासस्य आद्यकृतिरिति बहूनां प्रतिभारतां विपश्चितां परामर्शः दृश्यन्ते।

## मेघदूतम्

कालिदासेन विरचितस्य मेघदूतखण्डकाव्यस्य प्रमेयविभजनसौकर्याय भागद्वयं राजते - पूर्वमेघः उत्तरमेघश्च। ग्रन्थेऽस्मिन् स्वप्रियाविरहेण खिन्नस्याज्ञातनामधेयस्य रामगिर्याश्रमे वसतः यक्षस्य स्वकान्तायां सन्देशप्रापणार्थं मेघं प्रति विनिर्वेदनं रामगिरिपर्वतात् अलकापुरीपर्यन्तं मेघमार्गस्य वर्णनं, कुबेरनगर्याः सुष्ठुनिरूपणं, यक्षसन्देशश्च सम्यग्प्रकारेण महाकविना प्रतिपादितम्। एवं मेघदूतस्य सूक्ष्मपरीक्षणेनेदं वक्तुं शक्यते यत् पूर्वमेघभागे स्वामिनः शापेन प्रियावियुक्तस्य यक्षस्य अम्बुदं प्रति स्ववल्लभायै सन्देशनयनार्थं याचनाप्रकारञ्च उपवर्ण्य मेघमार्गवर्जनव्याजेन रामगिरितः आकैलासं भारतीयप्रकृतिरमणीयतां समुपवर्णयन् बाह्यप्रकृतेः मनोरमं वर्णनं विहितमनेन कविकुलगुरुणा कालिदासेन। तथैवोत्तरवेघभागे अलकानगर्याः स्वभवनस्य रमणीयं चित्रणं विधाय स्वसन्देशकथनव्याजेन मानवीयान्तःप्रकृतेः अभिनवमलौकिकञ्च समुपबृंहणं कृतं तेन। मन्दाक्रान्तावृत्तनिबद्धं भवति कालिदासकृतिरित्यतः प्रायेण सर्वाण्यपि सन्देशकाव्यानि अनेनैव वृत्तेन संबद्धानि।

## पूर्वमेघस्य कथासारः

महाकविकालिदासप्रणीतस्य मेघदूतमिति खण्डकाव्यस्य पूर्वमेघभागे आत्मनियोगे विहितापराधः कश्चिदज्ञातनामधेयो यक्षः प्रियाविप्रयोगरूपैकवर्षभोग्यात् स्वामिनः शापात् रामगिरिपर्वताश्रमेषु निवासं चकार। कान्तावियुक्तः सः कामुको यक्षोऽष्टौमासान् व्यतीत्याषाढस्य प्रथमेऽहनि गिरिशिखरसंलग्नं मेघमवलोकितवान्। दयिताविप्रयुक्तानां कृते मेघदर्शनमभीष्टजनस्मरणोद्दीपकं भवतीत्येतावता तस्याग्रेऽतीव प्रयासेन स्थित्वा चिरं स्वप्रियां चिन्तयामास। तदनन्तरं निजवल्लभायाः प्राणधारणोपायं चिकीर्षुः स्वकुशलवार्तां प्रेषणकामः कुबेरानुचरो यक्षोऽम्बुदं गिरिमल्लिकापुष्पैः समर्च्यं तस्य चेतनाचेतनत्वमविचारयन् 'मत्सन्देशं मद्दयितापार्श्वं नय' इत्येवंरूपेण प्रार्थितवान्। जलदं प्रति प्रियाचिन्तकः स यक्षः कथयति - भो मेघ! त्वं जगत्प्रथिते पुष्करावर्तकानां कुले जनितोऽसि। धर्मपीडितानां विरहसतप्तानां कृते भवान् एव रक्षकः। अतः भाग्यवशाद्वियुक्तपत्नीकोऽहं दयितापार्श्वं सन्देशप्रापणायालकापुरीं प्रति गन्तुं त्वां प्रार्थये। अध्वनि आकाशचारिणं भवन्तं प्रोषितभर्तृकाः कामिन्यः सत्करिष्यन्ति। अनुकूलोवायुः शब्दायमानश्चातको गगने बद्धपङ्क्तयः बलाकाश्च यात्राकरणायेदानीं प्रेरयन्ति। एवं कृते सति अविहतगति सन् त्वं पतिव्रतां जीवनं धारयन्तीं मत्पत्नीमवश्यं द्रक्ष्यसि। नभसि कैलासपर्वतपर्यन्तं राजहंसास्तव सहचराः भविष्यन्ति। अतः प्रियमित्रमुन्नतं रामगिरिपर्वतमाश्लिष्य यात्रार्थमनुज्ञां याचस्व। साम्प्रतं मत्तः गमनानुकूलं मार्गमाकर्ण्य। तदनुश्रोत्रसुखदं प्रियायै सन्देशं कथयिष्यामि।

**मेघमार्गवर्णनम्**

हे पयोद! सचकिताभिः सिद्धाङ्गनाभिः विलोकितस्त्वमेतस्मात् स्थानात् गगने उत्तराभिमुखत्वेन व्रजन् मालं नामकं क्षेत्रं प्राप्स्यसि। तत्र सस्यादीनां त्वदधीनत्वादकृत्रिमस्नेहैः ग्रामीणललनानयनैः सादरसमवलोक्यमानस्त्वं जलवर्षणेनानुगृह्य पुनरप्युत्तरमार्गेणोत्पतन् धारासम्पातेन निवारितदावानल-स्याम्रकूटाख्यपर्वतस्यातिथ्यमङ्गीकुरुष्व। मार्गश्रममपनोदनार्थं किरातकामिनीभुक्तलतासदने किञ्चित्क्षणं विश्रम्य जलवर्षणञ्च विदधन् ततोऽग्रे विन्ध्यप्रत्यन्तपर्वते प्रसृतायाः नर्मदायाः जलेनात्मानं प्रपूर्य धुरि एधस्व।

इतः परं कुटजपुष्पसुरभितान् नैकान् शैलानतिक्रम्य दशार्णदेशस्य राजधानीं विदिशां प्राप्नुहि। तत्र वेत्रवत्या नाम नद्याः पानीयं कस्याश्चिन्नायिकाया अधरमिवास्वाद्यान्तिक एव नीचैर्नामके गिरौ मार्गश्रमशान्त्यर्थं वासं विधेहि। विश्रामानन्तरं यूथिकाकुसुममुकुलानि सिञ्चन् सन् पुष्पावचायिनीश्छायादानेनानुगृह्यालकापुरीं प्रति प्रस्थितस्य तव वक्रे मार्गे सत्यपि उज्जयिनीमवश्यं व्रज।

हे मित्र! उज्जयिनीं प्रति गच्छतस्तव मार्गमध्य एव प्रवहन्त्याः नाभिसदृशं जलभ्रम दर्शयन्त्याः स्तोकजलेन कृशशरीरायाः कामिनोसदृश्याः निर्विन्ध्यायाः नद्याः रसमनुभूय जलवर्षणेन तस्याः कार्श्यमपाकुरुष्व। ततो वत्सराजोपाख्यानयुतामवन्तीं नगरीमतिलङ्घ्य स्वर्गनिवासिनामवशिष्टैः सुकृतीरानीतं स्वर्गस्यैकं खण्डमिव प्रचुरसम्पत्तियुतामुज्जयिनीं याहि।

**उज्जयिनीवर्णनम्**

उज्जयिन्यां सुखस्पर्शः शिप्रानदीवायुः रतिक्रीडायां पुनः प्रवृत्त्यर्थमनुनयशीलः प्रियतम इव कामिनीनां रतिपरिश्रममपनयति। पण्यवीथिकाप्रसारितान्यपरिमितानि रत्नान्यालोक्य रत्नाकराः जलमात्रशेषाः सञ्जाता इत्यनुमीयते। तत्रत्या अश्वाः सूर्याश्वस्पर्धाशालिनः, गजाः मदजलवर्षणात् वृष्टिमन्तः, भटश्रेष्ठाश्च युधि रावणाभिमुखमपि स्थायिनः सन्ति। भो सुहृद! एवंविधायाः उज्जयिन्याः प्रमदालाक्षारसचिह्नितेषु धनिकभवनेषु विश्रम्य तदीयसुषमाञ्चावलोकयन् शिवगणैः सादरं दृश्यमानः सन् गन्धवत्याः नद्याः वायुभिः प्रकम्पितोद्यानं त्रैलोक्यनायकस्य भगवतः शिवस्य स्थानं प्रति भवद्भिः गन्तव्यम्। तत्र महाकालेश्वरं प्राप्तस्त्वं शिवस्य सायङ्कालिके पूजावसरे गर्जनेन पटहभावमासाद्याशेषं पुण्यं प्राप्स्यसि। चरणविक्षेपैश्चामरसञ्चालनेन क्लान्ताः गणिकास्त्वत्तः सुखशान्तिप्रदान् वर्षाग्रविद्रुतवाप्य त्वयि कटाक्षान् परित्यक्ष्यन्ति। एतेन शिवार्चनस्य कामिनीकयक्षरूपं सघः फलं भवान् प्राप्स्यति। हे मेघ! तत्रोज्जयिन्यां रजन्यां कान्तसदनं यान्तीनामभि-सारिकाणां जलवर्षणं गर्जनञ्चाकृत्वैव विद्युत्प्रकाशेन मार्गं दर्शयन् चिरं स्फुरणात् क्लान्ततडिद्भार्यस्त्वं कस्मिंश्चिद्गृहाच्छादनोपरिभागे रात्रिमतिवाह्य सूर्योदये सति स्वनायिकायाः कमलिन्याः कमलरूपा-न्मुखाद्धिमरूपमश्रुनिवारयितुं प्रवृत्तस्य भानोः पन्थानं परिहरन् स्वमित्रकार्यसाधनायाश्वशेषमतिक्रामय।

अनुभूतरसः कोऽपि मानवः प्रदर्शितजघनां कामिनीं त्यक्तुं समर्थो न भवतीत्येतावता त्वमपि त्यक्ततटरूपनितम्बं नीलजलरूपवसनमपनीय गम्भीरायाः नद्याः समुपभोगं विधाय देवगिरिं प्रति प्रस्थानं विधेहि। तत्र देवगिरौ पुष्पमेघीकृतशरीरो भवान् सूर्याऽतिशायिनं भगवन्तं कार्तिकेयं मन्दाकिनीजलार्द्रैः पुष्पसम्पातैरभिषिञ्च्य तद्वाहनं मयूरं स्वगर्जनैः नर्तित्वा रन्तिदेवस्य कीर्तिमूर्त्याः चर्मण्वत्याः नद्याः जलमादातुं नीचैरवतरतु। तदनु तां चर्मण्वतीमुत्तीर्य दशपुरकामिनीनां नयनकुतूहलं संवर्धयन् ब्रह्मावर्तदेशस्थितं कुरुक्षेत्रमवाप्य सरस्वतीनद्याः जलं पीत्वा निर्मलान्तःकरणः सन् तदग्रे कनखलतीर्थसमीपे स्थितां स्वर्गसोपानभूतां जाह्नवीमनुसर। ततः परं भागीरथ्याः उत्पत्तिकारणं हिमाचलमासाद्य मार्गश्रमनिवारणाय तच्छिखरोपविष्टः सन् भवत्समक्षं वनानलः हिमालयं पीडयेत्तर्हि त्वया जलधारावर्षणैः वनाग्निः निर्वापणीयः। तत्रत्याः शरभास्तेषामुड्डयनमार्गं त्यजन्तमपि भवन्तं लङ्घयितुं प्रयतेरन् तदा तान् करकानां तुमुलवृष्टिभिः क्षतविक्षतांश्च विधाय कस्मिंश्चित् पाषाणे प्रकटितं भगवतः शिवस्य पादन्यासं भक्त्या प्रदक्षिणीकुरुष्व। शिवदर्शनान्निष्कल्मषाः भवन्तः हिमालयस्य तटसमीपे तानि तानि द्रष्टव्यवस्तूनि विलोक्य मानसरोवरं प्रति गच्छतां हंसद्वारेण क्रौञ्चाख्यपर्वतविवरेणोदीच्यां स्थितस्य सुरसुन्दरीमुकुरभूतस्य कैलासस्यातिथ्यमङ्गीकुर्वन्तु। धवलवर्णस्य कैलासस्य शिखरे मसृणकज्जलकान्तौ त्वयि मेघे स्थिते सति स्कन्धन्यस्तनीलाम्बरो गौरवर्णबलराम इव शोभां धारयन् भवान् शिवदत्तहस्तावलम्बायाः गौर्याः संचरणकाले मणितटारोहणाय सोपानत्वं स्वीकरोतु।

हे मेघ! कैलासे सुरकामिन्यः कङ्कणाग्रप्रहारैरुत्सृष्टजलं त्वां कृत्रिमजलधारागृहत्वं विधास्यन्ति। निदाघप्राप्तस्य तव मेघस्य ताभ्यः सुरयुवतिभ्यः यदि मुक्तिर्न स्यात्तर्हि स्वगर्जनैः त्रासयित्वा स्वर्णपद्मोत्पत्तिस्थानभूतं मानससरोवरजलं यथाकामं पिबन् कैलासस्य समुपभोगः भवद्भिः विधातव्यः। हे मित्र! प्रियतमस्य क्रोडे च्युतवसनां नायिकामिव प्रियतमस्येव कैलासाचलस्य शिखरे अपगतगङ्गावसनामवलोक्य त्वमवश्यमवगमिष्यसि। या अलका सप्तोन्नतभवना सती वर्षतौ जलवर्षकं मेघवृन्दं कोपरहिता रमणीयमुक्तासमूहगुम्फितं केशपाशमिव धारयति।

एवं मेघदूतमिति खण्डकाव्यस्य पूर्वमेघभागे रामगिरिपर्वतादारभ्यालकापुरीं यावत् मेघस्य पन्थानं सम्यगुपवर्ण्य महाकवेः कालिदासस्य लेखनी विश्रान्तिं लभते।

## मेघदूतस्य काव्यशैली

संस्कृतवाङ्मये गीतिमयं खण्डकाव्यं मेघदूतं निश्चप्रचेन काव्यपारावारे समुपगतं परमोज्ज्वलं रत्नमिव विभाति। खण्डकाव्येऽस्मिन् प्रियावियोगसन्तप्तस्य यक्षस्यान्तरिकी व्यथा अतीव मार्मिकतया कविकुलगुरुणा समुपवर्णिता। आज्ञाभंगापराधकुपितेनालकाधीश्वरेण कुबेरेण कामुको यक्षः वर्षमात्रकालाय निर्वासितः। रामगिर्याश्रमे वसन्नष्टौ मासान् व्यतीत्य वर्षर्तौ सानुगतमम्बुदमवलोक्य प्रियाविरहकातरः स्वकान्तायाः प्राणधारणोपायं चिकीर्षुः सन् स यक्षः मेघद्वारा निजप्रेयसीं हृदयवल्लभां प्रति प्रणयसन्देशं प्रेषयामास।

गीतिमयेषु खण्डकाव्येषु वा सर्वश्रेष्ठस्थानं भजतोऽस्य काव्यस्य मेघदूतस्य भाषा प्रसादगुणशालिनी, सुमधुरा, प्रवाहवाहिनी, अतीव प्राञ्जला च वर्तते। प्रियाविप्रयुक्तस्य यक्षस्याम्बुदं प्रति प्रणयसन्देशनयनार्थं याचनाप्रकारः कियान् रोचकोऽत्र सुधिय एव विभावयन्तु। यथा -

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।

अन्यदपि -

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।।

कुबेरशापान्वितस्य यक्षस्य तादृगौचितीं कियच्चारुतया कविवरः उपपादयतीति विद्वद्भिर्विचारणीयम्।

अस्मिन् मेघदूते विरहशालिनो युवजनस्य मनस्थितेस्सादृशं सुस्पष्टं चित्रं प्रस्तुतं विद्यते यत् तदधीयानो जनः स्वचित्रमत्र प्रदर्श्यमानः कामप्यात्मविस्मृतिगह्वरनिमग्नमिवात्मानं मन्यते। मन्मते मेघदूतस्येदमेव हि वैशिष्ट्यं यद् यत्रकुत्रचिदपि वर्णनप्रवृत्तानि पद्यान्यपि मनोगतान् विरहिजनभावानेवाभिव्यञ्जयन्ति। यथा मेघमार्गवर्णनावसरे उज्जयिनीं प्रति प्रस्थितस्य मेघस्य मध्य एवापतिताया निर्विन्ध्याख्याया नद्याः क्षीणत्वं प्रतिपादयन् यक्षः ब्रूते -

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छायातटरुहसरुभ्रंशिभिर्जीर्णपर्णैः।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः।।

श्लोकेऽस्मिन् ग्रीष्मकाले स्वल्पजलयुतायाः सिन्धोर्दशादूरं व्रजति, विरहिणा दशैव पुर उपेत्य विरहिणो स्वान्ते कामपि विरहजनितां पीडामवतारयति, याऽध्येतृरसिकानां चित्ते विप्रलम्भश्रृङ्गां प्रवाहयति।

मेघदूतस्योत्तरमेघभागे यक्षमुखेन तत्पत्न्याः सौन्दर्योऽतिशयत्वं वर्णयता महाकवि-कालिदासेन सौन्दर्यसृष्टेः पराकाण्ठा प्रदर्शिता-

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्येक्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः।।

अत्र सर्वाणि विशेषणान्युपन्यस्याप्यपरितुष्यता 'सृष्टिराद्येव धातुः' इति निगद्य सौन्दर्यस्य प्रकर्षः प्रकटीकृतः। काव्येऽस्मिन् भौगोलिकं वैज्ञानिकं ज्ञानमपि विद्यत इत्याधुनिकाऽपि स्वीकुर्वन्ति।

वाल्मीकिरामायणं मनसि निधायैव मेघदूतं विरचितवान् कालिदास इति नास्त्यविदितं विदुषाम्। वाल्मीकिना निगदितोप्यर्थोऽनेन कविकुलगुरुणा कथं चमत्कारिशैल्यां प्रदर्शित इत्यत्र सुधीजनानां प्रीतये निदर्श्यते।

वाल्मीकिरामायणे जनकतनयां सन्तोषयितुं धैर्यं धारयितुञ्च -

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे।
एति जीवन्तमानन्दो नरं वर्षशतादपि।।

इतीत्थं प्रतिपादितं विद्यते। तदेव कथनं प्रियाविरहखिन्नो यक्षः स्वप्रियां सान्त्वयितुं धैर्यमाधातुञ्चोक्तवान् कया रीत्येत्यत्र महाकवेः कालिदासस्य लेखन्याश्चमत्कारं सुधियोऽवलोकयन्तु -

इत्यात्मानं बहुविगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।

सन्देशप्रेषणप्रसंग एव यक्षस्य 'देवः स्वप्नेऽप्यावयोः संगमं न सहते' इति कथनमपि विदुषां प्रमोदमावहति। यथा –

स्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगम नौ कृतान्तः।।

अत्र मानवीयान्तःप्रकृतेः मार्मिकं स्नेहस्यन्दनं चित्रार्पितमिव प्रतिभातीत्यत्र विद्वांस एव प्रमाणम्। महाकविः कालिदासः श्रृंगाररसस्याद्वितीयः कविः। श्रृंगारे नान्यः कोऽपि कविः तस्य तुलां स्पृशति। अस्य मेघदूतमित्याख्यं खण्डकाव्यमपि किमप्यलौकिकं मादकं तत्वं स्वस्मिन् रक्षतीत्यत्र नास्ति सन्देहावसरः। अयमेव हेतुः यदस्य काव्यस्य सहृदयाः सुधियः यावज्जीवमध्ययनं कुर्वन्तः 'माघे मेघे गतं वयः' इत्याख्यभणितेरपि सार्थकतां नयन्तीति शम्।

## मेघदूतस्य वैशिष्ट्यम्

कल्पनायाः विविधविलासेन, भावानां कोमलव्यञ्जनया, माधुर्यस्यानवच्छिन्न-प्रवाहसमन्वितमिदं मेघदूताख्यं खण्डकाव्यं महाकवेः कालिदासस्य सुधाधवलितं कीर्तिकौमुदीमशेषविश्वस्य दिक्कोणेषु प्रसारयामास इत्यत्र नास्ति कश्चन सन्देहः। याथातथ्येनेदं मेघदूतं समेषां प्रियावियोगपीडितानां मानवानामाशायाः, निराशायाः, वा, हर्षस्य विषादस्य वाऽशेषानां भावानां चित्रणमस्माकं समक्षमुपस्थापयति! मेघदूतस्य प्रतिश्लोकं प्रतिशब्दञ्च कान्ताविप्रयुक्तस्य चित्तस्य सूक्ष्मस्पन्दनमिव भाति। महाकविना तदनुकूलस्य मन्दाक्रान्ताख्यस्य वृत्तस्यापि समुपयोगं विहितमस्मिन्।

साहित्यदर्पणकाराः श्रीविश्वनाथमहोदया स्वस्मिन् ग्रन्थे -

निसृष्टार्थो मितार्थश्च तथा सन्देहकारकः।
कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः।। (३, ५८)

इति निगद्य दूतस्य त्रयो भेदा अङ्गीकुर्वन्ति।
प्रसङ्गतोऽत्र समेषां सोदाहरणं लक्षणं विदुषां प्रीयते प्रस्तूयते -
निसृष्टार्थः -

उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्।
सुश्लिष्टं कुरुते कायं निसृष्टार्थस्तु स स्मृतः।। (३, ५९)

- द्वयोर्पक्षयोः (येन दूतः प्रेष्यते, यस्य सविधे दूतः गच्छतीति तयोः) भावं विज्ञाय स्वयमात्मना सन्देशं कथयेत्, संपृष्टे सति तदनुकूलं प्रत्युत्तरं दत्त्वा कार्यं साधयेत्, स निसृष्टार्थदूतः जनैर्कथ्यते। वाल्मीकिरामायणे जनकतनयापार्श्वे रामसन्देशहारको वातात्मजः श्रीमद्भागवते भगवतः श्रीकृष्णस्य सविधे रुक्मिणीसन्देशवाहको विप्रश्चास्य निसृष्टार्थदूतस्योदाहरणभूते स्तः।

मितार्थः -

मितार्थभाषी कार्यस्य सिद्धकारी मितार्थकः (सा. द. ३, ६०)

न्यूनातिन्यून शब्दप्रयोगं विधाय योऽभीष्टं साधयति, सः मितार्थभाषी दूतः इति सुधीभिर्विज्ञायते। यथा अभिज्ञानशाकुन्तले 'मिश्रकेशी' मितार्थदूती विद्यते।

सन्देशहारकः -

यावद्भाषितसन्देशहारः सन्देशहारकः (सा. द. ३, ६०)

-यः प्रेषकस्य निगदितवचनमात्रं प्रोच्याभिलषितकार्यं विदधाति सः सन्देशहारको दूत इति बुधैर्गण्यते। मालतीमाधवे नन्दनेन प्रेषितः पुरुषः सन्देशहारको दूतोऽस्ति।

अस्यां स्थितौ संप्रस्तुते मेघदूते काव्ये महाकविः कालिदासो योऽचेतनमम्बुदं दूतरूपेणाङ्गीकृतवान् तस्य दूतानां प्रदर्शितभेदेषु कस्मिन्नपि सामञ्जस्यं भवितुं न शक्नोति। यतो ह्यचेतनो मेघः वक्तुर्वाक्यं स्वस्मिन् धारयितुं बोद्धव्यस्यान्तिके तस्य भावं प्रापयितुं वा सक्षमो नास्ति,कार्यसाफल्यस्य का वार्ता? एनमनुपपत्तिमभिलक्ष्यैव महाकविना पूर्वमेघे निगदितम् -

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः?
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः?
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।। (पू. मे., ५)

अत्रेदं विचारणीयं विद्यते यदस्मिन् लोके एकतः सामान्यो जनोऽभिधावृत्त्या स्वमनोगतमावमभिधायाभीष्टं साधयत्यपरतो मध्यमो जनः लक्षणावृत्त्या स्वकीयान् भावान् प्रदर्श्य निजकार्यं विदधाति। परमलौकिकप्रतिभाशालिनो जनाः व्यञ्जनावृत्त्या आत्मनोऽभिलाषं निष्पादयन्ति। अनेन प्रकारेणेह काव्ये महाकविः कालिदासः व्यङ्ग्यप्रधानवाक्यमाधारीकृत्य व्यञ्जनया वृत्त्या सन्देशाभिव्यक्तिं कारयित्वा स्वकीयाद्भुतकल्पनायाः सौष्ठवं प्रदर्शितवान्नित्यत्र नास्ति सन्देहः।

# मेघदूतकाव्यम्
## अथ पूर्वमेघः

**कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।१।।**

**पदच्छेदः** - शापेन + अस्तङ्गमितमहिमा - शापेनास्तङ्गमितमहिमा। यक्षः + चक्रे - यक्षश्चक्रे। रामगिरि + आश्रमेषु - रामगिर्याश्रमेषु।

**अन्वयः** - स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

**अन्वयार्थः - स्वाधिकारात्** - आत्मनियोगात्, **प्रमत्तः** - असावधानः, **कान्ताविरहगुरुणा** - प्रेयसीवियोगदुःसहेन, **वर्षभोग्येण** - संवत्सरभोगयोग्येन, **भर्तुः** - अलकाधिपस्य कुबेरस्येति यावत्, **शापेन** - दुरेषणया, **अस्तङ्गमितमहिमा** - अक्षममहत्त्वः, **कश्चित्** - कोऽपि, **यक्षः** - देवयोनिविशेषः, **जनकतनयास्नानपुण्योदकेषु** - सीतामज्जनपवित्रजलेषु, **स्निग्धच्छायातरुषु** - निबिडच्छायावृक्षेषु, **रामगिर्याश्रमेषु** - रामगिरिनामकपर्वताश्रमेषु, **वसतिं** - वासं, **चक्रे** - चकार।

**भावार्थः** - आत्मनियोगो कृतापराधः असावधानः कश्चिदज्ञातनामधेयोः यक्षः, स्वामिनः कुबेरस्य प्रियावियोगरूपैकवर्षभोग्यात् शापात्, (तमभिशप्तसमयमतिवाहयितुम्) गहनच्छायायुक्तवृक्षेषु 'रामगिरि' पर्वतकुटीरेषु स्वनिवासं कृतवान्।

**समासः** - कान्ताविरहगुरुणा - कान्तायाः विरहः कान्ताविरहः (षष्ठीतत्पुरुषः), कान्ताविरहेण गुरुः (तृतीयातत्पुरुषः), कान्ताविरहगुरुस्तेत कान्ताविरहगुरुणा। स्वाधिकारात् - स्वस्य अधिकारः स्वाधिकारः (षष्ठीतत्पुरुषः), अथवा स्वः अधिकारः स्वाधिकारः (कर्मधारयः)। अस्तंगमितमहिमा - अस्तंगमितो महिमा यस्य (बहुव्रीहि), स अस्तंगमितमहिमा। वर्षभोग्येण - वर्ष भोग्यः वर्षभोग्यः, जनकतनयास्नानपुण्योदकेषु - जनकतनयायाः स्नानं जनकतनयास्नानम् (षष्ठीतत्पुरुषः), जनकतनयास्नानैः पुण्यानि उदकानि येषु (बहुव्रीहि), जनकतनयास्नानपुण्योदकेषु। स्निग्धच्छाया - स्निग्धा च सा छाया स्निग्धच्छाया (कर्मधारयः),

**कोशः** - प्रमादोऽनवधानता इत्यमरः। गुरुस्तु गीष्पते श्रेष्ठे गुरौ पितरि दुर्भरे इति शब्दार्णवः। शापाक्रोशौ दुरेषणा इत्यमरः। विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः इत्यमरः। वत्सरे वर्षमस्त्रियाम् इत्यमरः। स्निग्धं तु मसृणे सान्द्रे इति शब्दार्णवः। छाया वृक्षो नमेरुः स्यात्।

**अलङ्कारः** - काव्यलिङ्गम्, परिकरम्।

**वृत्तम्** - मन्दाक्रान्ता। 'मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद्गुरू चेत्'।

ऽ ऽ ऽ ऽ।।   ।।।   ऽ ऽ।   ऽ ऽ। ऽ ऽ

कश्चित्का न्ताविर हगुरु णास्वाधि कारात्प्र मत्तः।

(इतोऽग्रे सर्वेषु श्लोकेषु च मन्दाक्रान्तावृत्तमित्यवधेयम्)

**तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**
**नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।**
**आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं**
**वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।।२।।**

**पदच्छेदः** - तस्मिन् + अद्रौ - तस्मिन्नद्रौ। कतिचित् + अबलाविप्रयुक्तः - कतिचिदबलाविप्रयुक्तः। मेघं + आश्लिष्टसूनुं - मेघमाश्लिष्टसूनुम्।

**अन्वयः** - तस्मिन् अद्रौ अबलाःविप्रयुक्तः कनकवलभ्रंशरिक्तःप्रकोष्ठः कामी सः कतिचित् मासान् नीत्वा आषाढस्य प्रथमदिवसे आश्लिष्टसानुम् वप्रक्रीडा परिणतगजप्रेक्षणीयम् मेघम् ददर्श।

**अन्वयार्थः - तस्मिन्** - पूर्वोक्ते, **अद्रौ** - पर्वते रामगिरौ इति यावत्, **अबलाविप्रयुक्तः** - कान्तावियोगी, **कनकवलयभ्रंशरिक्तप्रकोष्ठः** - स्वर्णकटकपातशून्यकक्षान्तरः, **कामी** - कामुकः, **कतिचित्** - कतिपयान्, **मासान्** - त्रिंशद्दिवससमूहात्मकमासाभिधेयान्, अष्टौ मासानित्यर्थः, **नीत्वा** - व्यतीत्य, **आषाढस्य** - एतन्नामकस्य मासस्य, **प्रथमदिवसे** - आद्याह्नौ, **आश्लिष्टसानुम्** - समालिङ्गितश्रृङ्गम्, **वप्रक्रीडापरिणतगजप्रेक्षणीयम्** - उत्खातकेलिः, संलग्नतिर्यग्दन्तप्रहारहस्तिविलोकनीयम्। **मेघम्** - वारिदम्, **ददर्श** - अवलोकयामास।

**भावार्थः** - वल्लभावियुक्तः स कामुको यक्षः, अत्यन्तकार्श्यात् यस्य मणिबन्धतः कनक-कटकोऽपि भ्रष्टः सः पूर्वोक्त-रामगिरौ अष्टौ मासान् व्यतीत्य आषाढस्य प्रारम्भ एव दिने पर्वतश्रृङ्गसंलग्नं, यस्यां क्रीडायां हस्तिनः तिर्यग्भूय दन्तैः उच्चस्थानेषु प्रहारं कुर्वन्ति (मृतिकादिकमुत्खनन्ति) तस्यां क्रीडायां संलग्नं दर्शनीयं हस्तिनमिव मेघं ददर्श।

**समासः** - अबलाविप्रयुक्तः - अबलया विप्रयुक्तः अबलाविप्रयुक्तः (तृतीयातत्पुरुषः), कनकस्य वलयः कनकवलयः (षष्ठीतत्पुरुषः) तस्य भ्रंशेन रिक्तप्रकोष्ठो यस्य स कनकवलयभ्रंशरिक्तप्रकोष्ठः (बहुव्रीहि), वप्रक्रीडासु परिणतः - वप्रक्रीडापरिणतः (सप्तमीतत्पुरुषः), स चासौ गजश्च इति वप्रक्रीडापरिणतगजः (कर्मधारयः), तद्वत् प्रेक्षणीयम् वप्रक्रीडापरिणतगजप्रेक्षणीयम् (उपमान कर्मधारयः)

**कोशः** - स्त्री योषिदबला इत्यमरः। कटकं वलयोऽस्त्रियाम् इत्यमरः। कक्षान्तरं प्रकोष्ठः स्यात् इति शाश्वतः। तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः इति हलायुधः। उत्खातकेलिः श्रृङ्गाद्यैर्वप्रक्रीडा निगद्यते इति शब्दार्णवः। अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः इत्यमरः। अभ्रं मेघो वारिवाहः इत्यमरः।

**अलङ्कारः** - लुप्तोपमा।

**तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-**
**रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।**
**मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः**
**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।। ३।।**

**पदच्छेदः** - कथम् + अपि - कथमपि। कौतुकाधानहेतोः + अन्तर्बाष्पाः + चिरं + अनुचरः - कौतुकाधानहेतोरन्तर्बाष्पश्चिरमनुचरो। सुखिनः + अपि + अन्यथावृत्तिः - सुखिनोऽप्यन्यथावृत्तिः। पुनः + दूरसंस्थे - पुनर्दूरसंस्थे।

**अन्वयः** - राजराजस्य अनुचरः अन्तर्बाष्पः (सन्) कौतुकाधानहेतोः तस्य पुरः कथमपि स्थित्वा चिरं दध्यौ। मेघालोके सुखिनः अपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे (सति) किं पुनः।

**अन्वयार्थः** - **राजराजस्य** - कुबेरस्य, **अनुचरः** - सेवकः स यक्ष इत्यर्थः, **अन्तर्बाष्पः** - निरुद्धाऽश्रुः (सन्); **कौतुकाधानहेतोः** - उत्कण्ठोत्पत्तिकारणस्य, **तस्य** - मेघस्य, **पुरः** - सम्मुखे, **कथमपि** - येन केनाऽपि प्रकारेण, बहुप्रयासानन्तरमिति भावः। **स्थित्वा** - आत्मानं स्थिरीकृत्य, **चिरं** - बहुसमयपर्यन्तम्, **दध्यौ** - ध्यानं कृतवान्, निजवल्लभां चिन्तयामासेति भावः। **मेघालोके** - जलदविलोकने, **सुखिनः अपि** - प्रियापार्श्वस्थस्यापि, **चेतः** - चित्तम्, **अन्यथावृत्तिः** - विचितप्राय इव **भवति** - जायते, **कण्ठाश्लेषप्रणयिनि** - गलाऽऽलिङ्गनाभिलाषिणि, **जने** - प्रियारूपे जने, **दूरसंस्थे** - असमीपस्थे (सति), **किं पुनः** - किं कथनीयम्।

**भावार्थः** - धनाधिपस्य सोऽनुचरः निजोत्कण्ठोत्पादकस्य जलदस्य सम्मुखं बहुप्रयासेन स्थित्वा निजवल्लभां बहुकालपर्यन्तं चिन्तयामास। यतो हि मेघसमालोकनेन प्रियासमीपस्थस्यापि जनस्य चित्तं विकृतं भवति, तस्य जनस्य पुनः का कथा यः खलु प्रियागलश्लेषाभिलाषी वर्तते अथ च दूरस्थोऽपीति।

**समासः** - राज्ञां राजा - राजराजः (षष्ठीतत्पुरुषः), तस्य - राजराजस्य, अन्तः स्तम्भितं बाष्पं यस्य स अन्तर्बाष्पः (मध्यमपदलोपी बहुव्रीहि), कौतुकस्य आधानम् - कौतुकाधानम् (षष्ठीतत्पुरुषः), कौतुकाधानस्य हेतुः तस्य कौतुकाधानहेतोः, मेघस्य आलोकः - मेघालोकः (षष्ठीतत्पुरुषः), अन्यथा वृत्तिर्यस्य सः अन्यथावृत्तिः (बहुव्रीहि), दूरे संस्था यस्य (बहुव्रीहि), सः दूरसंस्थः तस्मिन् दूरसंस्थे। कण्ठस्य आश्लेषः - कण्ठाश्लेषः (षष्ठीतत्पुरुषः), तस्य प्रणयी कण्ठाश्लेषप्रणयी (षष्ठीतत्पुरुषः), तस्मिन् कण्ठाश्लेषप्रणयिनि।

**कोशः** - राजराजो धनाधिपः इत्यमरः। अस्रु-नेत्राम्बुरोदनञ्चास्रमश्रु चेत्यमरः। कौतुकं चाभिलाषो स्युदुत्सवे नर्महर्षयोः इति विश्वः। कथमादि तथाप्यन्तं यत्न-गौरव-बाढयोः इत्युज्ज्वलः। चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः

इत्यमरः। आलोको दर्शनोद्योतौ इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः, अर्थापत्ति, संसृष्टि।

**प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**
**जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।**
**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्धाय तस्मै**
**प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।४।।**

**अन्वयः** - सः नभसि प्रत्यासन्ने (सति) दयिताजीवितालम्बनार्थी (सन्) जीमूतेन स्वकुशलमयीं प्रवृत्तिं हारयिष्यन् प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घायतस्मै प्रीतः (सन्) प्रीतप्रमुखवचनं स्वागतम् व्याजहार।

**अन्वयार्थः** - **सः** - यक्षः **नभसि** - श्रावणे मासि, **प्रत्यासन्ने** - बहुनिकटवर्तिनि (सति), **दयिताजीवितालम्बनार्थी** - प्रियाप्राणधारणाभिलाषी, (सन्) **जीमूतेन** - मेघेन, **स्वकुशलमयीं** - निजक्षेममुख्याम्; **प्रवृत्तिं** - वार्ताम्; **हारयिष्यन्** - वाहयिष्यन्, **प्रत्यग्रैः** - नवीनैः, **कुटजकुसुमैः** - वासकसुमनैः, **कल्पितार्घाय** - विहितानुष्ठानविधये, **तस्मै** - दूतत्वेन सम्प्रेष्यमानाय जीमूताय। **प्रीतः** - प्रह्रष्टः (सन्) **प्रीतिप्रमुखवचनम्** - स्नेहप्रधानोक्तिम्, यथास्यात्तथा, **स्वागतम्** - शुभागमनम्, **व्याजहार** - उवाच।

**भावार्थः** - ध्यानं विधाय सः यक्षः श्रावणे मासे समीपे आगते सति प्रियाया प्राणधारणाभिलाषया मेघेन निजकुशुलपूर्णां वार्ता प्रेषणकामः सन् नूतन-गिरिमल्लिकापुष्पैः तमर्चयित्वा प्रसन्नः सन् प्रेमपूर्णवाणिभिः तस्य स्वागतं चकार।

**समासः** - दयितायाः जीवितं - दयिताजीवितं (षष्ठीतत्पुरुषः), तस्य आलम्बनं (षष्ठीतत्पुरुषः) - तस्य अर्थी (षष्ठीतत्पुरुषः), दयिताजीवितालम्बनार्थी, कुटजस्य कुसुमम् - कुटजकुसुमम् (षष्ठीतत्पुरुषः), तैः, कल्पितः अर्घो यस्मै स कल्पितार्घः (बहुव्रीहि), तस्मै कल्पितार्घाय; प्रीतिप्रमुखानि वचनानि यस्मिन् यथा स्यात्तथा इति प्रीतिप्रमुखवचनम् (बहुव्रीहि)।

**कोशः** - नभाः श्रावणिकश्च सः, नभः खं श्रवणे नभा इत्यमरः। भावुकं भविकं भव्यं कुशल इत्यमरः। कुटजः शक्रो वासको गिरिमल्लिका इति हलायुधः। मूल्ये पूजाविधावर्घः इत्यमरः। मुत् प्रीतिः प्रमदो हर्षः इत्यमरः।

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः?**
**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः?**
**इत्यौत्सुक्यादपरिहणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।५।।**

**पदच्छेदः** - इति + औत्सुक्यात् + अपरिहणयन् - इत्यौत्सुक्यादपरिहणयन्। गुह्यकः + तं - गुह्यकस्तम्। प्रकृतिकृपणाः + चेतनाचेतनेषु - प्रकृतिकृपणाश्चेतनाचेतनेषु।

**अन्वयः** - धूमज्योतिः सलिलमरुतां सन्निपातः मेघः क्व? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे, हि कामार्ताः चेतनाऽचेतनेषु प्रकृतिकृपणाः।

**अन्वयार्थः** - **धूमज्योतिः सलिलमरुतां** - धूमतेजोवारिवायूनाम्, **सन्निपातः** - समूहः, **मेघः** - वारिदः, **क्व** - कुत्र, **पटुकरणैः** - कार्योपयुक्तेन्द्रियवद्भिः, **प्राणिभिः** - चेतनैः, **प्रापणीयाः** - वासनीयाः, **सन्देशार्थाः** - वाचिकाभिधेयाः, **क्व** - कुत्र, इति उभयोर्महदन्तरम्, **इति** - एवमन्तरम्, **औत्सुक्यात्** - इष्टार्थोद्युक्तत्वात्, **अपरिगणयन्** - अविवेचयन्, **गुह्यकः** - यक्षः, तं मेघम्, **ययाचे** - याचयामास। **हि** - यतः, **कामाऽऽर्ताः** - माराऽऽकुलाः, **चेतनाऽऽचेतनेषु** - सजीवनिर्जीवेषु, **प्रकृतिकृपणाः** - औत्सर्गिककदर्याः (भवन्ति)।

**भावार्थः** - धूमाग्निजलमरुतां समवायरूपोऽयमचेतनः जलदः कुत्र? कार्यसमर्थेन्द्रिययुक्तैश्चेतनैः वाहनीयाः सन्देशवचनाः कुत्र? इत्युभयोर्मध्ये महदन्तरं वर्तते, तथापि औत्सुक्यादेवमन्तरं यक्षः अविचारयन् 'मत्सन्देशं मत्प्रियापार्श्वं नय' इति ययाचे, अर्थान्तरन्यासेन तं द्रढयति यतो हि कामपीडिताः जनाः 'अयं चेतनः अयमचेतनः' इति विवेकशून्याः स्वभावेनैव भवन्ति।

**समासः** - धूमश्च ज्योतिश्च सलिलश्च मरुच्च - धूमज्योतिःसलिलमरुतः, तेषाम् (द्वन्द्व)। पटूनि करणानि येषां तैः - पटुकरणैः (बहुव्रीहि)। सन्देशा एव अर्थाः - सन्देशार्थाः (कर्मधारय)। कामेन आर्ताः - कामार्ताः (तृतीयातत्पुरुषः)। चेतनाश्च अचेतनाश्च, चेतनाऽचेतनाः (द्वन्द्व) तेषु।

**कोशः** - प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः इत्यमरः। करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि इत्यमरः। इष्टार्थोद्युक्त इत्यमरः। सलिलं कमलं जलम् इत्यमरः। यक्षराड्गुह्यकेश्वर इत्यमरः। कामः पञ्चशरः इत्यमरः।

**अलङ्कारः** - सङ्करालङ्कारः, विषम, अर्थान्तरन्यासः।

**जातं वंशे भुवनविदिते पुष्करावर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।। ६।।**

**पदच्छेदः** - तेन + अर्थित्वम् - तेनार्थित्वम्। विधिवशात् + दूरबन्धुः + गतः + अहं - विधिवशाद्दूरबन्धुर्गतोऽहम्। न + अधमे - नाधमे।

**अन्वयः** - त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातं कामरूपं मघोनः प्रकृतिपुरुषं जानामि तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः। अधिगुणे मोघा याच्ञा वरम्, अधमे लब्धकामा अपि न (वरम्)।

**अन्वयार्थः** - (हे मेघ!) **त्वाम्** - भवन्तम्, **भुवनविदिते** - लेक-विख्याते, **पुष्करावर्तकानां** - पुष्करावर्तकाऽख्यानां मेघानां, **वंशे** - कुले, **जातम्** - उत्पन्नम्, **कामरूपं** - यथेच्छविग्रहम्, **मघोनः** - इन्द्रस्य, **प्रकृतिपुरुषम्** - प्रधानपुरुषम्, **जानामि** - वेद्मि। **तेन** - उच्चकुलोत्पन्नो भवानतः, **विधिवशात्** - दैवदुर्विपाकात्, **दूरबन्धुः** - वियुक्तप्रियः, **अहं** - यक्षः, **त्वयि** - भवति, भवत्समीपे इत्यर्थः, **अर्थित्वम्** - याचकत्वम्, **गतः** - प्राप्तः। **अधिगुणे** - गुणशालिनि पुरुषे, **याच्ञा** - याचना, **मोघा अपि** - व्यर्था अपि, **वरम्** - श्रेष्ठा, **अधमे** - गुणरहिते पुरुषे, **लब्धकामा अपि** - पूर्णमनोरथा अपि (याच्ञा) न (वरम्) इति।

**भावार्थः** - हे जलद! भुवनविख्याते, पुष्करावर्तकाभिधेयानां मेघानां वंशे उत्पन्नं यथेच्छविग्रहधारिणमिन्द्रस्य प्रधानपुरुषं भवन्तमहं जानामि, अत एव दैवदुर्विपाकात् प्रियायाः दूरस्थोऽहं भवत्सकाशं याचकत्वेनागतः। भवादृशे गुणशालिपुरुषे निष्फला अपि याचना श्रेष्ठा भवति, अधमे पुरुषे पूर्णाभिलाषा अपि न श्रेष्ठा भवति।

**समासः** - भुवनेषु विदित इति भुवनविदितः (सप्तमीतत्पुरुषः), तस्मिन्, पुष्कराश्च आवर्तकाश्च इति पुष्करावर्तकाः (द्वन्द्व) इति मल्लिनाथमतानुसारम् अन्ये तु एतन्नामकैक एव मेघः। प्रकृतिषु पुरुषः प्रकृतिपुरुषः (सप्तमीतत्पुरुषः), तम्। कामकृतानि रूपाणि यस्य तम्। (मध्यमपदलोपी बहुव्रीहिः)। दूरे बन्धुर्यस्य स (बहुव्रीहि)। लब्धः कामः यया सा लब्धकामा (बहुव्रीहि)।

**कोशः** - जगती लोको विष्टपं भुवनं जगत् इत्यमरः। पुष्करं करिशुण्डाग्रे वाद्यभाण्डमुखे जले इत्यमरः। इन्द्रो मरुत्वान् मघवा इत्यमरः। प्रकृतिर्गुण - साम्ये स्यादमात्यादिस्वभावयोः इति मेदिनी। दैवं दिष्टं भागधेय भाग्यस्त्री नियतिर्विधिः इत्यमरः। सगोत्र - बान्दवज्ञाति बन्धु स्व-स्वजनाः समाः इत्यमरः। बनीयको याचनको मार्गणो याचकार्थिनौ इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यास।

**सन्तप्तानां त्वमसि शरणं तत्पयोद! प्रियायाः**
**सदेशं मे हर धनपतिक्रोधविश्लेषितस्य।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम्**
**बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या।। ७।।**

**पदच्छेदः** - त्वं + असि - त्वमसि। वसतिः + अलका - वसतिरलका।

**अन्वयः** - हे पयोद! त्वं सन्तप्तानां शरणम् असि, तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियाय हर। बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम यक्षेश्वराणां वसतिः ते गन्तव्या।

**अन्वयार्थः - हे पयोद!** - हे जलद! **त्वम् सन्तप्तानाम्** - आतपेन विरहेण वा पीडितानाम्, **शरणं** - रक्षकः, **असि** - वर्तसे, आतपपीडितं जलदानेन, विरहपीडितं स्वस्थान-प्रेरणया वा रक्ष्यसे इति भावः। **तत्** - तस्माद्धेतोः, रक्षकत्वादिति भावः। **धनपतिक्रोधविश्लेषितस्य** - कुबेरकोपवियुक्तस्य, **मे** - मम यक्षस्य, **सन्देशम्** - वार्ता, **प्रियायाः** - प्रेयस्याः, पार्श्वम् इति शेषः। **हर** - नय। सा मत्प्रिया, कुत्र वर्तते, तस्य स्थानस्य किन्नामेतिजिज्ञासायामाह। **बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या - बाह्योद्याने** - बहिरारामे, **स्थितस्य** - वर्तमानस्य, **हरस्य** - शम्भोः, **शिरसि**

- मस्तके या **चन्द्रिका** - ज्योत्स्ना, तथा **धौतहर्म्या** - प्रक्षालिताट्टालिका अलका, **नाम** - एतन्नामिका **यक्षेश्वराणाम्** - गुह्यकाधिपतीनाम्, **वसतिः** - स्थानम्, **ते** - मेघस्य, **गन्तव्या** - यातव्या।

**भावार्थः** - हे मेघ! धर्मपीडितानां विरहसन्तप्तानां वा त्वं रक्षकोऽसि, अतः कुबेरकोपवियुक्तस्य मे यक्षस्य सन्देशं मत्प्रियायाः पार्श्वं प्रापय। यत्र मे प्रिया वसति तत्स्थानं कथयामि तथाहि यस्याः नगर्याः हर्म्यानि नगरबहिरारामस्थशिवशिरश्चन्द्रमसः कान्तिभिः सततं प्रक्षाल्यन्ते, सा अलका नाम्नी कुबेरस्य निवासभूमिरेव त्वया गन्तव्या। तत्रैव मत्प्रिया वर्तते इति भावः।

**समासः** - धनपतेः क्रोधः - धनपतिक्रोधः (षष्ठीतत्पुरुषः) तेन विश्लेषितः तस्य (तृतीयातत्पुरुषः), धनपतिक्रोधविश्लेषितस्य, बाह्यञ्च तदुद्यानं - बाह्योद्यानम् (प्रथमातत्पुरुषः), स्थितश्चासौ हर - स्थितहरः (कर्मधारयः), बाह्योद्याने स्थितहरः - बाह्योद्यानस्थितहरः (सप्तमीतत्पुरुषः), तस्य शिरः (षष्ठीतत्पुरुषः), तस्मिन् या चन्द्रिका (सप्तमीतत्पुरुषः), तया धौतानि हरम्याणि यत्र सा (बहुव्रीहि)।

**कोशः** - सन्तापः सञ्ज्वरः समौ इत्यमरः। शरणं गृहरक्षित्रोः इत्यमरः। चन्द्रिका कौमुदी ज्योत्स्ना इत्यमरः। सन्देशवाग् वाचिकं स्यात् इत्यमरः। हर्म्यादि धनिनां वासः इत्यमरः। नाम प्रकाश्य सम्भाव्य क्रोधोपगमकुत्सने इत्यमरः।

**त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः।**
**कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां**
**न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः।। ८।।**

**पदच्छेदः** - त्वां + आरूढं - त्वामारूढम्। त्वयि + उपेक्षेत - त्वय्युपेक्षेत। स्यात् + अन्यः + अपि + अहं + इव - स्यादन्यऽप्यहमिव।

**अन्वयः** - पवनपदवीम् आरूढम् त्वाम् पथिकवनिताः प्रत्ययात् आश्वसन्त्यः उद्गृहीतालकान्ताः प्रेक्षिष्यन्ते। त्वयि संनद्धे (सति) अहम् इव यो जनः पराधीनवृत्तिः न स्यात् कः अन्यः अपि विरहविधुराम् जायाम् उपेक्षेत।

**अन्वयार्थः** - **पवनपदवीम्** - वायुमार्गम्। **आरूढम्** - प्राप्तम्, **त्वाम्** - भवन्तं, **पथिकवनिताः** - पान्थप्रियाः प्रोषितभर्तृका इत्यर्थः, **प्रत्ययात्** - विश्वासात्, **आश्वसन्त्यः** - प्राप्तविश्वासाः, **उद्गृहीतालकान्ताः** - उद्धृतकेशप्रान्ताः (सत्यः), **प्रेक्षिष्यन्ते** - विलोकयिष्यन्ति। **त्वयि** - जलदे, **संनद्धे** - वृष्टये समुद्यते, **अहमिव** - मत्समानः, **यः जनः** - यो नरः, **पराधीनवृत्तिः** - पराधिकृतजीवनः, **न स्यात्** - न भवेत् **कः** - प्रियाविलासानभिज्ञः, **अन्योऽपि** - अपरोऽपि, **विरहविधुराम्** - विप्रलम्भव्यग्राम्, **जायाम्** - प्रियाम्; **उपेक्षेत** - उपेक्षां कुर्यात्।

**भावार्थः** - आकाशे विद्यमानं त्वां प्रोषितभर्तृकाः नार्यः विश्वासात् आश्वसन्त्यः सत्यः केशाग्रभागमुन्नमय्य अवलोकयिष्यन्ति। वर्षणाय समुद्यते त्वयि आगते को जन ईदृग् स्यात् यः खलु मत्सदृशः पराधीनजीवनः न स्यात् विरहव्याकुलायाः प्रियायाः उपेक्षां कुर्यात्। न कोऽपि कुर्यादिति भावः।

**समासः** - पवनस्य पदवी - पवनपदवी ताम् (षष्ठीतत्पुरुषः)। उद्गृहीताः अलकानामन्ताः याभिस्ताः - उद्गृहीतालकान्ताः (बहुव्रीहि)। पथिकानां वनिताः पथिकवनिताः (षष्ठीतत्पुरुषः)। विरहेण विधुरा - विरहविधुरा (तृतीयातत्पुरुषः) विगताः धूः यस्याः सा विधुरा (बहुव्रीहि)। परस्मिन्नधीना वृत्तिर्यस्य स पराधीनवृत्तिः (बहुव्रीहि)।

**कोशः** - पन्थानः पदवी सृतिः इत्यमरः। प्रत्ययोऽधीनशपशज्ञानविश्वासहेतुषु इत्यमरः। अलकाश्चूर्णकुन्तलाः इत्यमरः। परतन्त्रः पराधीनः परवान्नाथवानपि इत्यमरः। विधुरं तु प्रविश्लेषे इत्यमरः। वृत्तिर्वर्तनं जीवने इत्यमरः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**
**गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।। ९।।**

**पदच्छेदः** - पवनः + च + अनुकूल - पवनश्चानुकूलः। वामः + च + अयं - वामश्चायम्। चातकः + ते - चातकस्ते। गर्भाधानक्षणपरिचयात् + नूनं + आबद्धमालाः - गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः।

**अन्वयः** - अनुकूलः पवनो मन्दं यथा त्वां मन्दं नुदति। अयं सगन्धः ते वामः चातको मधुरं नदति। गर्भाधानक्षणपरिचयात् आबद्धमालाः बलाकाः खे नयनसुभगं भवन्तं नूनं सेविष्यन्ते।

**अन्वयार्थः** - **अनुकूलः** - अनुगुणः, **पवनः** - वायुः **मन्दं यथा** - स्थिरमिव, **त्वाम्** - भवन्तं, **मन्दं** - शनैः शनैः यथा स्यात्तथा, **नुदति** - चोदयति। **अयं** - पार्श्वस्थः, **सगन्धः** - सगर्वः, **ते** - भवत; **वामः** - अपसव्यभागे (सुन्दरो वा) **चातकः** - पक्षिविशेषः, **मधुरं** - मनोरमं यथा स्यात्तथा **नदति** - वक्ति। **गर्भाधानक्षणपरिचयात्** - रतिसमयजातसंस्तवात्, **आबद्धमालाः** - रचितपङ्क्तयः, **बलाकाः** - बकप्रियाः, **खे** - गगने, **नयनसुभगम्** - दर्शनप्रियम्, **भवन्तम्** - मेघम्, **नूनम्** - अवश्यं, **सेविष्यन्ते** - समुपचारयिष्यन्ति। यात्राकाले पवनानुकूल्यं चातकध्वनिः बलाकादर्शनं शुभसूचकमिति वदन्ति दैवज्ञाः।

**भावार्थः** - हे पयोद! तव यात्रासमये इमानि शुभसूचकानि शकुनान्यपि दृश्यन्ते। यथा त्वदनुरूप एवं मन्दगतिर्वायुः शनैः शनैस्त्वां प्रेरयति एवञ्च त्वद्वामभागे सुन्दरश्चातकः कर्णप्रियं शब्दङ्करोति। अन्यदपि वर्तते शकुनम्। यथा संभोगसमये भवता सह परिचयजननात् बद्धपङ्क्तयः बकाङ्गनाः नयनसुभगं भवन्तमवश्यमेव सेविष्यन्ते।

**समासः** - गन्धने सहतिः - सगन्धः (तृतीयाबहुव्रीहि)। गर्भस्य आधानं गर्भाधानम् (षष्ठीतत्पुरुषः), तदेव क्षणः - गर्भाधानक्षणः (रूपकसमासः) तस्मिन् परिचयः - गर्भाधानक्षणपरिचयः (सप्तमीतत्पुरुषः) तस्मात्। आबद्धा माला याभिस्ताः आबद्धमालाः (बहुव्रीहि)।

**कोशः** - यथा सादृश्ययोग्यत्वं वीप्सा स्वार्थानतिक्रमे इति यादवः। गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः इति विश्वः। वामस्तु वक्रे रम्ये स्यात् सव्ये वामगतेऽपि च इति शब्दार्णवः। सारङ्गाः स्तोश्चातकः समाः इत्यमरः। गर्भोपकारके ह्यग्नौ मुखे पनस-कष्टके। कुक्षौ कुक्षिस्थजन्तौ च इति यादवः। क्षण उद्धर्षो मह उद्धव उत्सवः इत्यमरः। संस्तवः स्यात्परिचयः इत्यमरः। बलाका विसकण्ठिका इत्यमरः। लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणीं दृग्दृष्टी इत्यमरः।

**तां चावश्यं दिवसगणनातत्परामेकपत्नी-**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।**
**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि।। १०।।**

**पदच्छेदः** - च + अवश्यं - चावश्यम्। दिवसगणनातत्परां + एकपत्नीं + अव्यापन्नां + अविहतगतिः + द्रक्ष्यसि - दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसि। हि + अङ्गनानां - ह्यङ्गनानाम्।

**अन्वयः** - (हे मेघ) दिवसगणनातत्पराम् अव्यापन्नाम् एकपत्नीम् भ्रातृजायाम् ताम् अविहतगतिः (त्वम्) अवश्यं द्रक्ष्यसि। आशाबन्धः प्रणयिकुसुमसदृशम् विप्रयोगे सद्यः पाति अङ्गनानां हृदयं प्रायशो रुणद्धि।

**अन्वयार्थः** - हे मेघ! **दिवसगणनातत्पराम्** - अवशिष्टदिनसंख्यानाऽसक्ताम्, **अव्यापन्नाम्** - जीविताम् (अनेन स न मृता इति द्रढयति यक्षः) **एकपत्नीम्** - पतिव्रताम्, **भ्रातृजायाम्** - बन्धुप्रियाम्, **ताम्** - मत्प्रियाम्, **अविहतगतिः** - अव्याहतगमनः (सन् त्वम्) **अवश्यम्** - नूनम्, **द्रक्ष्यसि** - अवलोकयिष्यसि। **आशाबन्धः** - तृष्णाबन्धनम्, **प्रणयि** - प्रेमपूर्णम्, **कुसुमसदृशम्** - पुष्पतुल्यम्। **विप्रयोगे** - विरहे। सद्यः **पाति** - तत्क्षणविनाशशीलम्, **अङ्गनानाम्** - वधूनाम्, **हृदयम्** - जीवनम्, **प्रायशः** - प्रायेण, **रुणद्धि** - प्रतिबध्नाति।

**भावार्थः** - हे मेघ विरहाविष्टदिवसगणनासंलग्नाम्, प्रियागमनाशयाप्राणा-न्धारयन्तीमपासुलां मत्प्रियामविरुद्धगतिस्त्वमवश्यं विलोकयिष्यसि। आशारूपं बन्धनं प्रेमपूर्णं कुसुमतुल्यमृदु प्रेमास्पदविरहे सद्योविनाशशालि बन्धूनां जीवितं प्रायशः रुणद्धि।

**समासः** - दिवसानां गणना - दिवसगणना (षष्ठीतत्पुरुषः) तस्या तत्परा - दिवसगणनातत्परा (सप्तमीतत्पुरुषः) ताम्। भ्रातुः जायाम् भ्रातृजायाम् (षष्ठीतत्पुरुषः)। आशा एव बन्धः - आशाबन्धः (कर्मधारयः)। कुसुमैः सदृशं - कुसुमसदृशम् (तृतीयातत्पुरुषः)।

**कोशः** - तत्परे प्रसितासक्तौ इत्यमरः। आशादिगति तृष्णयोः इति यादवः। आशाबन्धः समाश्वासे तथा मर्कटवासके इति मेदिनी। विप्रलम्भो विप्रयोगः इत्यमरः। हृदयं जीविते चित्ते वृक्षस्याकृतहृद्ययोः इति शब्दार्णवः।

**कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां**
**तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।**
**आकैलासाद्बिसकिसलयच्छेदपाथेयवन्तः**
**सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः।। ११।।**

**पदच्छेदः** - यत् + च - यच्च। मही + उच्छिलीन्ध्राम् + अवन्ध्यां - महीमुच्छिलिन्ध्रामवन्ध्याम्। तत् + श्रुत्वा - तच्छ्रुत्वा।

**अन्वयाः** - यत् महीम् उच्छिलीन्ध्राम् अवन्ध्यां च कर्तुं प्रभवति तत् श्रवणसुभगं ते गर्जितं श्रुत्वा मानसोत्काः विसकिसलयच्छेदपाथेयवन्तः राजहंसाः नभसि आकैलासात् भवतः सहाया सम्पत्स्यन्ते।

**अन्वयार्थः** - **यत्** - गर्जितं, **महीम्** - पृथ्वीम्, **उच्छिलीन्ध्राम्** - उद्गतकन्दलीम्, **अवन्ध्याम्** - उर्वराम्, **कर्तुं** - रचयितुम्, **प्रभवति** - शक्नोति। **तत्** - तथाभूतम्, (लोकानाम्) **श्रवणसुभगम्** - कर्णपेयम्, **ते** - तव मेघस्येति भावः। **गर्जितं** - निर्घोषम्, **श्रुत्वा** - आकर्ण्य, **मानसोत्काः** - मानसरोवरं गन्तुमुन्मनाः, **बिसकिसलयच्छेदपाथेयवन्तः** - मृणालाग्रभागशकलसम्बलवन्तः, **राजहंसाः** - श्रेष्ठहंसाः, **नभसि** - आकाशे, **आकैलासात्** - कैलासं यावत्, **भवतः** - मेघस्य, **सहायाः** - सहगामिनः, **संपत्स्यन्ते** - भविष्यन्ति।

**भावार्थः** - हे जलद! लोकानां श्रोत्रानन्ददं यद्भवदीयगर्जनं महीं कन्दलिकायुक्तां सफलां च सम्पादयति तदाकर्ण्य मानसरोवरं गन्तुमुत्कण्ठिताः मृणालाग्रभागं मार्गभक्ष्यत्वेन गृहीताः राजहंसाः कैलासपर्वतपर्यन्तं भवतः सहगामिनो भविष्यन्ति।

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।**
**काले काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्।। १२।।**

**पदच्छेदः** - तुङ्गं + आलिङ्ग्य - तुङ्गमालिङ्ग्य। रघुपतिपदैः + अङ्कितं - रघुपतिपदैरङ्कितम्। संयोगं + एत्य - संयोगमेत्य। स्नेहव्यक्तिः + चिरविरहजं - स्नेहव्यक्तिश्चिरविरहजम्।

**अन्वयः** - पुंसां वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितम् तुङ्गम् प्रियसखम् अमुम् शैलम् आलिङ्ग्य आपृच्छस्व। काले काले भवतः संयोगम् एत्य चिरविरहजम् उष्णम् बाष्पम् मुञ्चतः यस्य स्नेहव्यक्तिः भवति।

**अन्वयार्थः** - **पुंसाम्** - मानवानाम्, **वन्द्यैः** - पूज्यैः, **रघुपतिपदैः** - रामचन्द्रचरणैः, **मेखलासु** - कटिप्रदेशेषु, **अङ्कितम्** - चिह्नितम्, **तुङ्गम्** - अत्युच्चम्, **प्रियसखम्** - मित्रवर्यम्, **अमुम्** - सम्मुखस्थम् रामिगिरिम्, **शैलम्** - पर्वतम्, **आलिङ्ग्य** - आश्लिष्य, **आपृच्छस्व** - सभाजयस्व। **काले काले** - समये समये, **भवतः** - मेघस्य, **संयोगम्** - सान्निध्यम्; **एत्य** - प्राप्य, **चिरविरहजम्** - दीर्घकालिकविरहजन्यम्, **उष्णम्** - तप्तम्, **बाष्पम्** - अश्रु, **मुञ्चतः** - त्यजतः, **यस्य** - रामगिरेः, **स्नेहव्यक्तिः** - प्रेमप्राकट्यं, **भवति** - विद्यते।

**भावार्थः** - हे मेघ! मानवाराध्यैः रामचन्द्रचरणविन्यासैः मेखलासु चिह्नितमेनं प्रियमित्रमत्युन्नतं रामगिरिमाश्लिष्य ततः अनुमितिं गृहाण। तव संयोगं प्राप्य समये समये यस्य गिरेः चिरवियोगोत्पन्नाश्रुभिः स्नेहाभिव्यक्तिः भवति।

**समासः** - रघूणां पतिः - रघुपतिः (षष्ठीतत्पुरुषः) तस्य पदानि - रघुपतिपदम् (षष्ठीतत्पुरुषः), तैः। प्रियश्चासौ सखा - प्रियसखः, तम् (कर्मधारयः)। चिरं विरहः चिरविरहः, चिरविरहात् जातः तं - चिरविरहजम् (उपपदम्)। स्नेहस्य व्यक्तिः स्नेहव्यक्तिः (षष्ठीतत्पुरुषः)।

**कोशः** - मेखला स्रङ्गकन्धेस्यात्काञ्चीशैलनितम्बयोः इति मेदिनी। मेखला श्रोणिस्थानेऽद्रि कटके कटिबन्धने इति यादवः। आमन्त्रणसभाजने आप्रच्छन्नम् इत्यमरः। उष्ण उष्मागमस्तपः इत्यमरः। बाष्पं नेत्रजलोष्मणः विश्वः।

**मार्गं तावच्छृणु कथयतस्त्वत् प्रयाणानुरूपं**
**सन्देशं मे तदनुजलद! श्रोष्यसि श्रोत्रपेयम्।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य।। १३।।**

**पदच्छेदः** - तावत् + श्रृणु - तावच्छृणु। च + उपभुज्य - चोपभुज्य।

**अन्वयः** - हे जलद! तावत् कथयतः त्वत् प्रयाणानुरूपं मार्गं श्रृणु, तदनु श्रोत्रपेयं मे सन्देशं श्रोष्यसि। यत्र खिन्नः खिन्नः शिखरिषु पदं न्यस्य क्षीणः क्षीणः (सन्) स्रोतसां परिलघु पयश्च उपभुज्य गन्तासि।

**अन्वयार्थः** - **हे जलद** - हे मेघ, **तावत्** - प्रथमम्, **कथयतः** - वदतः, **त्वत्प्रयाणानुरूपम्** - भवदीययात्रानुकूलम्, **मार्गम्** - अध्वानम्, **श्रृणु** - आकर्णय, **तदनु** - पश्चात्, **श्रोत्रपेयम्** - कर्णप्रियम्, **मे** - यक्षस्य, **सन्देशम्** - वार्ताम्, **श्रोष्यसि**

- श्रवणङ्करिष्यसि। **यत्र** - मार्गे, **खिन्न खिन्नः** - वारं वारं **क्षीणः** - शक्तिभूय **शिखरिषु** - गिरिषु, **पदं** - पादम्, **न्यस्य** - स्थाप्य, **शक्तिसञ्चयार्थं** - पर्वतेषु विश्रम्येत्यर्थः, **क्षीणः क्षीणः** - भूयानल्पशरीरः, सन् **स्रोतसां** - पर्वतनदीप्रवाहाणाम्, **परिलघु** - गौरवदोषहीनम्, **पयश्च** - जलश्च, **उपभुज्य** - पीत्वा, **गन्तासि** - यास्यसि।

**भावार्थः** - हे मेघ! प्रथमं मत्तः, निजयात्रानुकूलं मार्गं श्रृणु तदनन्तरं कर्णप्रियं मत्सन्देशं श्रोष्यसि। यत्र मार्गे त्वं वारं वारं यात्राऽऽप्यासेन परिश्रान्तः सन् पर्वतेषु विश्रम्य तनुकायः (सन्) पर्वतीयनदीप्रवाहाणां जलमुपभुज्य यास्यसि।

**समासः** - जलं ददाति इति जलदः तत् सम्बुद्धौ हे जलद! तव प्रयाणस्त्वत्प्रयाणः (षष्ठीतत्पुरुषः), त्वत्प्रयाणस्यानुरूपम् त्वत्प्रयाणानुरूपम् (षष्ठीतत्पुरुषः)। श्रोत्राभ्यां पेयम् - श्रोत्रपेयम् (तृतीयातत्पुरुषः)।

**कोशः** - अयनं वर्त्म मार्गध्वः पन्थानः पदवी सृतिः, इत्यमरः। सन्देशवाग्वाचिकं स्यात् इत्यमरः। पयः क्षीरं पयोऽम्बु च इत्यमरः।

**अद्रेः श्रृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-**
**दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।**
**स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं**
**दिङ्नागानां पथि परिहरत् स्थूलहस्तावलेपान्।। १४।।**

**पदच्छेदः** - किंस्वित् + उन्मुखीभिः + दृष्टोत्साहः + चकित चकितं - किंस्विदित्यु-न्मुखीभिर्दृष्टोत्साहश्चकितचकितम्। स्थानात् + अस्मात् - स्थानादस्मात्। सरसनिचुलात् + उत्पत + उदङ्मुखः - सरसनिचुलादुत्पतोदङ्गमुखः।

**अन्वयः** - अद्रेः श्रृङ्गं पवनः हरति किंस्वित् इति उन्मुखीभिः मुग्धसिद्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः सरसनिचुलात् अस्मात् स्थानात् पथि दिङ्नागानां स्थूलहस्तावलेपान् परिहरन् उदङ्मुखः खम् उत्पत।

**अन्वयार्थः** - **अद्रेः** - पर्वतस्य, **श्रृङ्गम्** - सानुम्, **पवनः** - वायुः, **हरति किंस्वित्** - कर्षति किम्, **इति** - एतादृश्याशंकयेति यावत्, **उन्मुखीभिः** - उन्नतास्याभिः, **मुग्धसिद्धाङ्गनाभिः** - मूढसिद्धवधूभिः, **चकितचकितम्** - आश्चर्यसहितं यथा स्यात्तथा, **दृष्टोत्साहः** - प्रदर्शितोद्योगः, (सन्), **सरसनिचुलात्** - आर्द्रभूमिवेतसात्, **अस्मात्** - पुरोदृश्यमानात्, **स्थानात्** - आश्रमात्, **पथि** - अध्वनि, आकाशे इति भावः। **दिङ्नागानां** - दिग्गजानाम्, **स्थूलहस्तावलेपान्** - विशालशुण्डप्रहारान्, **परिहरन्** - परित्यजन्, **उदङ्मुखः** - उत्तराभिवदनः, (सन्)। **खम्** - आकाशम्, **उत्पत** - उद्गच्छ।

**भावार्थः** - हे मेघ! अत्यधिकवेगेन गच्छतः भवत उद्योगमवलोक्य 'पवनः पर्वतश्रृङ्गं हरति किम्'? इत्याशङ्कया मूढाः सिद्धप्रियाः आश्चर्यान्विताः भविष्यन्ति। तत आर्द्रस्थलवेतसात् पुरोदृश्यमानादस्मात् स्थानादाकाशमार्गं अन्तरायाणां दिग्गजानां पीवरशुण्डप्रहारान् परित्यजनलकागमनार्थमुत्तराभिमुखीभूय गगनुमुत्पत।

**समासः** - उन्मुखीभिः - उन्नतं मुखं यासां ताः उन्मुखाः ताभिः (बहुव्रीहि)। मुग्धसिद्धाङ्गनाभिः - सिद्धानाम् अङ्गनाः सिद्धाङ्गनाः (षष्ठीतत्पुरुषः), मुग्धाश्च ताः सिद्धाङ्गना मुग्धसिद्धाङ्गनाः (कर्मधारयः) ताभिः। दृष्टोत्साहः - दृष्ट उत्साहो यस्य स दृष्टोत्साहः (बहुव्रीहि)। सरसनिचुलात् - सरसा निचुला यस्मिंस्तत् सरसनिचुलम् (बहुव्रीहि) तस्मात्। दिङ्नागानां - दिशां नागाः - दिङ्गनागाः (षष्ठीतत्पुरुषः) तेषाम्। स्थूलहस्तावलेपान् - स्थूलाश्च ते हस्ताः - स्थूलहस्तावलेपान् (षष्ठीतत्पुरुषः)। उदङ्मुखः - उदक् मुखं यस्य स उदङ्मुखः (बहुव्रीहि)।

**कोशः** - कूटोऽस्त्री शिखरं श्रृङ्गम् इत्यमरः। वानीरे कविभेदे स्यान्निचुलः स्थलवेतसे शब्दार्णवः। मदङ्गजो गजो नागः कुञ्जरो वारणः करी इत्यमरः।

**रत्नच्छायाऽऽव्यतिकर इव प्रेक्ष्यमेतत् पुरस्तात्**
**वल्मीकाग्रात्प्रभवति धनुष्खण्डमाखण्डलस्य।**
**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**
**बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः।। १५।।**

**पदच्छेदः** - रत्नच्छाया + आव्यतिकरः - रत्नच्छायाऽऽव्यतिकरः। प्रेक्ष्यं + एतत् - प्रेक्ष्यमेतत्। वपुः + अतितरां - अपरतितराम्। बर्हेण + इव - बर्हेणेव।

**अन्वयः** - रत्नच्छायाऽऽव्यतिकर इव प्रेक्ष्यम् आखण्डलस्य एतत् धनुष्खण्डम् पुरस्तात् वल्मीकाऽग्रात् प्रभवति। येन

ते श्यामं वपुः स्फुरितरुचिना बर्हेण गोपवेषस्य विष्णोः (श्यामं वपुः) इव अतितरां कान्तिम् आपत्स्यते।

**अन्वयार्थः** - (हे मेघ) **रत्नच्छायाऽऽव्यतिकर इव** - पद्मरागादिमणिप्रभासम्मिश्रणमिव, **प्रेक्ष्यम्** - दृश्यम्, **आखण्डलस्य** - इन्द्रस्य, **एतत्** - पुरोवर्ति, **धनुष्खण्डम्** - चापशकलम्, **पुरस्तात्** - अग्रतः, **वल्मीकाग्रात्** - नाकुविवरात्, **प्रभवति** - उद्गच्छति। **येन** - चापशकलेन, **ते** - तव - मेघस्येत्यर्थः, **श्यामम्** - कृष्णवर्णम्, **वपुः** - शरीरम्, **स्फुरितरुचिना** - धवलकान्तिना, **बर्हेण** - पिच्छेन, **गोपवेषस्य** - ग्वालवेषस्य, **विष्णोः** - हरेः - कृष्णस्येति यावत्, **इव** - यथा, **अतितराम्** - सातिशयम्, **कान्तिम्** - श्रियम्, **आपत्स्यते** - प्राप्स्यते।

**भावार्थः** - (हे मेघ!) पद्मरागादि मणीनां संमिश्रणमिव सुन्दरमेतदिन्द्रधनुः पुरस्तात् वल्मीकविवरादाविर्भवति, येन धवलकान्तिसंवलितेन, मयूरपिच्छेन गोपवेषस्य कृष्णस्येव तावकीनमपि श्यामं शरीरं सातिशयं शोभासम्पन्नं भविष्यति।

**समासः** - रत्नानां छाया - रत्नच्छायम् (षष्ठीतत्पुरुषः), आसमन्तात् व्यतिकरः आव्यतिकरः (उपपदसमासः) रत्नच्छायस्य आव्यतिकरः - रत्नच्छायाऽऽव्यतिकरः (षष्ठीतत्पुरुषः)। वल्मीकस्य अग्रम् - वल्मीकाग्रम् (षष्ठीतत्पुरुषः) तस्मात्। धनुषः खण्डम् - धनुष्खण्डम् (षष्ठीतत्पुरुषः)। गोपानां वेषः - गोपवेषः (षष्ठीतत्पुरुषः) तस्य।

**कोशः** - रत्नं मणिः द्वयोरश्मजातौ मुक्तादिकेऽपि च, इत्यमरः। आखण्डलः सहस्राक्ष इत्यमरः। कृष्णे नीलाऽसितश्यामकालश्यामलमेचकाः इत्यमरः। पिच्छ बर्हे नपुंसक, इत्यमरः। छाया सूर्यप्रिया कान्तिः इत्यमरः।

**अलङ्कारः** - संसृष्टि।

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।**
**सद्यः सोरोत्कषणसुरभि क्षेत्रमारुह्य मालं**
**किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण।। १६।।**

**पदच्छेदः** - त्वयि + आयत्तम् - त्वय्यायत्तम्। प्रीतिस्निग्धैः + जनपदवधूलोचनैः - प्रीतिस्निग्धैर्जनपदवधूलोचनैः। क्षेत्रं + आरुह्य - क्षेत्रमारुह्य। लघुगतिः + भूय - लघुगतिर्भूयः।

**अन्वयः** - कृषिफलं त्वयि आयत्तम् भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैः जनपदवधूलोचनैः पीयमानः सीरोत्कषणसुरभि मालं क्षेत्रं सद्यः आरुह्य किञ्चित् पश्चात् भूयः लघुगतिः (सन्) उत्तरेण एव व्रज।

**अन्वयार्थः** - **कृषिफलम्** - सस्यादिकम्, **त्वयि** - मेघे, **आयत्तम्** - अधीनम्, **भ्रूविलासानभिज्ञैः** - कटाक्षवृत्त्यपरिचितैः, **प्रीतिस्निग्धैः** - स्नेहस्नपितैः। **जनपदवधूलोचनैः** - नीबृर्महिलानयनैः, **पीयमानः** - सादरमीक्षमाणः **सीरोत्कषणसुरभि** - लाङ्गलविदारेण घ्राणतर्पण (यथा स्यात्तथा) **मालम्** - मालनामानम्, **क्षेत्रम्** - केदारम्, **सद्यः** - तत्क्षणम्, **आरुह्य** - आरोहणं विधाय, **किञ्चित्पश्चात्** - कियत्क्षणानन्तरन्, **भूयः** - पुनः, **लघुगतिः** - द्रुतगमनः (सन्) उत्तरेण **एव** - उत्तरमार्गेण एव, **व्रज** - गच्छ।

**भावार्थः** - हे मेघ! कृषेः फलं सस्यादिकं त्वदधीनमत एव स्वाभाविकस्नेहस्नपितैः भ्रूविकारप्रदर्शनादक्षैः ग्राम्यवधूभिः सादरमवलोक्यमानस्त्वं लाङ्गलोत्कर्षणेन सुगन्धियुक्तं मालनामकमुन्नतं प्रदेशं वृष्ट्या सनाथीकृत्य कियत्कालानन्तरं द्रुतगत्या पुनरुत्तरेणैव मार्गेण गच्छ।

**समासः** - भ्रुवः विलासः - भ्रूविलासः (षष्ठीतत्पुरुषः) तेभ्यः अनभिज्ञैः - भ्रूविलासानभिज्ञैः (षष्ठीतत्पुरुषः)। प्रीत्या स्निग्धैः - प्रीतिस्निग्धैः (तृतीयातत्पुरुषः)। जनपदस्य वधूः - जनपदवधूः तासां लोचनैः (षष्ठीतत्पुरुषः)। सीरैः उत्कषणम् - सीरोत्कषणम् (तृतीयातत्पुरुषः) तेन सुरभि यथा स्यात् तथा क्रियाविशेषणम्।

**कोशः** - अधीनो निघ्न आयत्तः इत्यमरः। नीबृज्जनपदो देशः इत्यमरः। लाङ्गलं हलम्, गोदारणञ्च सीरोंऽधः इत्यमरः। सुरभिर्घ्राणतर्पणः इत्यमरः। केदारः क्षेत्रमस्यतु इत्यमरः। लघुक्षिप्रमरं द्रुतम् इत्यमरः।

**त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना**
**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।**
**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।। १७।।**

**पदच्छेदः** - वक्ष्यति + अध्वश्रमपरिगतं - वक्ष्यत्यध्वश्रमपरिगतम्। सानुमान् + आम्रकूटः - सानुमानाम्रकूटः। क्षुद्रः + अपि - क्षुद्रोऽपि। पुनः + यः + तथा + उच्चैः - पुनर्यस्तथोच्चैः।

**अन्वयः** - आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वाम् साधु मूर्ध्ना वक्ष्यति। क्षुद्रः अपि संश्रयाय मित्रे प्राप्ते (सति) प्रथमसुकृताऽपेक्षया विमुखः न भवति। यः तथा उच्चैः किं पुनः।

**अन्वयार्थः** - **आम्रकूटः** - एतन्नामकः, **सानुमान्** - पर्वतः, **आसारप्रशमितवनोपप्लवम्** - धारासम्पातापसारितदावानलं, **अध्वश्रमपरिगतम्** - मार्गपरिश्रमक्लान्तम्, **त्वाम्** - भवन्तं मेघमिति यावत्; **साधु** - समीचीनम्, **मूर्ध्ना** - शिरसा, **वक्ष्यति** - धारयिष्यति, **क्षुद्रः अपि** - कृपणः अपि, **संश्रयाय** - आश्रयाय, **मित्रे** - संख्यो, **प्राप्ते** - आगते (सति)। **प्रथमसुकृतापेक्षया** - कृतपूर्वोपकारसंस्मरणेन, **विमुखः** - पराङ्मुखः न भवति, **यः** - आम्रकूटः पर्वतः, **तथा उच्चैः** - तथाविधो महान् (सः), **किं पुनः** - विमुखो भविष्यति किम्? कदापि न भविष्यति।

**भावार्थः** - हे मेघ! धारासम्पातेन प्रशमितवनाग्निं मार्गजन्यपरिश्रमक्लान्तं त्वामाम्रकूटोऽद्रिः शिखरेण सम्यक् प्रकारेण धारयिष्यति। (यतोहि) नीचोऽपि आश्रयाय गृहागतं मित्रमवलोक्य पूर्वकृतोपकारं स्मृत्य पराङ्मुखो न भवति, यः आम्रकूटपर्वतस्तादृशे महान् स कथं भविष्यति। नैव भविष्यतीतिभावः।

**समासः** - आम्राणां कूटो यत्र स आम्रकूटः (बहुव्रीहि)। आसारेण प्रशमितो वनोपप्लवो येन तम् आसारप्रशमितवनोपप्लवम् (बहुव्रीहि)। अध्वनः श्रमः - अध्वश्रमः (षष्ठीतत्पुरुषः) तेन परिगतस्तम् (तृतीयातत्पुरुषः)।

**कोशः** - कूटोऽस्त्री शिखरं श्रृङ्गम् इत्यमरः। धारा-सम्पात-असारः इत्यमरः। सरणिर्वर्त्म मार्गाध्व इत्यमरः। क्षुद्रो दरिद्रः कृपणे इति यादवः। अथ मित्रं सखा सुहृत् इत्यमरः। पुंस्यादि पूर्वपौरस्त्य प्रथमाद्या इत्यमरः।

**अलङ्कारः** - सङ्कर।

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-**
**स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**
**मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः।। १८।।**

**पदच्छेदः** - काननाम्रैः + त्वयि + आरूढे - काननाम्रैस्त्वय्यारूढे। यास्यति + अमरमिथुनप्रेक्षणीयां + अवस्थां - यास्यत्यमरमिथुनप्रेक्षणीयामवस्थाम्।

**अन्वयः** - परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः अचलः स्निग्धवेणीसवर्णे त्वयि शिखरम् आरूढे, मध्येश्यामः शेषविस्तारपाण्डुः भुवः स्तन इव अमरमिथुनप्रेक्षणीयाम्, अवस्थां नूनं यास्यति।

**अन्वयार्थः** - (हे मेघ!) **परिणतफलद्योतिभिः** - पक्वफलशोभिभिः **काननाम्रैः** - वनचूतैः, **छन्नोपान्तः** - आवृतपार्श्वप्रदेशः, **अचलः** - पर्वतः आम्रकूटः इत्यर्थः। **स्निग्धवेणी-सवर्णे** - चिक्कणकेशपाशतुल्यवर्णे, **त्वयि** - मेघे, **शिखरम्** - श्रृङ्गम्, **आरूढे** - आरोहणं कृते सति, **मध्येश्यामः** - कृष्णान्तरः, **शेषविस्तारपाण्डुः** - मध्यभागातिरिक्तपीतवर्णः, **भुवः** - पृथिव्याः, **स्तनः** - कुचः, **इव** - यथा, **अमरमिथुनप्रेक्षणीयाम्** - देवयुगलावलोकनीयम्, **अवस्थाम्** - दशाम्, **नूनम्** - अवश्यम्, **यास्यति** - प्राप्स्यति।

**भावार्थः** - (हे मेघ) पक्वफलकान्तिभिः वनाम्रैराच्छादितपार्श्वभागः आम्रकूटोऽद्रिः कृष्णवर्णे त्वयि मेघे श्रृङ्गे सति मध्ये कृष्णः अन्तभागेषु पाण्डुरः पृथिव्या स्तन इव देवदम्पतीनां दर्शनीयामवस्थां निश्चयमेव यास्यति।

**समासः** - स्निग्धाया वेणी तस्याः सदृशः वर्णः यस्य सः स्निग्धवेणीसवर्णः तस्मिन् (बहुव्रीहि)। काननेषु भवाः आम्राः काननाम्राः (मध्यमपदलोपी) तैः। परिणतैः फलैः द्योतन्ते तैः (तृतीयातत्पुरुषः)। छन्नाः उपान्ताः यस्य सः छन्नोपान्तः (बहुव्रीहि)। शेषे विस्तारे पाण्डुः शेषविस्तारपाण्डुः (सप्तमीतत्पुरुषः)।

**स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं**
**तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।**
**रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां**
**भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य।। १९।।**

**पदच्छेदः** - तोयोत्सर्गद्रुततरगतिः + तत्परं - तोयोत्सर्गद्रुततरगतिस्तत्परम्। द्रक्ष्यसि + उपलविषमे - द्रक्ष्यस्युपलविषमे। भक्तिच्छेदैः + इव - भक्तिच्छेदैरिव। भूतिं + अङ्गे - भूतिमङ्गे।

**अन्वयः** - (हे मेघ!) वनचरवधूभुक्तकुञ्जे, तस्मिन् मुहूर्तं स्थित्वा, तोयोत्सर्गद्रुततरगतिः (सन्) तत्परं वर्त्मतीर्णः उपलविषमे विन्ध्यपादे विशीर्णाम् रेवाम् गजस्य अङ्गे भक्तिच्छेदैः विरचिताम् भूतिम् इव द्रक्ष्यसि।

**अन्वयार्थः** - (हे मेघ!) **वनचरवधूभुक्तकुञ्जे** - किरातकामिनीभुक्तलतासदने, **तस्मिन्** - आम्रकूटे (पर्वते) **मुहूर्तम्** - किञ्चित्क्षणम्, **स्थित्वा** - विश्रम्य, **तोयोत्सर्गद्रुततरगतिः** - जलवर्षणेनातिशीघ्रगमनः, **तत्परम्** - आम्रकूटानन्तरम्, **वर्त्म** - मार्गम्, **तीर्णः** - अतिक्रान्तः सन्, **उपलविषमे** - पाषाणनिम्नोन्नते, **विन्ध्यपादे** - विन्ध्याचलप्रत्यन्तपर्वते, **विशीर्णाम्** - प्रसृताम्, **रेवाम्** - नर्मदाम्, **गजस्य** - हस्तिनः, **अङ्गे** - शरीरे, **भक्तिच्छेदैः** - रेखाभंगिभिः, **विरचिताम्** - निर्मिताम्, **भूतिम्** - मातङ्गश्रृङ्गारं, **इव** - यथा, **द्रक्ष्यसि** - विलोकयिष्यसि।

**भावार्थः** - हे जलद! आम्रकूटपर्वतस्य किरातकामिनीभिः कृतसम्भोगे लतागृहे किञ्चित्क्षणं विश्रम्य तत्र जलवर्षणेन द्रुतगतिः सन् आम्रकूटात्परं मार्गमतिक्रम्य प्रस्तरबहुलान्निम्नोन्नतभूमौ विन्ध्याद्रेस्तटे विस्तीर्णां नर्मदां गजमस्तके रचनाभङ्गिभिर्विरचितां भस्मरेखामिवावलोकयिष्यसि।

**समासः** - वने चरन्तीति वनचराः (उपपदतत्पुरुषः) तेषां वध्वः ताभिः भुक्ताः कुञ्जाः यस्मिन्, तस्मिन् (बहुव्रीहि)। तोयस्य उत्सर्गः - तोयोत्सर्गः (षष्ठीतत्पुरुषः) तेन द्रुततरगतिः - तोयोत्सर्गद्रुततरगतिः (तृतीयातत्पुरुषः) द्रुततरा गतिर्यस्य स द्रुततरगतिः (बहुव्रीहि)। तस्मात्परं - तत्परम् (सुप्सुपेतिसमासः)। उपलेन विषमः उपलविषमः तस्मिन् (तृतीयातत्पुरुषः)। विन्ध्यस्यपादे विन्ध्यपादे (षष्ठीतत्पुरुषः)।

**कोशः** - निकुञ्जकुञ्जौ वा क्लीबे लतादि पिहितोदरे इत्यमरः। मुहूर्तमल्पकाले स्याद् घटिका द्वितयेऽपि च इति शब्दार्णवः। पादाः प्रत्यन्तपर्वतः इत्यमरः। पादो ब्रध्ने तुरीयांशे शैलप्रत्यन्तपर्वते इति मेदिनी। रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका इत्यमरः। भूतिर्मातङ्गश्रृङ्गारे जातौ भस्मनि सम्पदि इति विश्वः।

**अलङ्कारः** - सङ्करः।

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**
**र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।**
**अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।। २०।।**

**पदच्छेदः** - तस्याः + तिक्तैः + वनगजमदैः + वासितं - तस्यास्तिक्तैर्वनगजमदैर्वासितम्। न + अनिलः - नानिलः।

**अन्वयः** - हे घन! वान्तवृष्टिः तिक्तैः वनगजमदैः वासितम् जम्बूकुञ्जप्रतिहतरयम् तस्याः तोयम् आदाय गच्छेः। अन्तःसारम् त्वाम् अनिलः तुलयितुं न शक्ष्यति, हि रिक्तः सर्वः लघुः भवति पूर्णता गौरवाय।

**अन्वयार्थः** - **हे घन!** - हे जलद! **वान्तवृष्टिः** - उद्‌गीर्णवर्षः, (सन्) **तिक्तैः** - कटुभिः।, **वनगजमदैः** - काननहस्तिदानवारिभिः, **वासितम्** - सुगन्धितम्, **जम्बूकुञ्जप्रतिहतरयम्** - जाम्बनिकुञ्जप्रतिबद्धजवम्, **तस्याः** - नर्मदायाः, **तोयम्** - जलम्, **आदाय** - नीत्वाः, **गच्छेः** - व्रज। **अन्तःसारम्** - अन्तःस्थितत्वम् बलमिति यावत् जलपरिपूर्णमिति भावः। **त्वाम्** - मेघम्, **अनिलः** - वायुः, **तुलयितुम्** - मापयितुम्, **न शक्ष्यति** - न समर्थो भविष्यति, **हि** - निश्चयेन, **रिक्तः** - निःसारः शून्य इत्यर्थः, **सर्वः** - सकलः, **लघुः** - न्यूनः, **भवति** - वर्तते, **पूर्णता** - सारवत्ता, **गौरवाय** - गरिम्णे भवति।

**भावार्थः** - हे मेघ! तत्र जलवर्षणानन्तरं सुगन्धिभिर्वन्यगजानां दानवारिभिः सुवासितं जम्बूनिकुञ्जावरुद्धवेगं नर्मदाजलं गृहीत्वा व्रज! जलवत्वादन्तःसारं त्वां पवनः प्रकम्पयितुं समर्थो न भविष्यति, यतो हि निःसारः, सर्वोऽपि हेयः भवति, केवलं सारवतैव गौरवास्पदं भवति।

**समासः** - वान्ता वृष्टिर्येन स वान्तवृष्टिः (बहुव्रीहि)। वनस्य गजा वनगजाः तेषां मदैः वनगजमदैः (षष्ठीतत्पुरुषः)। जम्बूनां कुञ्जजम्बूकुञ्जः (षष्ठीतत्पुरुषः) तैः प्रतिहतो रयः यस्य तम् जम्बूकुञ्जप्रतिहतरयम् (बहुव्रीहि)। अन्तः सारो यस्य तम् अन्तःसारम् (बहुव्रीहि)।

**कोशः** - वृष्टिर्वर्षम् इत्यमरः। तिक्तो रसे सुगन्धे च इति विश्वः। जम्बूस्त्री जम्बुजाम्बवम् इत्यमरः। सारो बले स्थिरांशे च इत्यमरः। सारो बले मज्जनि च स्थिरांशे, न्याये च नीरे च घने सारम् इति विश्वः। भवेत् प्रतिहतं द्विष्टे प्रतिस्खलितरुद्धयः इति मेदिनी। मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः इति विश्वः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-**
**राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।**
**जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्रायचोर्व्याः**
**सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्।। २१।।**

**पदच्छेदः** - केसरैः + अर्धरूढैः + आविर्भूतप्रथममुकुलाः - केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः। कन्दलीः + च + अनुकच्छम् - कन्दलीश्चानुकच्छम्। जग्ध्वा + अरण्येषु + अधिकसुरभिं - जग्ध्वाऽरण्येष्वधिकसुरभिम्। गन्धं + आघ्राय + च + उर्व्याः - गन्धमाघ्रायचोर्व्याः।

**अन्वयः** - अर्धरूढैः केसरैः हरितकपिशम् नीपम् दृष्ट्वा अनुकच्छम् आविर्भूतप्रथममुकुलाः कन्दलीः च जग्ध्वा अरण्येषु उर्व्याः अधिकं सुरभिम् गन्धम्, च आघ्राय सारंगाः जललवमुचः ते मार्गम् सूचयिष्यन्ति।

**अन्वयार्थः** - (हे मेघ!) **अर्धरूढैः** - अर्धोत्पन्नैः, **केसरैः** - किञ्जल्कैः, **हरितकपिशम्** - हरिद्धूसरम्, **नीपम्** - कदम्बम्, **दृष्ट्वा** - विलोक्य, **अनुकच्छम्** - मन्वनूपम् जलप्रायदेशसमीपे इत्यर्थः, **आविर्भूतः प्रथममुकुलाः** - सञ्जातपूर्वकुड्मलाः, **कन्दलीश्च** - भूकन्दलीश्च, **जग्ध्वा** - भुक्त्वा, **अरण्येषु** - काननेषु, **उर्व्याः** - पृथिव्याः, **अधिकसुरभिम्** - उत्कटसुगन्धियुक्तम्, **आघ्राय** - घ्रात्वा, **सारङ्गाः** - कुरङ्गाः, **जललवमुचः** - सलिलबिन्दुवर्षकः, **ते** - मेघस्य, **मार्गम्** - पन्थानम्, **सूचयिष्यन्ति** - निर्देशं करिष्यन्ति।

**भावार्थः** - (हे मेघ!) हस्तिभ्रमरमृगाः अर्धोत्पन्नकेसरैः हरितधूसरं कदम्बकुसुमं विलोक्य, जलप्रायदेशे उत्पन्नपूर्वकुड्मलाः भूमिकन्दलीश्च भुक्त्वा, अरण्येष्वत्यधिकसुरभिं भूमिगन्धमाघ्राय सलिलबिन्दुत्यजतस्ते पन्थानमनुमापयिष्यति।

**समासः** - हरितञ्च तत् कपिशम् - हरितकपिशम् (कर्मधारयः)। कच्छस्यसमीपे अनुकच्छम् (अव्ययीभावः)। आविर्भूताः प्रथमा मुकुलाः यासां ताः आविर्भूतप्रथममुकुलाः (बहुव्रीहि)। साराण्यंगानि येषां ते - मृगादयः (बहुव्रीहि)।

**कोशः** - पलाशो हरितो हरित्। श्यावः स्यात् कपिशो धूम्रधूमिलो कृष्णलोहिते इत्यमरः। अथ स्थलकदम्बके। नीपः स्यात्पुलके इति शब्दार्णवः। जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः इत्यमरः। कुड्मलो मुकुलोऽस्त्रियाम् इत्यमरः। द्रोणपर्णी स्निग्ध- कन्दा कन्दली भूकदल्यपि इति शब्दार्णवः। सारंगश्चातके भृंगे कुरङ्गे च मतङ्गजे इति विश्वः।

**अलङ्कारः** - अनुमानम्।

**अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः**
**श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।**
**त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः**
**सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि।। २२।।**

**पदच्छेदः** - अम्भोबिन्दुग्रहणचतुरान् + चातकान् - अम्भोबिन्दुग्रहणचतुरांश्चातकान्। त्वां + आसाद्य - त्वामासाद्य।

**अन्वयः** - अम्भोबिन्दुग्रहणचतुरान् चातकान् वीक्षमाणाः श्रेणीभूताः बलाकाः परिगणनया निर्दिशन्तः सिद्धाः स्तनितसमये सोत्कम्पानि प्रियसहचरीसम्भ्रमाऽलिङ्गितानि आसाद्य त्वाम् मानयिष्यन्ति।

**अन्वयार्थः** - **अम्भोबिन्दुग्रहणचतुरान्** - वारिकणग्रहणपटून्, **चातकान्** - सारंगान्, **वीक्षमाणः** - अवलोक्यमानः, **श्रेणीभूताः** - पंक्तिबद्धाः, **बलाकाः** - बकपंक्तीः, **परिगणनया** - एका, द्वे, तिस्रः इति क्रमपूर्वकेण संख्यानेन, **निर्दिशन्तः** - अंगुल्या निर्देशं कुर्वन्तः, **सिद्धाः** - देवयोनिविशेषाः, **स्तनितसमये** - रतिसमये, त्वद्गर्जनकाले वा, **सोत्कम्पानि** - उत्कम्पसहितानि, **प्रियसहचरीसंभ्रमालिंगितानि** - स्निग्धप्रियात्वराश्लेषानि, **आसाद्य** - प्राप्य, **त्वाम्** - मेघम्, **मानयिष्यन्ति** - साधुवादान् वदिष्यन्ति।

**भावार्थः** - हे मेघ! वर्षणजलग्रहणनिपुणान् चातकान् पश्यन्तो बद्धपंक्तीः बलाकाः एका द्वे तिस्रः इत्थं संख्यानेन दर्शयन्तः सिद्धाः रतिकाले त्वद्गर्जनेन भीतानां कामिनीनां स्वेच्छयाऽऽश्लेषं प्राप्य त्वां धन्यवादान् व्याहरिष्यन्ति।

**समासः** - अम्भसां बिन्दवः - अम्भोबिन्दवः (षष्ठीतत्पुरुषः) तेषां ग्रहणं (षष्ठीतत्पुरुषः) तस्मिन् चतुरास्तान् (सप्तमीतत्पुरुषः)। प्रियाश्च ताः सहचर्यः (कर्मधारयः) तासां सम्भ्रमः (षष्ठीतत्पुरुषः) तेन आलिंगितानि (तृतीयातत्पुरुषः) प्रियसहचरीसम्भ्रमालिंगितानि।

**कोशः** - पृषन्तिबिन्दुपृषताः इत्यमरः। सारंगाः स्तोकश्चातकः समाः इत्यमरः। बलाकाः वकपंक्तिः स्यात्, इत्यमरः। स्तनितं गर्जितं मेघं निर्घोषे रसितादि च इत्यमरः।

**उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः**
**कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।**
**शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्यकेकाः**
**प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्।। २३।।**

**पदच्छेदः** - कथं + अपि - कथमपि। गन्तुं + आशु - गन्तुमाशु।

**अन्वयः** - हे सखे! मत्प्रियार्थं द्रुतं यियासोः अपि ते ककुभसुरभौ पर्वते पर्वते कालक्षेपम् उत्पश्यामि। सजलनयनैः शुक्लापाङ्गैः केकाः स्वागतीकृत्य प्रत्युद्यातः भवान् कमपि आशु गन्तुं व्यवस्येत्।

**अन्वयार्थः** - **हे सखे** - हे मित्र! **मत्प्रियार्थम्** - मत्प्रियायै किंवा मदिष्टसम्पादनाय, **द्रुतम्** - शीघ्रम्, **यियासोः** - यातुमिच्छोः अपि, **ते** - तव मेघस्येति यावत्, **ककुभसुरभौ** - कुटजपुष्पसुगन्धिनि, **पर्वते पर्वते** - शैले शैले, **कालक्षेपम्** - समयविलम्बम्, **उत्पश्यामि** - उत्प्रेक्षे। **सजलनयनैः** - अश्रुपूर्णाक्षिभिः, **शुक्लापाङ्गैः** - मयूरैः, **केकाः** - मयूरवाणीः, **स्वागतीकृत्य** - स्वागतवचनं विधाय, **प्रत्युद्यातः** - प्रत्युद्गतः सन्, **भवान्** - मेघः, **कथमपि** - केनापि प्रकारेण, **आशु** - शीघ्रम्, **गन्तुम्** - यातुम्, **व्यवस्येत्** - प्रयत्नं कुर्यात्।

**भावार्थः** - हे मित्र!, मद्वल्लभासमीपं किंवा मत्सन्देशार्थं सत्वरं गन्तुमिच्छोरपि भवतः कुटजपुष्पपरिमलसुवासिते शैले शैले समयविलम्बमनुमीये। तथापि आनन्दाश्रुपूरितैः मयूरैः केकया स्वागतं प्राप्य प्रत्युद्गतो भवान् ततः यथा कथञ्चित् शीघ्र गन्तुमुद्युञ्जीत।

**समासः** - मदीया प्रिया मत्प्रिया तस्यै, किंवा मदीयं प्रियम् मत्प्रियम् (नित्यसमासः)। कालस्य क्षेपम् कालक्षेपम् (षष्ठीतत्पुरुषः)। न स्वागतम् अस्वागतम् (नञ्समासः) अस्वागतं स्वागतं सम्पद्यमानं कृत्वा इति स्वागतीकृत्य।

**कोशः** - अथ मित्रं सखा सुहृत् इत्यमरः। जवोऽथ शीघ्रं त्वरितं लघु क्षिप्र मरं द्रुतम् इत्यमरः। ककुभः कुटजेऽर्जुने, इति शब्दार्णवः। क्षेपो विलम्बे निन्दायाम् इति विश्वः। मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावलः इति यादवः। केकावाणी मयूरस्य इत्यमरः।

**पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-**
**र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।**
**त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः**
**सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः।।२४।।**

**पदच्छेदः** - सूचिभिन्नैः + नीडारम्भैः + गृहबलिभुजां + आकुलग्रामचैत्याः - सूचिभिन्नै-र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः। त्वयि + आसन्ने - त्वय्यासन्ने।

**अन्वयः** - (हे मेघ!) त्वयि आसन्ने (सति) दशार्णाः सूचिभिन्नैः केतकैः पाण्डुच्छायोपवनवृत्तयः गृहबलिभुजाम् नीडारम्भैः आकुलग्रामचैत्याः परिणतफलश्यामजम्बूवनान्ताः कतिपयदिनस्थायिहंसाः सम्पत्स्यन्ते।

**अन्वयार्थः** - (हे मेघ!) **त्वयि** - भवति, **आसन्ने** - समीपस्थे, सति, **दशार्णाः** - एतन्नामकाः देशाः, **सूचिभिन्नैः** - मुकुलाग्रविकसितैः, **केतकैः** - केतकीकुसुमैः, **पाण्डुच्छायोपवनवृत्तयः** - हरितवर्णाऽऽरामप्रकाराः, **गृहबलिभुजाम्** - गेहबलिभोक्तॄणाम्, काकादीनामिति भावः, **नीडारम्भैः** - कुलायनिर्माणैः, **आकुलग्रामचैत्याः** - संकीर्णग्रामवृक्षाः, अश्वत्थादयः, **परिणतफलश्यामजम्बूवनान्ताः** - परिपक्वफलकृष्णजम्बुकाननप्रदेशाः, **कतिपयदिनस्थायिहंसाः** - किञ्चिद्दिवसस्थायिहंसाः, **संपत्स्यन्ते** - भविष्यन्ति।

**भावार्थः** - हे मेघ! त्वयि समीपस्थे सति दशार्णदेशे गृहाऽऽरामाणां वृत्तयः किञ्चिद्विकसितकेतकी-कुसुमानां कान्त्या पीताभा भविष्यन्ति, ग्राम्याः अश्वत्थादयो वृक्षाः बल्यन्नभोजीनां काकादीनां कुलाय-निर्म्माणैः सङ्कीर्णा भविष्यन्ति। तत्रस्थवनप्रान्तभागाः पक्वजम्बूफलैः कृष्णाः भविष्यन्ति, हंसाश्च कतिपयदिवसं यावत् स्थास्यन्ति।

**समासः** - पाण्ड्वी छाया यासां ताः पाण्डुच्छायाः (बहुव्रीहि)। पाण्डुच्छायाः उपवनानां वृत्तयः येषु ते - पाण्डुच्छायोपवनवृत्तयः (बहुव्रीहि)। आकुलानि ग्रामेषु चैत्यानि येषु ते - आकुलग्रामचैत्याः (बहुव्रीहि) परिणतैः फलैः श्यामानि यानि जम्बूवनानि (बहुव्रीहि) तै अन्ताः-परिणतः फलश्यामजम्बूबनान्ता (तृतीयातत्पुरुषः)। कतिपयेषु दिनेषु स्थायिनो हंसा येषु ते - कतिपयदिनस्थायिहंसाः (बहुव्रीहि)। सूचीषु भिन्नानि सूचिभिन्नानि (सप्तमीतत्पुरुषः) तैः। नीडानामारम्भः नीडारम्भः (षष्ठीतत्पुरुषः) तैः। गृहाणां बलयः (षष्ठीतत्पुरुषः)।

**कोशः** - समीपे निकटासन्नसन्निकृष्टसनीडवत् इत्यमरः। केतकी मुकुलाग्रेषुसूचिः इति शब्दार्णवः। हरितः पाण्डुरः इत्यमरः। प्रकारो वरणः सालः प्राचीरं प्रान्ततो वृत्तिः इत्यमरः। ध्वाङ्क्षात्मपरभृद्बलिभुग्वायसा अपि इत्यमरः। चैत्यमायतने बुद्धवन्द्ये चोददेशपादवे इति विश्वः।

**तेषां दिक्षु प्रथितविदिशालक्षणां राजधानी**
**गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।**
**तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्**
**सभ्रू भङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि।। २५।।**

**पदच्छेदः** – मुखं + इव – मुखमिव। वेत्रत्याः + चलोर्मि – वेत्रत्याश्चलोर्मि।

**अन्वयः** – दिक्षु प्रथितविदिशालक्षणम् तेषां राजधानीम् गत्वा सद्यकामुकत्वस्य अविकलफलं लब्धा यस्मात् स्वादु चलोर्मि वेत्रवत्याः पयः सभ्रूभङ्गं मुखम् इव तीरोपान्तस्तनितसुभगं पास्यसि।

**अन्वयार्थः** – **दिक्षु** – दिशासु, **प्रथितविदिशालक्षणाम्** – प्रसिद्धविदिशेतिनाम्नीम्, **तेषां** – दशार्णानाम्, **राजधानीम्** – प्रधाननगरीम्, **गत्वा** – प्राप्य, **सद्यः** – तत्क्षणम्, **कामुकत्वस्य** – विलासितायाः, **अविकलम्** – समग्रम्, **फलम्** – प्रयोजनम्, **लब्धा** – प्राप्स्यते भवतेति शेषः। **यस्मात्** – कारणात्, **स्वादु** – पेयम्, **चलोर्मि** – तरंगसहितम्, **वेत्रवत्याः** – वेत्रवतीनद्याः, **पयः** – जलम्, **सभ्रूभंगम्** – सकटाक्षम्, **मुखमिव** – आननमिव (अधरमिवेतिभावः) **तीरोपान्ते** – कूलप्रदेशे, (यत्) **स्तनितम्** – गर्जितम्, तेन **सुभगम्** – सुन्दरम्, **पास्यसि** – पानं करिष्यसि।

**भावार्थः** – हे मेघ! विदिशानामधेयां दशार्णानां प्रसिद्धां राजधानीं गत्वा तत्र त्वं तत्क्षणमेव विलासिताया सकलं फलं लप्स्यसे। यतस्तत्र वेत्रवत्याः नद्याः मधुरं तरंगयुक्तञ्च जलं कस्याश्चिन्नायिकायाः कटाक्षयुक्तमधुरमिव तटप्रान्ते गर्जनान्तरं पास्यसि।

**समासः** – प्रथितं विदिश इति लक्षणं यस्याः ताम् प्रथितविदिशालक्षणम् (बहुव्रीहि)। विगता कला यस्य तद्विकलम् (बहुव्रीहि)। न विकलम् – अविकलम् (नञ्समासः)। चलाः उर्मयो यस्याः तत् – चलोर्मि (बहुव्रीहि)। भ्रूभङ्गेन सह वर्तमानम् सभ्रूभंगम् (बहुव्रीहि)। तीरस्य उपान्तः तीरोपान्तः (षष्ठीतत्पुरुषः) तस्मिन् स्तनितम् (सप्तमीतत्पुरुषः) तेन सुभगम् तीरोपान्तस्तनितसुभगम् (तृतीयातत्पुरुषः)।

**कोशः** – प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः इत्यमरः। लक्षणं नाम्नि चिह्ने च इति विश्वः। विलासी कामुको कामी इति शब्दार्णवः। स्तनितं गर्जितं मेघनिर्घोषे रसितादि च इत्यमरः।

**अलङ्कारः** – समासोक्ति, उत्प्रेक्षा, संकरः।

**नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-**
**स्त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः।**
**यः पण्यस्त्री रतिपरिमलोद्गारिभिर्नागराणा-**
**मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि।। २६।।**

**पदच्छेदः** – नीचैः + आख्यं – नीचैराख्यम्। गिरिं + अधिवसेः तत्र – गिरिमधिवसेस्तत्र। विश्रामहेतोः + त्वत्सम्पर्कात् – विश्रामहेतोस्त्वत्सम्पर्कात्। रतिपरिमलोद्गारिभिः + नागराणां + उद्दामानि – रतिपरिमलोद्गारिभिर्नागराणामुद्दामानि। शिलावेश्मभिः + यौवनानि – शिलावेश्मभिर्यौवनानि।

**अन्वयः** – तत्र विश्रामहेतोः प्रौढपुष्पैः कदम्बैः त्वत्सम्पर्कात् पुलकितमिव नीचैराख्यं गिरम् अधिवसेः। तत्र पण्यस्त्रीरतिपरिमलोद्गारिभिः शिलावेश्मभिः नागराणाम् उद्दामानि यौवनानि प्रथयति।

**अन्वयार्थः** – (हे मेघ!) **तत्र** – विदिशायाम्, **विश्रामहेतोः** – श्रमापनोदनाय, **प्रौढपुष्पैः** – विकसितकुसुमैः, **कदम्बैः** – नीपवृक्षैः, **त्वत्सम्पर्कात्** – भवत्साहचर्यात्, **पुलकितमिव** – संजात रोमाञ्चमिव, **नीचैराख्यम्** – नीचैः नामानम्, **गिरम्** – पर्वतम्, **अधिवसेः** – अधिवासं कुर्याः। **यः** – नीचैः पर्वतः, **पण्यस्त्रीरतिपरिमलोद्गारिभिः** – वेश्याकामक्रीडासौरभाविष्कुर्वद्भिः **शिलोवेश्मभिः** – पाषाणसदनैः, कन्दराभिरित्यर्थः, **नागराणाम्** – चतुरनगरवासिनाम्, **उद्दामानि** – निर्बन्धानि, उत्कटानीति भावः, **यौवनानि** – तारुण्यानि, **प्रथयति** – कथयति।

**भावार्थः** – हे मेघ! विदिशायां श्रमापनोदनाय कुसुमित कदम्बवृक्षैः, रोमाञ्चयुक्तमिव नीचैर्नामकं पर्वतमधिवासं कुर्याः। यः पर्वतः वेश्यारम्भक्रीडाप्रयुक्तसुगन्धिताभिः कन्दराभिर्नागराणामुत्कटयौवनानि व्यनक्ति।

**समासः** – विश्रामस्य हेतु – विश्रामहेतुः तस्य (षष्ठीतत्पुरुषः)। प्रौढानि पुष्पाणि येषु तैः प्रौढपुष्पैः (बहुव्रीहि)। तव संपर्कः तस्मात् त्वत्सम्पर्कात् (षष्ठीतत्पुरुषः)। नीचैः आख्या अस्य तम् (बहुव्रीहि)। पण्याः स्त्रियः तासां (बहुव्रीहि) रतिषु यः परिमलः (सप्तमीतत्पुरुषः)। यूनः भावः यौवनम् तानि यौवनानि।

**कोशः** - वारस्त्री गणिका वेश्या पण्यस्त्रीरूपजीवनी इति शब्दार्णवः। विमर्दोत्थे परिमलो सन्धे जनमनोहरे इत्यमरः। पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषत् इत्यमरः। उद्दामो बन्धरहिते स्वतन्त्रे च इति मेदिनी।

**विश्रान्तः सन् व्रज वननदीतीरजातानिसिञ्च-**
**न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।**
**गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानाम्**
**छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम्।। २७।।**

**पदच्छेदैः** - नवजलकणैः + यूथिकाजालकानि - नवजलकणैर्यूथिकाजालकानि। वननदीतीरजातानि + सिञ्चन् + उद्यानानां - वननदीतीरजातानिसिञ्चन्नुद्यानानाम्।

**अन्वयः** - तत्र विश्रान्तः सन् वननदीतीरजातानि उद्यानानाम् यूथिकाजालकानि नवजलकणैः सिञ्चन् गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानाम् पुष्पलावीमुखानाम् छायादानात् क्षणपरिचितः (सन्) व्रज।

**अन्वयार्थः** - **तत्रः** - विदिशाया स्थिते नीचैः गिरौ, **विश्रान्तः सन्** - कृतविश्रामः सन्, **वननदीतीरजातानि** - वन्यसरित्कूलोद्भवानि, **उद्यानानाम्** - आरामाणाम्, **यूथिकाजालकानि** - मागधीपुष्पकुड्मलानि, **नवजलकणैः** - नूतनसलिलबिन्दुभिः, **सिञ्चत्** - आर्द्रयन्, **गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानाम्** - कपोलस्वेदापनयनपीडाक्षामश्रोत्रपद्मानाम्, **पुष्पलावीमुखानाम्** - पुष्पावचायिकावदानानाम्, **छायादानात्** - अनातपीकरणात्, **क्षणपरिचितः** - किंचित्कालेन ज्ञातः, (सन्) **व्रज** - गच्छ।

**भावार्थः** - (हे मेघ!) नीचैरद्रौ विश्रम्य नदीतटोत्पन्नानि आरामाणां मागधीकुसुमकुड्मलानि नूतनजललवैरार्द्रीकुर्वन् पुष्पावचयनपरायणानां नारीमुखानां गण्डघर्मजलदूरीकरणेन म्लानकर्णाऽऽभरणीभूतपद्मानां छायाप्रदानेन किञ्चित्कालाय परिचितः सन् गच्छ।

**समासः** - वने या नद्यः तासां तीरेषु जातानि - वननदीतीरजातानि (बहुव्रीहि)। नवजलानां कणास्तैः (षष्ठीतत्पुरुषः) नवजलकणैः। गण्डयोःस्वेदः - गण्डस्वेदः (सप्तमीतत्पुरुषः) गण्डस्वेदस्य अपनयनम् गण्डस्वेदापनयनम् (षष्ठीतत्पुरुषः), तेन रुजा (तृतीयातत्पुरुषः) तया क्लान्तानि (तृतीयातत्पुरुषः) गण्डस्वेदापनयनरुजाक्लान्तानि, कर्णयोः उत्पलानि कर्णोत्पलानि (सप्तमीतत्पुरुषः) गण्डस्वेदापनयन-रुजाक्लान्तानि कर्णोत्पलानि येषां तानि; तेषाम् (बहुव्रीहि)। पुष्पाणि लुलन्तीति पुष्पलाव्यः तासां मुखानि - पुष्पलावीमुखानि (षष्ठीतत्पुरुषः) तेषाम्। छायायाः दानं तस्मात् (षष्ठीतत्पुरुषः)। क्षणं परिचितः - क्षणपरिचितः (द्वितीयातत्पुरुषः)।

**कोशः** - पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् इत्यमरः। मागधी गणिका यूथिकाऽम्बष्ठा इत्यमरः। केरकजालककलिकाकुड्मलमुकुलानि तुल्यानि इति हलायुधः। रुजा रोगे च भंगे इति मेदिनी। छाया सूर्यप्रियाकान्तिः प्रतिबिम्बमनातपः इत्यमरः। अव्यापारस्थितौ कालविशेषोत्सवयोः क्षणः इत्यमरः।

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मास्मभूदुज्जयिन्याः।**
**विद्युद्दामस्फुरति चकितैस्तत्र पौराङ्गनानां**
**लीलापाङ्गैर्यदि न रमते लोचनैवञ्चितोऽसि।। २८।।**

**अन्वयः** - उत्तराशां प्रस्थितस्य भवतः पन्था यदपि वक्रः उज्जयिन्या सौधोत्साङ्ग-प्रणयविमुखः मास्मभूः। तत्र विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः पौराङ्गनानाम् लोचनैः यदि न रमसे वञ्चित असि।

**अन्वयार्थः** - **उत्तराशाम्** - उदीचीं दिशं प्रति, **प्रस्थितस्य** - गच्छतः, **भवतः** - मेघस्य, **पन्था** - मार्गः, **यदपि** - यद्यपि, **वक्रः** - अनृजुः, (तथापि) **उज्जयिन्याः** - विशालायाः, **सौधोत्सङ्ग-प्रणयविमुखः** - हर्म्योर्ध्वभागपरिचयपराङ्मुखः, **मास्मभूः** - मा भव। **तत्र** - उज्जयिन्याम्, **विद्युद्दामस्फुरितचकितैः** - तडिल्लतादीप्तिंचञ्चलैः, **लोलापाङ्गैः** - चञ्चलकटाक्षैः, **पौराङ्गनानाम्** - नागरिकवनितानाम्, **लोचनैः** - नेत्रैः, **यदि** - चेत्, (त्वम्) **न रमसे** - न क्रीडसि, (तर्हि) **वञ्चितोऽसि** - प्रतारितोऽसि।

**भावार्थः** - हे मेघ! अलकां गन्तुं प्रवृत्तस्य ते उज्जयिनीगमने मार्गः यद्यपि वक्रस्तथापि उज्जयिन्या हर्म्यप्रासादपरिचयाद्विमुखो मा भव। तत्र विद्युल्लतायाः कान्तिभिश्चकितैः चञ्चलकटाक्षयुक्तैः नागरीणां युवतीनां नयनैः यदि न रमणं करोसि तर्हि जीवनफलादात्मानं प्रताडित एव जानीहि।

**समासः** - उत्तरा चेयमाशा उत्ताराशा (कर्मधारयः) ताम्। सौधानामुत्सङ्गः सौधोत्सङ्गः (षष्ठीतत्पुरुषः) तेषु प्रणयः (सप्तमीतत्पुरुषः) तस्मिन् विमुखः (सप्तमीतत्पुरुषः) सौधोत्सङ्गप्रणयविमुखः। लोला अपाङ्गा येषु तानि लोलापाङ्गानि (बहुव्रीहि) तैः विद्युतः दामानीव विद्युद्दामानि (उपमिततत्पुरुषः) विद्युद्दाम्नां स्फुरितानि तैः - विद्युद्दामस्फुरितैः (षष्ठीतत्पुरुषः) चकितस्तैः। पौराश्च ताः अङ्गनाः (कर्मधारयः) तासाम् अथवा पौराणाम् अङ्गनाः (षष्ठीतत्पुरुषः) तासाम्।

**कोशः** - उत्तरा दिगुदीची स्यात् इत्यमरः। अयनं वर्त्ममार्गध्वपन्थानः पदवी सृतिः इत्यमरः। आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि इत्यमरः। विशालोज्जयिनी समाः इत्यमरः। उत्पलः प्रणयः स्यात्परिचये याच्ञ्यां सौहृदेऽपि च यादवः। तडित्सौदामिनी विद्युच्चञ्चला चपला अपि इत्यमरः। लोचनं नयनं नेत्रमित्यमरः।

**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः**
**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।**
**निर्विन्ध्यायाः पथि भवरसाभ्यन्तरः सन्निपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।। २९।।**

**पदच्छेदः** - स्त्रीणां + आद्यं - स्त्रीणामाद्यम्।

**अन्वयः** - पथि वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः स्खलितसुभगं संसर्पयन्त्याः दर्शितावर्तनाभेः निर्विन्ध्यायाः सन्निपत्य रसाभ्यन्तरो भव! हि स्त्रीणाम् प्रियेषु विभ्रमः आद्यम् प्रणयवचनम्।

**पथि** - मार्गे, **विचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः** - तरङ्गसञ्चलनशब्दायित-पक्षिपङ्क्तिकटिबन्धदोरकः यस्याः तस्याः, **स्खलितेन** - मदस्खलितेन, **सुभगम्** - रमणीयम्, यथास्यात्तथा **संसर्पन्त्याः** - प्रवाहितायाः, वा **निर्विन्ध्यायाः** - एतन्नामिकायाः नद्याः अथवा कस्याश्चिन्नायिकायाः, **सन्निपत्य** - संगत्य, **रसाभ्यन्तरः** - जलमध्यगतः अन्तःस्थितश्रृंगारो वा, **भव** -एधि, **हि** - यतः, **स्त्रीणाम्** - नारीणाम्, **प्रियेषु** - कान्तेषु (विषये) **विभ्रमः** - विलास एव, **आद्यम्** - प्रथमम्, **प्रणयवचनम्** - प्रेमवाक्यम् भवति।

**भावार्थः** - (हे मेघ!) यस्यास्तरङ्गसञ्चलनेन शब्दायमानाः हंसादिपक्षिणो रसनादोरका इव भवन्ति। उपस्खलने रमणीयं यथास्यात्तथा प्रवहन्त्या जलभ्रमिरूपां नाभिं दर्शयन्त्या वनिताया इव निर्विन्ध्याया अन्तःप्रविश्य तद्रसास्वादं विधेहि, यतो हि वनितानां प्रियेषु विलास-प्रदर्शनमेव रतिप्रसंगे प्राथमिकं प्रेमप्रार्थनावाक्यं भवति।

**समासः** - वीचीनां क्षोभः - वीचिक्षोभस्तेन (षष्ठीतत्पुरुषः)। स्तनिताश्च ते विहगाः सैव काञ्चीगुणो यस्याः, तस्याः (बहुव्रीहि) स्खलितेन सुभगं यथा स्यात्तथा क्रियाविशेषणं (तृतीयातत्पुरुषः)। आवर्त एव नाभिः - आवर्तनाभिः। रसः अभ्यन्तरे यस्य स रसाभ्यन्तरः (बहुव्रीहि)।

**कोशः** - स्त्रियां वीचिरयोर्मिषु इत्यमरः। खगे विहङ्गः विहगः विहङ्गम विहायसः इत्यमरः। स्त्रीकट्यां मेखलाकाञ्चीसप्तकीरशना तथा इत्यमरः। स्यादावर्तोम्भसां भ्रमः इत्यमरः। श्रृङ्गारादौ छले वीर्ये सुवर्णे विषशुक्रयोः। आवर्तश्चिन्तने वारिभ्रमे चावर्तने पुमान् इति मेदिनी।

**अलङ्कारः** - श्लेषः, अर्थान्तरन्यासः।

**वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः**
**पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।**
**सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती**
**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः।। ३०।**

**पदच्छेदः** - वेणीभूतप्रतनुसलिला + असौ + अतीतस्य - वेणीभूतप्रतनुसलिलाऽसावतीतस्य। तटरुहतरुभ्रंशिभिः + जीर्णपर्णः - तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः। त्वया + एव + उपपाद्यः - त्वयैवोपपाद्यः।

**अन्वयः** - वेणीभूतप्रतनुसलिला तटरुहतरुभ्रंशिभिः जीर्णपर्णैः पाण्डुच्छाया असौ सिन्धुः विरहावस्थया अतीतस्य ते सौभाग्यं व्यञ्जयन्ती येन विधिना कार्श्यं त्यजति, सुभग! सः त्वया एव उपपाद्यः।

**अन्वयार्थः** - **वेणीभूतप्रतनुसलिला** - वेण्याकारस्वल्पजला, **तटरुहतरुभ्रंशिभिः** - तीरोत्पन्नवृक्षभ्रंशिभिः, **जीर्णपर्णैः** - शुष्कपत्रैः, **पाण्डुच्छाया** - पीत्वर्णा, **असौ** - एषा, **सिन्धुः** - एतन्नामिका नदी निर्विन्ध्या वा, **विरहावस्थया** - वियोगावस्थया, **अतीतस्य** - प्रोषितस्य, **ते** - मेघस्य, **सौभाग्यम्** - सुभगत्वम्, **व्यञ्जयन्ती** - प्रकाशयन्ती, **येन** - तादृशेन, **विधिना** - प्रकारेण, **कार्श्यम्** - कृशतां, स्वल्पजलताम्, **त्यजति** - जहाति, **हे सुभग** - हे मेघ! **सः** - तादृशः व्यापारः,

**त्वयैव** - मेघेनैव, **उपपाद्यः** - सम्पादनीयः।

**भावार्थः** - हे मेघ! कामिन्याः स्वल्पा वेणीव स्वल्पजलवती सिन्धुः नाम्नी नदी, त्वद्वियोगेन स्वतटोत्पन्नवृक्षात् पतितैः पुराणपत्रैः पीता या तव सौभाग्यशालित्वं सूचयति। अतः येनोपायेन सा कृशतां त्यजेद् तादृशः उपायः त्वया कर्तव्यः।

**समासः** - वेणीभूतप्रतनुसलिला - न वेणी अवेणी (नञ्तत्पुरुषः), अवेणी वेणी सम्पद्यते यथा, तथाभूतं वेणीभूतम् (अभूततद्भावे च्विः) वेणीभूतं प्रतनु सलिलं यस्याः सा वेणीभूतप्रतनुसलिला (बहुव्रीहिः) तटयोः रुहा तटरुहा (सप्तमीतत्पुरुषः) तटरुहाश्च ते तरवः - तटरुहतरवः (कर्मधारयः) तेभ्यो भ्रंशिभिः तटरुहतरुभ्रंशिभिः (पञ्चमीतत्पुरुषः)। जीर्णानि च तानि पर्णानि जीर्णपर्णानि (कर्मधारयः) तैः जीर्णपर्णैः। विरहस्य अवस्था विरहावस्था (षष्ठीतत्पुरुषः) तया। शोभनं भगं (भाग्यम्) यस्य स तत्सम्बुद्धौ सुभग! (बहुव्रीहि)।

**कोशः** - वेणी प्रवेणी इत्यमरः। स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे इति वैजयन्ती। विधिर्ना नियमे काले विधाने परमेष्ठिनी इति मेदिनी। तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे इति मेदिनी।

**अलङ्कारः** - समासोक्ति।

**प्राप्यावन्तीनुदयनकथा कोविदग्रामवृद्धान्**
**पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।**
**स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां**
**शेषैः पुण्यैर्हृतमिव दिवः क्रान्तिमत् खण्डमेकम्।। ३१।।**

**पदच्छेदः** - प्राप्य + अवन्तीन् + उदयनकथा -प्राप्यावन्तीनुदयनकथा। पूर्वोद्दिष्टां + अनुसर - पूर्वोद्दिष्टामनुसर। पुण्यैः + हृतं + इव - पुण्यैर्हृतमिव।

**अन्वयः** - उदयनकथाकोविदग्रामवृद्धान् अवन्तीन् प्राप्य सुचरितफलेस्वल्पीभूते गां गतानां स्वर्गिणां शेषैः पुण्यैः हृतं कान्तिमत् एकं दिवः खण्डम् इवपूर्वोद्दिष्टाम् श्रीविशालाम् विशालाम् पुरीम् अनुसर।

**अन्वयार्थः** - **उदयकथाकोविदग्रामवृद्धान्** - वत्सराजकथाविज्ञजनपदवृद्धान्, **अवन्तीन्** - मालवदेशान्, **प्राप्य** - गत्वा, सुचरितफले, **स्वल्पीभूते** - क्षीणे सति, **गाम्** - पृथ्वीम्, **गतानाम्** - प्राप्तानाम्, **स्वर्गिणाम्** - देवलोकनिवासिनाम्, **शेषैः** - अवशिष्टैः, **पुण्यैः** - धर्मैः, **हृतम्** - अवतारितम्, **कान्तिमत्** - उज्ज्वलम्, **एकम्** - अन्यतमम्, **दिवः** - स्वर्गलोकस्य, **खण्डमिव** - शकलमिव, **पूर्वोद्दिष्टम्** - पूर्वकथिताम्, **श्रीविशालाम्** - सम्पत्तिपूर्णाम् (शोभाशालिनीम्), **विशालाम्** - उज्जयिनीम्, **पुरीम्** - नगरीम्, **अनुसर** - गच्छ।

**भावार्थः** - हे मेघ! यत्रत्याः ग्रामवृद्धाः वत्सराजोपाख्यानज्ञातारः सन्ति, तामवन्ति नगरीं प्राप्य, पुण्यफले क्षीणे सति पृथिव्यामागतानां स्वर्गनिवासिनामवशिष्टैः पुण्यफलैराहृतं स्वर्गस्यैकं दिव्यं शकलमिव सम्पत्तिपूर्णं पूर्वकथितामुज्जयिनीं गच्छ।

**समासः** - उदयनस्य कथा - उदयनकथा (षष्ठीतत्पुरुषः), उदयनकथायां कोविदाः - उदनयकथा कोविदाः (सप्तमीतत्पुरुषः)। ग्रामे वृद्धाः - ग्रामवृद्धाः (सप्तमीतत्पुरुषः), उदयनकथाकोविदग्रामवृद्धाः येषु तान् उदयनकथाकोविदग्रामवृद्धान् (बहुव्रीहि)। श्रिया विशालाम् - श्रीविशालाम् (तृतीयातत्पुरुषः)। पूर्वम् उद्दिष्टाम् - पूर्वोद्दिष्टाम् (सुप्सुपेति समासः)। विविधाः शालाः यस्यां सा विशाला (बहुव्रीहि) ताम्।

**कोशः** - विद्वान् विपश्चित् दोषज्ञः सन् सुधीः कोविदो बुधः इत्यमरः। स्याद्धर्ममस्त्रियां पुण्यं श्रेयसी सुकृतं वृषः इत्यमरः। द्यौ दिवो द्वे स्त्रियामभ्रं व्योमपुष्करमम्बरम् इत्यमरः। शोभा सम्पत्ति पद्मासु लक्ष्मीः श्रीरिव दृश्यते इति शाश्वतः। विशालात्विन्द्रवारुण्यामुज्जयिन्यां तु योषिति इति मेदिनी।

**अलङ्कारः** - संसृष्टिः।

**दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां**
**प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।**
**यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः**
**शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।। ३२।।**

**पदच्छेदः** - सुरतग्लानिं + अङ्गानुकूलः - सुरतग्लानिमङ्गानुकूलः।

**अन्वयः** - यत्र प्रत्यूषेषु पटु मदकलम् सारसानाम् कूजितम् दीर्घीकुर्वन् स्फुटितकमलामोदमैत्रीकषायः अङ्गानुकूलः

शिप्रावातः प्रार्थनाचाटुकारः प्रियतमः इव स्त्रीणाम् सुरतग्लानिम् हरति।

**अन्वयार्थः** - **यत्र** - विशालायाम्, **प्रत्यूषेषु** - प्रातःकालेषु, **पटु** - प्रस्फुटम्, **मदकलम्** - मदेनाव्यक्तमधुरम्, **सारसानाम्** - पक्षिविशेषाणाम्, **कूजितम्** - शब्दम्, **दीर्घीकुर्वन्** - विस्तारयन्, **स्फुटितकमलामोदमैत्रीकषायाः** - विकसितपद्मसुगन्धिसंसर्गसुरभिः, **अङ्गानुकूलः** - अवयवानुरूपः, **शिप्रावातः** - शिप्रानदीपवनः, **प्रार्थनाचाटुकारः** - रतिरचनाय मधुरभाषी, **प्रियतमः** - वल्लभः, **इव** - यथा, **स्त्रीणाम्** - नारीणाम्, **सुरतग्लानिम्** - सम्भोगपरिश्रमम्, **हरति** - दूरीकरोति।

**भावार्थः** - हे मेघ! यस्यां विशालायां प्रातःकाले सारस-पक्षिविशेषाणां प्रस्फुटं मदेनाव्यक्तमधुरं कलरवं वर्द्धयन् विकसितकमलसुगन्धिसंस्पर्शसुगन्धितः सुखदः शिप्रानदीपवनः रतिक्रीडायां पुनः प्रवृत्त्यर्थं मधुरभाषणशीलः वल्लभ इव कामिनीनां सम्भोगजन्यपरिश्रणं दूरीकरोति।

**समासः** - स्फुटितानि च तानि कमलानि - स्फुटितकमलानि (कर्मधारयः) तेषाम् आमोदः (षष्ठीतत्पुरुषः) तेन मैत्री (तृतीयातत्पुरुषः) तया कषायः - सफुटितकमलामोदमैत्रीकषायः (तृतीयातत्पुरुषः)। अदीर्घं दीर्घं करोतीति दीर्घीकरोति (अभूततद.)। सुरतस्य ग्लानिं सुरतग्लानिं (षष्ठीतत्पुरुषः)। प्रार्थनाया चाटुकारः - प्रार्थनाचाटुकारः (सप्तमीतत्पुरुषः)। अङ्गानाम् अनुकूलः अङ्गानुकूलः (षष्ठीतत्पुरुषः)।

**कोशः** - प्रत्यूषोऽहर्मुखं कल्यम् इत्यमरः। ध्वनौ तु मधुरास्फुटे कलः इत्यमरः। सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः इति यादवः। चक्राङ्गः सारसो हंसः शब्दार्णवः। मदोरेतसिकस्तूर्यां गर्वे हर्षे भेदानयोः इति मेदिनी। पटुर्दक्षे च नीरोगे चतुरेऽप्यभिध्येयवत् इति मेदिनी। रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे इति यादवः। विमर्दोत्थे परिमलो गन्धे जनमनोहरे आमोदः इत्यमरः।

**अलङ्कारः** - पूर्णोपमा।

**हारांस्तारांस्तरलगुटिकान्कोटिशः शंखशुक्तीः**
**शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान्।**
**दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणाञ्च भङ्गान्**
**संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः।। ३३।।**

**पदच्छेदः** - हारान् + तारान् + तरलगुटिकान् + कोटिशः - हारांस्तारांस्तरलगुटिकान्कोटिशः। शष्पश्यामान् + मरतकमणीन् + उन्मयूखप्ररोहान् - शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान्। सलिलनिधायः + तोयमात्रावशेषाः - सलिलनिधयस्तोयमात्रावशेषाः।

**अन्वयः** - यस्यां कोटिशो विपणिरचितान् तारान् तरलगुटिकान् हारान् शंखशुक्तीः शष्पश्यामान् उन्मयूखप्ररोहान् मरकतमणीन् विद्रुमाणां भङ्गान् च दृष्ट्वा सलिलनिधयः तोयमात्रावशेषाः संलक्ष्यन्ते।

**अन्वयार्थः** - **यस्याम्** - उज्जयिन्याम्, **कोटिशः** - असंख्यान्, **विपणिरचितान्** - पण्येषु विक्रयार्थं प्रसारितान्। **तारान्** - शुद्धान्, **तरलगुटिकान्** - हारमध्यमहारत्नान्। **हारान्** - मुक्तास्रजः, **शंखशुक्तीः** - कम्बुमुक्तास्फोटान्, **शष्पश्यामान्** - नव तृणमिव हरितान्, **उन्मुख प्ररोहान्** - उद्गताकुरान्, **मरकतमणीन्** - मकताख्यमणिविशेषान्, गारुडरत्नानीति यावत्, **विद्रुमाणाम्** - प्रवालानाम् **भङ्गान्** - शकलान्, **च** - तथा, **दृष्ट्वा** - अवलोक्य, **सलिलनिधयः** - रत्नकराः। **तोयमात्रावशेषाः** - केवलजलावशिष्टाः, **संलक्ष्यन्ते** - अनुमीयन्ते।

**भावार्थः** - हे मेघ! यस्यामुज्जयिन्यां पण्येषु विक्रयार्थ प्रसारितान् बहून् बहुमूल्यमुक्तास्रजः शङ्खान् शुक्तीः हरितवर्णान् मनोरमाऽङ्कुरान् मरकतमणीन् प्रवालशकलांश्च विलोक्य जनाः रत्नाकराः समुद्राः जलमात्रावशिष्टाः सञ्जाता इत्यनुमीयन्ते।

**समासः** - विपणिषु रचिताः विपणिरचिताः (सप्तमीतत्पुरुषः) तान्। तरला गुटिका येषु ते तान् (बहुव्रीहि)। शङ्खाश्च शुक्तयश्च ताः (द्वन्द्वसमासः)। उद्गताः मयूखाः येषां ते उन्मयूखाः (बहुव्रीहि) तान्। उन्मयूखाः तादृशाः प्ररोहाः येषां ते उन्मयूखप्ररोहाः (बहुव्रीहि) तान्। तोयमेव तोयमात्रम् (रूपकसमासः) तोयमात्रमवशेषो येषान्ते तोयमात्रावशेषाः (बहुव्रीहि)। शष्पाणीव श्यामान् (उपमितकर्मधारयः)।

**कोशः** - तरलो हारमध्यगः इत्यमरः। पिण्डे मणौ महारत्ने गुटिकाबद्धपारदे इति शब्दार्णवः। मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात् कम्बुरस्त्रियाम् इत्यमरः। शष्पोः बालतृणं घासः इत्यमरः। किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः

इत्यमरः।

**प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे**
**हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः।**
**अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्यदर्पा-**
**दित्यागन्तून् रमयति जनौ यत्र बन्धूनभिज्ञः।।३४।।**

**पदच्छेदः** - वत्सराजः + अत्र - वत्सराजोऽत्र। तालद्रुमवनं + अभूत् अत्र - तालद्रुमवनमभूदत्र। अत्र + उद्भ्रान्तः - अत्रोद्भ्रान्तः। बन्धून् + अभिज्ञः - बन्धूनभिज्ञः।

**अन्वयः** - अत्र वत्सराजः प्रद्योतस्य प्रियदुहितरम् जह्रे। अत्र तस्यैव राज्ञः हैमम् तालद्रुमवनम् अभूत् अत्र किल नलगिरिः दर्पात् स्तम्भम् उत्पाट्य उद्भ्रान्तः यत्र इति अभिज्ञः जनः आगन्तून् बन्धून् रमयति।

**अन्वयार्थः** - **अत्र** - उज्जयिन्याम्, **वत्सराजः** - वत्सदेशाधिपः उदयनः, **प्रद्योतस्य** - प्रद्योताभिधेयस्य, उज्जयिनीनरेशस्य, **प्रियदुहितरम्** - प्रियां पुत्रीम्, वासवदत्ताम्, **जह्रे** - उपहृतवान्। **अत्र** - उज्जयिन्याम्, **तस्यैव** - प्रद्योतस्यैव, **राज्ञः** - नरेशस्य, **हैमम्** - सुवर्णमयम्, **तालद्रुमवनम्** - तालवृक्षकाननम्, **अभूत्** - आसीत्। **अत्र** - उज्जयिन्याम्, **नलगिरिः** - नलगिरिनामको हस्ती, **दर्पात्** - मदात्, **स्तम्भम्** - स्थाणुम्, **उत्पाट्य** - उद्धृत्य, **उद्भ्रान्तः** - उद्भ्रमणं चकार, **इति** - अनेन प्रकारेण, **अभिज्ञः** - पूर्वोक्तकथाकोविदः, **जनः** - नरः, **आगन्तून्** - प्राग्धुणिकान्, अन्यस्मात् देशादागतान् **बन्धून्** - बान्धवान्, **रमयति** - विनोदयति।

**भावार्थः** - हे मेघ! उदयन उज्जयिन्यामेव वासवदत्तामपहृतवान्। अत्रैव प्रद्योतस्य राज्ञः सौवर्णतालवृक्षकाननमासीत्, अस्मिन्नेव प्रदेशे नलगिरिनामा उज्जयिनीनरेशगजः मदात् स्थूणमुत्पाट्य बभ्राम, एतादृशीः कथाः श्रावयित्वा कथाज्ञाता जनः देशान्तरादागतानां बान्धवानां मनांसि रमयति।

**समासः** - वत्सानां राजा - वत्सराजः (षष्ठीतत्पुरुषः)। प्रिया चासौ दुहिता च ताम् - प्रियदुहितरम् (कर्मधारयः)। तालानां द्रुमाः - तालद्रुमाः (षष्ठीतत्पुरुषः) तेषां वनम् तम् तालद्रुमवनम् (षष्ठीतत्पुरुषः)।

**कोशः** - दर्पोऽवलेपोऽहङ्कारः इत्यमरः। वार्तासम्भाव्ययोः किल इत्यमरः। प्रवीणे निपुणाभि-ज्ञनिष्णातशिक्षिताः इत्यमरः। स्युरावेशिक आगन्तुरतिथिनां गृहागते इत्यमरः।

**अलङ्कारः** - भाविक।

**पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः**
**शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदाद्।**
**योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः**
**प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः।। ३५।।**

**पदच्छेदः** - शैलोदग्राः + त्वमिव - शैलोदग्रास्त्वमिव।

**अन्वयः** - यत्र वाहाः पत्रश्यामाः दिनकरहयस्पर्धिनः शैलोदग्राः करिणः प्रभेदात् त्वमिव वृष्टिमन्तः योधाग्रण्यः संयुगे प्रतिदशमुखम् तस्थिवांसः चन्द्रहासव्रणाङ्कैः प्रत्यादिष्टाभरणरुचयः।

**अन्वयार्थः** - **यत्र** - उज्जयिन्याम्, **वाहाः** - घोटकाः, **पत्रश्यामाः** - पर्णश्यामाः हरितवर्णाः इत्यर्थः। **दिनकरहयस्पर्धिनः** - सूर्याश्वतुल्याः, वर्णेन वेगेन च सूर्याश्वतुल्या इति भावः। **शैलोदग्राः** - पर्वतेवोच्छ्रिताः, **करिणः** - गजाः, **प्रभेदात्** - मदस्रवणात्, **त्वमिव** - भवत्समानः, मेघेवेत्यर्थः, **वृष्टिमन्तः** - वर्षणशीलाः सन्तीति शेषः। **योधाग्रण्यः** - सेनानायकाः, **संयुगे** - शुद्धे, **प्रतिदशमुखम्** - रावणसमक्षम्, **तस्थिवांसः** - स्थिताः, **चन्द्रहासव्रणाङ्कैः** - रावणकरवालक्षतचिह्नैः, **प्रत्यादिष्टाऽऽभरणरुचयः** - तिरस्कृतभूषणकान्तिवन्तः सन्तीति भावः।

**भावार्थः** - हे मेघ! यत्रत्याः अश्वाः हरितवर्णत्वात् वेगाच्च सूर्याश्वसंघर्षणशीलाः सन्ति, पर्वतसमानोच्चाः गजाः मदजलवर्षणात् वृष्टिमन्तः सन्ति, श्रेष्ठायोद्धारः रणे रावणं प्रतियुद्धयन्तस्तदीयखड्गप्रहारचिह्नैः प्रत्याख्याताऽऽमरणकान्तयः सन्ति।

**समासः** - पत्रमिव श्यामाः - पत्रश्यामाः (कर्मधारयः)। दिनकरस्य हयाः - दिनकरहयाः (षष्ठीतत्पुरुषः) तैः स्पर्धन्ते तच्छीला इति दिनकरहयस्पर्धिनः। चन्द्रहासस्य व्रणानि चन्द्रहासव्रणानि (षष्ठीतत्पुरुषः) तान्येव अङ्कास्तैः चन्द्रहासव्रणाङ्कैः (रूपकसमासः)। आभरणानां रुचयः आभरणरुचयः (षष्ठीतत्पुरुषः) प्रत्यादिष्टा आभरणरुचयो यैस्ते - प्रत्यादिष्टाऽभरणरुचयः

(बहुव्रीहि)।

**कोशः** - वाजिवाहाऽर्वगन्धर्वहयसैन्धवसप्तयः इत्यमरः। खड्गे तु निस्त्रिंशचन्द्र-हासाऽसिरिष्टयः इत्यमरः। स्युःप्रभारुग्रुचित्वड्भाभाश्छविद्युतिदीप्तयः इत्यमरः।

**जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-**
**र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।**
**हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः**
**लक्ष्मीं पश्येल्ललितवनितापादरागाङ्कितेषु।। ३६।।**

**पदच्छेदः** - जालोद्गीर्णः + उपचितवपुः - जालोद्गीर्णैरुपचितवपुः। भवनशिखिभिः + दत्तनृत्योपहारः - भवनशिखिभिर्दत्तनृत्योपहारः। कुसुमसुरभिषु + अध्वखेदम् - कुसुमसुरभिष्वध्वखेदम्। पश्येत् + ललितवनितापादरागाङ्कितेषु - पश्येल्ललितवनितापादरागाङ्कितेषु। हर्म्येषु + अस्याः - हर्म्येष्वस्याः।

**अन्वयः** - जालोद्गीर्णैः केशसंस्कारधूपैः उपचितवपुः बन्धुप्रीत्या भवनशिखिभिः दत्तनृत्योपहारः कुसुमसुरभिषु ललितवनितापादरागाङ्कितेषु, हर्म्येषु यस्याः लक्ष्मीम् पश्यन् अध्वखेदम् नयेथाः।

**अन्वयार्थः** - **जालोद्गीर्णैः** - वातायननिर्गतैः, **केशसंस्कारधूपैः** - कामिनीवेणीसंस्कृतधूपैः, **उपचितवपुः** - परिपुष्टदेहः, **बन्धुप्रीत्या** - बान्धवस्नेहेन, **भवनशिखिभिः** - सदनमयूरैः, **दत्तनृत्योपहारः** - प्रदत्तनर्तनोपहारः, **कुसुमसुरभिषु** - पुष्प सौरभेषु, **ललितवनितापादरागाङ्कितेषु** - सुन्दराङ्गनाचरणलाक्षारुचि चिह्नितेषु, **हर्म्येषु** - अट्टालिकासु, **अस्याः** - उज्जयिन्याः, **लक्ष्मीम्** - शोभाम्, **पश्यन्** - विलोकयन्, **अध्वखेदम्** - मार्गपरिश्रमम्, **नयेथाः** - दुरीकुरु।

**भावार्थः** - हे मेघ! तत्रोज्जयिन्यां वातायनमार्गनिर्गतैः कामिनीकचवासनार्थैः गन्ध-द्रव्यधूपैः परिपुष्टशरीरः भ्रातृस्नेहेन सदनमयूरेण नृत्यद्वारा कृतातिथ्यः (त्वम्) पुष्पपरिमलेषु सुन्दरललनाचरणालक्तचिह्नितेषु भवनेषु उज्जयिन्याः शोभामवलोकयन् मार्गगमन-जन्यपरिश्रममपनय।

**समासः** - जालेभ्यः उद्गीर्णाः तैः (षष्ठीतत्पुरुषः)। केशानां संस्कारः - केशसंस्कारः (षष्ठीतत्पुरुषः) तस्य धूपस्तैः (षष्ठीतत्पुरुषः)। बन्धोः प्रीतिः तया बन्धुप्रीत्या (षष्ठीतत्पुरुषः)। उपचितं वपुर्यस्य स उपचितवपुः (बहुव्रीहि)। भवने शिखिनः भवनशिखिनः तैः (सप्तमीतत्पुरुषः)। नृत्यमेवोपहारः नृत्योपहारः (रूपकसमासः) दत्तः नृत्योपहारः यस्मै सः (बहुव्रीहि)। कुसुमैः सुरभिषु - कुसुमसुरभिषु (तृतीया-तत्पुरुषः)। ललिताश्च ताः वनिताः - ललितावनिताः (कर्मधारयः), पादयोः रागः - पादरागः (सप्तमी-तत्पुरुषः) ललितवनितानां पादरागः - ललितवनितापादरागः (षष्ठीतत्पुरुषः) तेन अङ्कितेषु - ललित-वनितापादरागाङ्कितेषु (तृतीयातत्पुरुषः)।

**कोशः** - जालं गवाक्ष आनाये जालके कपटे गणे इति यादवः। निदिग्धोपचिते इत्यमरः। उपायनमुपग्राह्यमुपहारस्तथोपदा इत्यमरः। ललितं त्रिषु सुन्दरम् इति शब्दार्णवः। अयनं वर्त्म मार्गाऽध्वः इत्यमरः। हर्म्यादि धनिनां वासः इत्यमरः।

**भर्तुः कण्ठच्छविरितिगणैः सादरं वीक्ष्यमाणः**
**पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य।**
**धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-**
**स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः।। ३७।।**

**अन्वयः** - भर्तुः कण्ठच्छविः इति गणैः सादरं वीक्ष्यमाणः कुवलयरजोगन्धिभिः तोयक्रीडानिरत-युवतिस्नानतिक्तैः गन्धवत्याः मरुद्भिः धूतोद्यानं त्रिभुवनगुरोः चण्डीश्वरस्य पुण्यं धाम यायाः।

**अन्वयार्थः** - **भर्तुः** - स्वामिनो नीलकण्ठस्य, **कण्ठच्छविः** - गलशोभा, **इति** - अस्माद्धेतोः, **गणैः** - दूतैः, **सादरम्** - सम्मानपूर्वकम्, **वीक्ष्यमाणः** - अवलोक्यमानः (सन्), **कुवलरजोगन्धिभिः** - पद्मपरागसुगन्धितैः, **तोयक्रीडानिरतयुवतिस्नानतिक्तैः** - जलक्रीडातत्परवनिता-ऽवगाहनसुगन्धितैः, **गन्धवत्याः** - एतन्नामिकायाः सरितः, **मरुद्भिः** - वायुभिः, **धूतोद्यानम्** - प्रकम्पिताऽऽरामम्, **त्रिभुवनगुरोः** - त्रैलोक्यनाथस्य, **चण्डीश्वरस्य** - भवानीपतेः, **पुण्यम्** - पवित्रम्, **धाम** - स्थानम्, महाकालमिति भावः, **यायाः** - गच्छेः।

**भावार्थः** - हे मेघ! शिवस्य गलशोभामिव त्वां प्रथमाः सादरमवलोकयिष्यन्ति त्वञ्चोज्जयिन्यां पद्मपरिमलसुगन्धितैः जलक्रीडाऽऽसक्तकामिनीस्नान (चन्दनादिभिः) सुरभितैः गन्धवत्याः नद्याः वायुभिः कम्पिताऽऽरामं भवानीभर्तुः महाकालेश्वरस्य पवित्रं धाम गच्छ।

**समासः** - कण्ठस्येव छविर्यस्य स कण्ठच्छविः (बहुव्रीहि)। कुवलयानां रजः - कुवलयरजः (षष्ठीतत्पुरुषः) तेषां गन्धः - कुवलयरजोगन्धः (षष्ठीतत्पुरुषः) सः, येषामस्तीति तैः - कुवलयरजोगन्धिभिः (बहुव्रीहि)। तोये क्रीडा - तोयक्रीडा (सप्तमीतत्पुरुषः) तस्यां निरताः - तोयक्रीडानिरताः, ताश्च युवतयः - तोयक्रीडानिरतयुवतयः (कर्मधारयः) तासां स्नानं (षष्ठीतत्पुरुषः) तेन तिक्तताःस्तैः (तृतीयातत्पुरुषः)। कम्पितानि उद्यानानि यस्मिन् तत् कम्पितोद्यानम् (बहुव्रीहि)। त्रयाणां भुवनानां समाहारः - त्रिभुवनम् (समाहारद्विगुः) तस्य गुरुः, तस्य (षष्ठीतत्पुरुषः)।

**कोशः** - कण्ठो गलः इत्यमरः। गणस्तु गणनायां स्याद् गणशे प्रमथे चये इति शब्दार्णवः। प्रमथाः स्युः पारिषदाः इत्यमरः। स्नानीयेऽभिषये स्नानम् इति यादवः। कटुतिक्तकषायास्तु सौरभे च प्रकीर्तिताः इति हलायुधः। गृहदेहत्विट् प्रभावाधामान्यथ इत्यमरः।

**अलङ्कारः** - उदात्तम्।

**अप्यन्यस्मिञ्जलधर! महाकालमासाद्य काले**
**स्थातव्यं ते नयनविषयं यावदत्येति भानुः।**
**कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाधनीया**
**मामन्द्राणां फलमविकलं लप्स्यते गर्जितानाम्।। ३८।।**

**अन्वयः** - हे जलधर! महाकालं अन्यस्मिन् अपि काले आसाद्य ते स्थातव्यम्, यावत् भानुः नयनविषयम् अत्येति। श्लाघनीयाम् शूलिनः सन्ध्याबलिपटहतां कुर्वन् आमन्द्राणाम् गर्जितानाम् अविकलम् फलम् लप्स्यसे।

**अन्वयार्थः** - **हे जलधर!** - हे मेघ! **महाकालम्** - एतन्नामकज्योतिर्लिङ्गस्थानम्, अन्यस्मिन्नपि - अपरस्मिन्नपि, **काले** - समये, **आसाद्य** - प्राप्य, **ते** - त्वया, **स्थातव्यम्** - निवसितव्यम्, **यावत्** - कालम्, **भानुः** - दिनकरः, **नयनविषयम्** - दृष्टिगोचरताम्, **अत्येति** - अतिक्रामति, सूर्यास्तसमयपर्यन्तं त्वया तत्र स्थातव्यम् इति भावः। **श्लाघनीयाम्** - प्रशंसनीयाम्, **शूलिनः** - महाकालेश्वरस्य, शिवस्येत्यर्थः, **सन्ध्याबलिपटहताम्** - सायङ्कालिकपूजापटह-भावम्, **कुर्वन्** - विदधत्, **आमन्द्राणाम्** - ईषद्गम्भीराणाम्, **गर्जितानाम्** - स्तनितानाम्, **अविकलम्** - सम्पूर्णम्, **फलम्** - पुण्यम्, **लप्स्यसे** - प्राप्स्यसि।

**भावार्थः** - हे मेघ! सन्ध्यातिरिक्तसमयेऽपि महाकालेश्वरस्य पुण्यं धाम गत्वा त्वं सूर्यो यावत्कालपर्यन्तमस्ताचलं न गच्छेत् तावत्कालपर्यन्तं स्थास्यसि। (यतो हि) सायन्तनपूजापटहतां विदधत् ईषद्गम्भीरनादस्त्वं गर्जितानां सम्पूर्णं फलं प्राप्स्यसि।

**समासः** - धरतीति धरः जलानां धरः - जलधरः (षष्ठीतत्पुरुषः)। नयनयोः विषयः - नयनविषयः (षष्ठीतत्पुरुषः) तम्। सन्ध्यायाः बलिः - सन्ध्याबलिः (षष्ठीतत्पुरुषः) तस्य पटहः सन्ध्याबलिपटहः (षष्ठीतत्पुरुषः) तस्य भावस्तम् - सन्ध्याबलिपटहताम्। विगताः कलाः यस्मात् त् विकलम् (बहुव्रीहि) न विकलम् - अविकलम् (नञ्समासः)।

**कोशः** - यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः। शिवः शुली महेश्वरः इत्यमरः। बलिः पूजापहारे च इति वैजयन्ती। कलो मन्द्रस्तु गम्भीरे इत्यमरः। आनकः पटहोऽस्त्री स्यात् इत्यमरः। स्तनितं गर्जितं मेघनिर्घोषेरसितादि च इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्।

**पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः**
**रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।**
**वेश्यास्त्वत्तो नखपदसुखान् प्राप्यवर्षाग्रबिन्दू-**
**नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्।। ३९।।**

**पदच्छेदः** - क्वणितरशनाः + तत्र - क्वणितरशनास्तत्र। रत्नच्छायाखचितवलिभिः + चामरैः - रत्नच्छायाखचितवलिभिश्चामरैः। वेश्या + त्वत्तः - वेश्यास्त्वत्तः।

**अन्वयः** - तत्र पादन्यासैः क्वणितरशनाः लीलावधूतैः रत्नच्छायाखचितबलिभिः चामरैः क्लान्तहस्ताः वेश्याः त्वत्तः नखपदसुखान् वर्षाग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते।

**अन्वयार्थः** - **तत्र** - सन्ध्याकाले, **पादन्यासैः** - चरणनिक्षेपैः, **क्वणितरशनाः** - मुखरितमेखलाः, **लीलावधूतैः** - विलाससञ्चलितैः, **रत्नच्छायाखचितवलिभिः** - कङ्कणमणिप्रभाव्याप्तदण्डैः, **चामरैः** - बालव्यजनैः, **क्लान्तहस्ताः** -

खिन्नहस्ताः, **वेश्याः** - वाराङ्गनाः, **त्वत्तः** - भवतः मेघादिति भावः, **नखपदसुखान्** - नखक्षतसुखदान्, **वर्षाग्रबीन्दून्** - वृष्टिप्रथमकणान्, **प्राप्य** - लब्ध्वा, **त्वयि** - मेघे, **मधुकरश्रेणिदीर्घान्** - भ्रमरपंक्तीवायतान्, **कटाक्षान्** - उपाङ्गान्, **आमोक्ष्यन्ते** - परित्यक्ष्यन्ति।

**भावार्थः** - हे मेघ! सायंकाले चरणविक्षेपैः मुखरितमेखलाः सविलासं मणिमयदण्डयुक्तचामर-सञ्चालनेन खिन्नहस्ताः गणिकाः त्वत्तः नखक्षतशान्तिप्रदान् वृष्टेः प्रथमबिन्दून् लब्ध्वा त्वयि भ्रमरपंक्ती-वायतान् कटाक्षान् परित्यक्ष्यन्ति। कामिनीकटाक्षरूपं शिवस्तुतिफलं सद्यः लप्स्यसे इति भावः।

**समासः** - पादयोः न्यासः - पादन्यासः (षष्ठीतत्पुरुषः) तैः क्वणिता रशना यासां ताः पादन्यासक्वणितरशनाः (बहुव्रीहि)। लीलया अवधूतैः - लीलावधूतैः (तृतीयातत्पुरुषः)। रत्नानां छाया - रत्नच्छाया (षष्ठीतत्पुरुषः) तया खचिता वलयो येषां तैः - रत्नच्छायाखचितवलिभिः (बहुव्रीहि)। क्लान्तौ हस्तौ यासां ताः क्लान्तहस्ताः (बहुव्रीहि)। नखानां पदानि - नखपदानि (षष्ठीतत्पुरुषः) तेषु सुखाः तान् नखपदसुखान् (सप्तमीतत्पुरुषः)। अग्राश्च ते बिन्दवः - अग्रबिन्दवः (कर्मधारयः) वर्षस्य अग्रबिन्दवः - वर्षाग्रबिन्दवः (षष्ठीतत्पुरुषः)। मधुकराणां श्रेणी मधुकर श्रेणी तद्वद्दीर्घान् मधुकरश्रेणिदीर्घान् (उपमानानि सामान्यवचनैरिति समासः)।

**कोशः** - पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु इत्यमरः। बलिश्चामरदण्डे च जरा विश्लथचर्मणि इति विश्वः। करोपहारयोः पुंसि वलिः इत्यमरः। सुखहेतौ सुखे सुखम् इति शब्दार्णवः। दीर्घमायतम् इत्यमरः। कटाक्षोऽपाङ्गदर्शने इत्यमरः। पृषन्ति बिन्दुतृषतः पुमांसो विप्रुषः स्त्रियाम् इत्यमरः।

**अलङ्कारः** - लुप्तोपमा।

**पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः**
**सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।**
**नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां**
**शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या।। ४०।।**

**पदच्छेदः** - पश्चात् + उच्चैः + भुजतरुवनं - पश्चादुच्चैर्भुजतरुवनम्। मण्डलेन + अभिलीनः - मण्डलेनाभिलीनः। पशुपतेः + आर्द्रनागाजिनेच्छाम् - पशुपतेरार्द्रनागाजिनेच्छाम्। दृष्टभक्तिः + भवान्या - दृष्टभक्तिर्भवान्या।

**अन्वयः** - पश्चात् नृत्यारम्भे प्रतिनवजपापुष्परक्तम् सान्ध्यम्, तेजः दधानः उच्चैः भुजतरुवनम् मण्डलेन अभिलीनः भवान्या शान्तोद्वेगस्तिमितनयनम् दृष्टभक्तिः पशुपतेः आर्द्रनागाजिनेच्छाम् हर।

**अन्वयार्थः** - **पश्चात्** - सायन्तनपूजावसाने, **नृत्यारम्भे** - ताण्डवोपक्रमे शिवस्योति शेषः, **प्रतिनवजपापुष्परक्तम्** - नूतनजपाकुसुमारुणम्, **सान्ध्यम्** - सन्ध्याकालिकम्, **तेजः** - कान्तिम्, **दधानः** - धारयन्, **उच्चैः** - उन्नतम्, **भुजतरुवनम्** - बाहुवृक्षकाननम्, **मण्डलेन** - वृत्ताकारतया, **अभिलीनः** - अभिव्याप्तः, (सन्) **भवान्या** - पार्वत्या, **शान्तोद्वेगस्तिमितनयनम्** - विगतभयस्थिरनेत्रम् यथास्यात्तथा, (त्वम्) **दृष्टभक्तिः** - अवलोकितानुरागः, **पशुपतेः** - महाकालेश्वरस्य, **आर्द्रनागाजिनेच्छाम्** - क्लिन्नगजचर्माऽऽकांक्षाम्, **हर** - दूरी कुरु, त्वमेव गजवर्मास्थानी कृष्णवर्णत्वेन भवेति भावः।

**भावार्थः** - सायङ्कालिकपूजावसाने ताण्डवारम्भे नवीनजपापुष्पाऽऽरुण्यमिव सायङ्कालिकं प्रकाशं धायरन् उच्छ्रितबाहुरूपे वृक्षवने मण्डलाकारेणाच्छन्नः सन् पार्वत्यां विगतभयस्थिरलोचनेनाव-लोक्यमानः, अवलोकितपूज्यानुरागस्त्वं शिवस्य आर्द्रागजचर्माऽऽभिलाषमपनय।

**समासः** - पशूनां पतिः - पशुपतिः (षष्ठीतत्पुरुषः) तस्य। नृत्यस्य, आरम्भे - नृत्यारम्भे (षष्ठीतत्पुरुषः), नवं प्रतिगतं - प्रतिनवं च तत् जपापुष्पम् - प्रतिनवजपापुष्पम् (कर्मधारयः) तद्वत् रक्तम् - (उपमानकर्मधारयः)। उच्चैर्भुजा एव तरवः (रूपकसमासः) भुजतरूणां वनम् - उच्चैर्भुजतरुवनम् (षष्ठीतत्पुरुषः)। शान्त उद्वेगो ययोस्ते शान्तोद्वेगे (बहुव्रीहि) अत एव स्तिमिते नयने यस्मिंस्तत् यथा तथा (बहुव्रीहि)।

**कोशः** - नाट्यं नृत्यञ्च नर्तने इत्यमरः। प्रत्यग्रोऽभिनवो नव्यः इत्यमरः। उद्वेगरत्त्वदिते क्लेशे भये मन्थरगामिनि इति शब्दार्णवः। मण्डलं परिधौ कोष्ठे देशे द्वादशराशिषु इति मेदिनी। स्तिमितोऽचञ्चलाद्रेयः इति मेदिनी। आर्द्रं क्लिन्नं निमित्तं स्तिमितं सम्मुन्नतं मुक्तञ्च इत्यमरः। अजिनं चर्म कृत्तिः स्त्री इत्यमरः।

**अलङ्कारः** - रूपकम्, लुप्तोपमा, निदर्शना।

**गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं**
**रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।**
**सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वी**
**तोयोत्सर्गस्तनितमुखरो मास्मभूर्विक्लवास्ताः।।४१।।**

**पदच्छेदः** - सूचिभेद्यैः + तमोभिः - सूचिभेद्यैस्तमोभिः।

**अन्वयः** - तत्र नक्तं रमणवसतिं गच्छन्तीनां योषितां सूचिभेद्यैः तमोभिः रुद्धालोके नरपतिपथे कनकनिकषस्निग्धया सौदामन्या उर्वीम् दर्शय तोयोत्सर्गस्तनितमुखरः मास्मभूः ताः विक्लवाः।

**अन्वयार्थः** - **तत्र** - उज्जयिन्याम्, **नक्तम्** - निशायाम्, **रमणवसतिम्** - प्रेमीसदनम्, **गच्छन्तीनाम्** - यान्तीनाम्, **योषिताम्** - स्त्रीणाम्, अभिसारिकाणामित्यभिप्रायः। **सूचिभेद्यैः** - निविडैः, **तमोभिः** - अन्धकारैः, **रुद्धालोके** - आवृत्तप्रकाशे, **नरपतिपथे** - राजमार्गे, **कनकनिकषस्निग्धया** - सुवर्णशाणरोखातेजसा, **सौदामन्या** - तडिता, **उर्वीम्** - पृथ्वीम्। **दर्शय** - आलोकय, **तोयोत्सर्गस्तनितमुखरः** - वृष्टिगर्जनवाचालः, **मास्मभूः** - नो भव, (यतो हि) **ताः** - प्रियसदनगन्तुमुत्सुकाः अभिसारिकाः, **विक्लवाः** - विह्वला।

**भावार्थः** - हे मेघ! उज्जयिन्यां रात्रौ कान्ताभवनं यान्तीनां अभिसारिकाणां निविडैस्तमोभिः प्रकाशरहिते राजमार्गे स्वर्णशलाकातेजसेव विद्युता मार्गनिदर्शनं कुरु। वृष्टिगर्जनेन ताः न भेतव्याः स्वभावेन ताः विक्लवाः भवन्ति।

**समासः** - रमणानां वसतिः ताम् - रमणवसतिम् (षष्ठीतत्पुरुषः)। रुद्धः आलोकः यस्मिंस्तस्मिन् रुद्धालोके (बहुव्रीहि)। नराणां पतिः नरपतिः (षष्ठीतत्पुरुषः) तस्य पथे नरपतिपथे (षष्ठीतत्पुरुषः)। सूचिभिः भेद्याः (तृतीयातत्पुरुषः) तैः। कनकस्य निकषः कनकनिकषः (षष्ठीतत्पुरुषः)। तद्वत् स्निग्धं यस्याः तथा (व्यधिकरण बहुव्रीहि), तोयोत्सर्गश्च स्तनितश्च - तोयोत्सर्गस्तनितम् (द्वन्द्वसमासः) ताभ्यां मुखरः (तृतीयातत्पुरुषः)।

**कोशः** - दोषा च नक्तञ्च रजनाविति इत्यमरः। आलोको दर्शनोद्योतौ इत्यमरः। तडित्सौदामिनी विद्युच्चञ्चला चपला अपि इत्यमरः। वसुधौर्वी वसुन्धरा इत्यमरः।

**अलङ्कारः** - लुप्तोपमा, काव्यलिङ्गम्।

**तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां**
**नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः।**
**दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं**
**मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।। ४२।।**

**पदच्छेदः** - पुनः + अपि - पुनरपि। वाहयेत् + अध्वशेषं - वाहयदध्वशेषम्।

**अन्वयः** - चिरविलसनात् खिन्नविद्युत्कलत्रः भवान् सुप्तपारावतायाम् कस्यांचित् भवनवलभौ ताम् रात्रिम् नीत्वा सूर्ये दृष्टे पुनरपि अध्वशेषम् वाहयेत्, सुहृदाम् अभ्युपेताऽर्थकृत्याः न मन्दायन्ते खलु।

**अन्वयार्थः** - (हे मेघ) **चिरविलसनात्** - बहुकालं यावत्स्फुरणात्, **खिन्नविद्युत्कलत्रः** - श्रान्तचञ्चलभार्यः, **भवान्** - मेघः, **सुप्तपारावतायाम्** - निद्रितकपोतानाम्, **कस्यांचिद्** - अन्यतमायाम्, **भवनवलभौ** - हर्म्याच्छादनोपरिभागे, **तां रात्रिम्** - तां रजनीम्, **नीत्वा** - व्यतीत्य, **सूर्ये** - भानौ, **दृष्टे** - उदिते, **पुनरपि** - भूयोऽपि, **अध्वशेषम्** - मार्गावशेषम्, **वाहयेत्** - प्राप्नुयात्, **सुहृदाम्** - मित्राणाम्, **अभ्युपेतार्थकृत्याः** - अङ्गीकृतक्रियाः, (जनाः), **न खलु मन्दायन्ते** - नैव मन्दाः भवन्ति।

**भावार्थः** - बहुकालं यावत् स्फुरणात् खिन्नचञ्चलभार्यः त्वं सुप्तपारावत् कस्मिंश्चिद् भवनस्योपरिभागे तां रात्रिमतिवाह्य सूर्योदये सति पुनः मार्गावशेषं वाहयेः। यतो हि मित्राणामङ्गीकृतकर्तव्याः जनाः न मन्दायन्ते।

**समासः** - चिरं विलसनं तस्मात् (सुप्सुपेतिसमासः)। खिन्नं विद्युदेव कलत्रं यस्य सः - खिन्नविद्युत्कलत्रः (बहुव्रीहि)। सुप्ताः पारावताः यस्यां सा सुप्तपारावता (बहुव्रीहि) तस्याम्। भवनस्य वलभी - भवनवलभी (षष्ठीतत्पुरुषः) तस्याम्। अध्वनः शेषम् - अध्वशेषम् (षष्ठीतत्पुरुषः)। अभ्युपेता अर्थस्य कृत्या यैस्ते अभ्युपेतार्थकृत्याः (बहुव्रीहि)।

**कोशः** - कलत्रं श्रेणिभार्ययोः इत्यमरः। पारावतः कलरवः कपोतोऽथ इत्यमरः। आच्छादन्तु वलभी छादने वक्रदारुणि इत्यमरः। आच्छादनं स्याद्वलभी गृहाणाम् इति हलायुधः। कृत्याः क्रिया देवतयोः कार्ये स्त्री कुपिते त्रिषु इति यादवः।

**अलङ्कारः** - एकदेशविवर्तिरूपक, अर्थान्तरन्यास।

**तस्मिन्काले नयनसलिलं योषितां खण्डितानां**
**शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।**
**प्रालेयास्त्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः**
**प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः।।४३।।**

**अन्वयः** - तस्मिन् काले प्रणयिभिः खण्डितानाम् योषिताम् नयनसलिलम् शान्तिम् नेयम्। अतः भानोः वर्त्म आशु त्यज। सः अपि नलिन्याः कमलवदनात् प्रालेयास्त्रम् हर्तुम् प्रत्यावृत्तः त्वयि कररुधि अनल्पाभ्यसूयः स्यात्।

**तस्मिन्** - पूर्वोक्ते, **काले** - समये, सूर्योदयसमय इत्यर्थः। **प्रणयिभिः** - रमणैः, **खण्डितानाम्** - नायिकाविशेषाणाम्, **नयनसलिलम्** - नेत्राम्बु अश्रुरित्यर्थः, **शान्तिम्** - प्रशमनम्, **नेयम्** - नेतव्यम्। अतः **भानोः** - दिनकरस्य, **वर्त्म** - पन्थानम्, **आशु** - शीघ्रम्, **त्यज** - मुञ्च। **सः** - सूर्यः अपि, **नलिन्याः** - पद्मिन्याः, **कमलवदनात्** - पद्ममुखात्, **प्रालेयास्त्रम्** - नीहारबिन्दुम्, **हर्तुम्** - दूरीकर्तुम्, प्रत्यावृत्तः (सन्) **त्वयि** - मेघे, **कररुधि** - किरणावरोधे सति, **अनल्पाभ्यसूयः** - प्रकामेर्ष्यः, **स्यात्** - भवेत्।

**भावार्थः** - हे मेघ! सूर्योदयकाले, वल्लभैः खण्डितानां कामिनीनां नेत्राश्रु शमनीयं भवत्यतः भानुपथं त्वरितं मुञ्च। यतो हि सूर्योऽपि नलिन्या पद्मरूपान्मुखान्मिहिकारूपमश्रु निवारयितुं प्रत्यागतः (भवति) तस्मिन् काले त्वयि तदीयकरावरोधके सति सः त्वां प्रत्यधिकेर्ष्य भवेत्।

**समासः** - नयनयोः सलिलं - नयनसलिलम् (षष्ठीतत्पुरुषः)। कमलमेव वदनम् - कमलवदनम् (रूपककर्मधारयः) तस्मात्। न अल्पा - अनल्पा (नञ्समासः) अनल्पा अभ्यसूया यस्य स - अनल्पाभ्यसूयः (बहुव्रीहि)।

**कोशः** - अयनं वर्त्म मार्गाऽध्व इत्यमरः। सलिलं कमलं जलम् इत्यमरः। तृणेऽम्बुजे नलं वा तु राज्ञि नाले तु न स्त्रियाम् इति शब्दार्णवः। प्रालेयं मिहिकाचार्था इत्यमरः। अस्रकोणे कचे पुंसि क्लीबमश्रुणि शोणिते इति मेदिनी। वलिहस्तांशवः कराः इत्यमरः।

**अलङ्कारः** - काव्यलिङ्गम्, समासोक्ति, श्लेषम्।

**गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने**
**छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।**
**तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्-**
**मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि।।४४।।**

**पदच्छेदः** - सरितः + चेतसि + इव - सरितश्चेतसीव। तस्मात् + अस्याः - तस्मादस्याः। कुमुदविशदानि + अर्हसि - कुमुदविशदान्यर्हसि।

**अन्वयः** - गम्भीरायाः सरितः चेतसि इव प्रसन्ने पयसि प्रकृतिसुभगः ते याऽऽत्मा अपि प्रवेशम् लप्स्यते। तस्मात् अस्याः कुमुदविशदानि चटुलशफरोद्वर्तनप्रेक्षितानि त्वम् धैर्यात् मोघीकर्तुम् न अर्हसि।

**अन्वयार्थः** - हे मेघ! **गम्भीरायाः** - एतन्नामिकायाः, **सरितः** - नद्याः, **चेतसि** - मानसे, **इव** - यथा, **प्रसन्ने** - स्वच्छे, **पयसि** - जले, **प्रकृतिसुभगः** - शाश्वतिकमनोहरः, **ते** - तव मेघस्येति यावत्, **छायात्माऽपि** - प्रतिबिम्बस्वरूपात्माऽपि; **प्रवेशम्** - निवेशम्, **लप्स्यते** - प्राप्स्यति। **तस्मात्** - तत्कारणात्, **तस्याः** - गम्भीरायाः, **कुमुदविशदानि** - कैरवोच्च्वलानि, **चटुलशफरोद्वर्तनप्रेक्षितानि** - चञ्चलमत्स्योल्लुण्ठनानि, **त्वम्** - मेघः, **धैर्यात्** - धीरत्वात्, **मोघीकर्तुम्** - विफलीकर्तुम्, **न अर्हसि** - न योग्योऽसि।

**भावार्थः** - हे मेघ! गम्भीरायाः प्रसन्नहृदय इव स्वच्छे जले प्रतिबिम्बरूपेण प्रविष्टो हि त्वं गम्भीरया नद्या कयाचिदुदात्तनायिकयेन चञ्चलमत्स्योल्लुण्ठनरूपैरवलोकनै-रवलोकयिष्यसे। त्वमपि धैर्यमाश्रित्य तदवलोकनं निष्फली कर्तुम् न समर्थोऽसि।

**समासः** - प्रकृत्या सुभगः - प्रकृतिसुभगः (ततीयातत्पुरुषः)। छाया चासौ आत्मा च छायात्मा (कर्मधारयः)। कुमुदानीव विशदानि - कुमुदविशदानि (उपमानकर्मधारयः)। चटुलानि च तानि शफरोद्वर्तनानि चटुलशफरोद्वर्तनानि (कर्मधारयः), तान्येव प्रेक्षितानि - चटुलशफरोद्वर्तनप्रेक्षितानि (रूपकसमासः)।

**कोशः** - चित्तन्तु चेतो हृदयम् इत्यमरः। सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे। तुरीयांशे श्रीमति च सुभगः इति शब्दार्णवः। सिते कुमुदे कैरवे इत्यमरः। त्रिषु स्याच्चटुलं शीघ्रम् इति विश्वः।

**अलङ्कारः** - उपमा, रूपकम्।

**तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं**
**नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।**
**प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि**
**ज्ञातस्वादो विवृतजघनं को विहातुं समर्थः।। ४५।।**

**पदच्छेदः** - किञ्चित् + करधृतं + इव - किञ्चित्करधृतमिव। कथं + अपि - कथमपि।

**अन्वयः** - हे सखे! प्राप्तवानीरशाखम् किञ्चित्करधृतम् इव मुक्तरोधोनितम्बम् नीलम् तस्याः सलिलवसनम् नीत्वा लम्बमानस्य ते प्रस्थानम् कथमपि भावि ज्ञातस्वादः कः विवृतजघनाम् विहातुम् समर्थः।

**अन्वयार्थः** - **हे सखे** - हे मित्र! **प्राप्तवानीरशाखम्** - लब्धवेतसशाखम्, **किञ्चित्करधृतम्** - ईषत् हस्तगृहीतम्, **इव** - यथा (स्थितम्), **मुक्तरोधोनितम्बम्** - परित्यक्ततटकटिं, **नीलम्** - श्यामलम्, **तस्याः** - गम्भीरायाः, **सलिलवसनम्** - जलाम्बरम्, **नीत्वा** - अपहृत्य, **लम्बमानस्य** - जलभारावनतस्य, **ते** - मेघस्य, **प्रस्थानम्** - प्रयाण्, **कथमपि** - केनापिप्रकारेण, **भावि** - भविष्यति। यतो हि **ज्ञातस्वादः** - अनुभूतकामिनीसंभोगसुखः, **कः** - पुरुषः, **विवृतजघनाम्** - प्रदर्शित-कटि-पूर्वभागाम्, **विहातुम्** - त्यक्तुम्, **समर्थः** - योग्यः।

**भावार्थः** - हे मेघ! वेतसशाखाप्राप्ता ईषद्धस्तगृहीतमिव त्यक्ततटरूपनितम्ब कृष्णवर्णं जलरूप-वस्त्रमपनीय तव गम्भीरायाः नद्याः प्रस्थानं कष्टेन भविष्यति! यतो हि अनुभूतकामिनीसंभोगसुखः कः पुरुष एवं स्यात् यः प्रदर्शितजघनां नारीं त्यक्तुम् (अनुपभोक्तुम्) समर्थो भवेत्।

**समासः** - प्राप्ता वानीरशाखा येन तत् प्राप्तवानीरशाखम् (बहुव्रीहि)। करेण धृतम् - करधृतम् (तृतीयातत्पुरुषः)। रोध एवं नितम्बः रोधोनितम्बः (रूपकसमासः) मुक्तः रोधोनितम्बो येन तत् - मुक्तिरोधोनितम्बम् (बहुव्रीहि)। सलिलमेव वसनं तत् - सललिवसनम् (रूपक कर्मधारयः) ज्ञातः स्वादो येन सः ज्ञातस्वादः (बहुव्रीहि)। विवृतं जघनं यस्याः ताम् विवृतजघनाम् (बहुव्रीहि)।

**कोशः** - कूलं रोधश्च तीरश्च प्रतीरश्च तटं त्रिषु इत्यमरः। नितम्बः पश्चिमे भागेऽद्रि कटके कटौ इति यादवः। जघनं स्यात् कटौ पूर्वश्रोणिभागापरांशयोः इति यादवः।

**अलङ्कारः** - उत्प्रेक्षा, अर्थान्तरन्यास।

**त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः**
**स्त्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।**
**नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते**
**शीतो वायुः परिणमयिता काननोदुम्बराणाम्।। ४६।।**

**पदच्छेदः** - नीचैः + वास्यति + उपजिगमिषोः + देवपूर्वं - नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वम्।

**अन्वयः** - त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः स्त्रोतोररन्ध्रध्वनितसुभगम् दन्तिभिः पीययानः काननोदुम्बराणाम् परिणमयिता शीतो वायुः देवपूर्वम् गिरिम् उपजिगमिषोः ते नीचैः वास्यति।

**अन्वयार्थः** - (हे मेघ!) **त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्य** - त्वदवृष्टिवर्धितपृथ्वीगन्ध-संस्पर्थसुरभिः, **स्त्रोतोरन्ध्रध्वनितसुभगम्** - शुण्डाग्रछिद्रशब्दसुन्दरम् यथा स्यात्तथा, **दन्तिभिः** - गजैः, **पीयमानः** - आघ्रायमाणः, **काननोदुम्बराणाम्** - वन्यहेमदुग्धकानाम्, **परिणमयिता** - परिपाकयिता, **शीतः** - हिमः, **वायुः** - पवनः, **देवपूर्वम्** - 'देव'शब्दपूर्वकम्, **गिरिम्** - पर्वतम्, 'देवगिरि'पर्वतमित्यर्थः, **उपजिगमिषोः** - यियासोः, **ते** - मेघस्य, **नीचैः** - शनैः, **वास्यति** - प्रापयिष्यतीत्यर्थः।

**भावार्थः** - (हे मेघ!) वृष्ट्युपबृंहितावनिसौरभसंपन्नं गजैः शुण्डाग्रछिद्रैः सशब्दमाघ्रायमाणः वन्योदुम्बरफलानां परिणमयिता शीतलः पवनः देवगिरिं यियासोस्ते नीचैः वास्यति।

**समासः** - तव निष्यन्दः त्वन्निष्यन्दः (षष्ठीतत्पुरुषः) तेन उच्छ्वसिता (तृतीयातत्पुरुषः) त्वन्निष्यन्दच्छ्वसिता चासौ वसुधा च - त्वन्निष्यन्दोच्छ्वसितवसुधा (कर्मधारयः) तस्याः गन्धः (षष्ठीतत्पुरुषः) तस्य सम्पर्कैः (षष्ठीतत्पुरुषः) तेन रम्यः

- त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः (तृतीयातत्पुरुषः) स्रोतसो रन्ध्राणि - स्रोतोरन्ध्राणि (षष्ठीतत्पुरुषः) तेषां ध्वनितम् (षष्ठीतत्पुरुषः) काननेषु उदुम्बराणाम् काननोदुम्बराणाम् (सप्तमीतत्पुरुषः)। देव शब्दः पूर्वो यस्य सः देवपूर्वः (बहुव्रीहि)।

**कोशः** - स्रोत इन्द्रिये निम्नगारये इत्यमरः। दन्तो दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः इत्यमरः। उदुम्बरो जन्तुफलो यज्ञाङ्गो हेम दुग्धकः इत्यमरः।

**तत्र स्कन्दं नियतवसतिं पुष्पमेधीकृतात्मा**
**पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः।**
**रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-**
**मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः।। ४७।।**

**पदच्छेदः** - भवान् + व्योमगङ्गाजलार्द्रैः - भवान्व्योमगङ्गाजलार्द्रैः। रक्षाहेतोः + नवशशिभृता - रक्षाहेतोर्नवशशिभृता। चमूनां + अत्यादित्यं - चमूनामत्यादित्यम्। तत् + हि - तद्धि।

**अन्वयः** - तत्र नियतवसितम् स्कन्दम् पुष्पमेघीकृतात्मा भवान् व्योमगङ्गाजलार्द्रैः पुष्पासारैः स्नपयतु। तत् हि वासवीनाम् चमूनाम् रक्षाहेतोः नवशशिभृता हुतवहमुखे, सम्भृतम् अत्यादित्यम् तेजः।

**अन्वयार्थः** - **तत्र** - देवगिरौ, **नियतवसितम्** - निश्चितनिवासवन्तम्, **स्कन्दम्** - कार्तिकेयम्, **पुष्पमेघीकृतात्मा** - कुसुमवर्षकमेघीकृतदेहः, **भवान्** - मेघः, **व्योमगङ्गाजलार्द्रैः** - देवनदीतोयक्लिन्नैः, **पुष्पसारैः** - कुसुमवृष्टिभिः, **स्नपयतु** - अभिषिञ्चतु। **तत्** - स्कन्दः, **वासवीनाम्** - इन्द्रसम्बन्धिनीनाम्, **चमूनाम्** - सेनानाम्, **रक्षाहेतोः** - रक्षणाय, **नवशशिभूता** - अभिनवहिमांशुधारिणा, **हुतवहमुखे** - अग्निवदने, **सम्भृतम्** - सञ्चितम्, **अत्यादित्यम्** - दिनकरातिशायि, **तेजः** - प्रतापः अस्ति, शंकरप्रतिमूर्ति एवाऽस्ति।

**भावार्थः** - हे मेघ! तत्र देवगिरौ पुष्पमेधीकृतविग्रहस्त्वं पुष्पसंपातैः कार्तिकेयमभिषिञ्चतु। सः स्कन्दः इन्द्रसम्बन्धिनीनां सैन्यानां रक्षणाय शंकरेण वह्निमुखे सञ्चितं तेज एवास्ति, शंकरप्रतिमूर्ति एवास्तीति भावः।

**समासः** - नियता वसतिर्यस्य स नियतवसतिः (बहुव्रीहि), तम्। पुष्पाणां मेघः - पुष्पमेघः (षष्ठीतत्पुरुषः)। अपुष्पमेघः पुष्पमेघः यथा सम्पद्यते तथा कृतः पुष्पमेघीकृतः, तथाविधः आत्मा यस्य स पुष्पमेघीकृतात्मा (बहुव्रीहि)। व्योम्नि गङ्गा व्योमगङ्गा (सप्तमीतत्पुरुषः) तस्याः जलम् (सप्तमीतत्पुरुषः), तेन आर्द्राः - व्योमगङ्गाजलार्द्राः (तृतीयातत्पुरुषः) तैः। पुष्पाणाम् आसारैः - पुष्पासारैः (षष्ठीतत्पुरुषः)। नवश्चासौ शशी - नवशशी (कर्मधारयः) तं बिभर्ति इति नवशशिभृत् तेन नवशशिभृता (उपपदसमासः)। हुतस्य वहः - हुतवहः (षष्ठीतत्पुरुषः) हुतवहस्य मुखे - हुतवहमुखे (षष्ठीतत्पुरुषः)। आदित्यमतिक्रान्तमिति - अत्यादित्यम् (मयूरव्यंसका)।

**कोशः** - पार्वतीनन्दनः स्कन्दनः इत्यमरः। धारासम्पात आसारः इत्यमरः। वासवो वृत्रहा वृषा इत्यमरः। ईश्वरः शर्व ईशानः पिनाकी शशिशेखरः इत्यमरः।

**अलङ्कारः** - रूपकम्, अर्थान्तरन्यासम्।

**ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी**
**पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।**
**धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं**
**पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः।। ४८।।**

**पदच्छेदः** - पावकेः + तं - पावकेस्तम्। पश्चात् + अद्रिग्रहणगुरुभिः + गर्जितैः + नर्तयेथाः - पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः।

**अन्वयः** - ज्योतिर्लेखावलयि गलितम् यस्य बर्हम् भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति। हरशशिरुचा धौतापाङ्गम् पावकेः तम् मयूरम् पश्यत् अद्रिग्रहणगुरुभिः गर्जितैः नर्तयेथाः।

**अन्वयार्थः** - **ज्योतिर्लेखावलयि** - कान्तिराजिमण्डलयुक्तम्, **गलितम्** - स्रस्तम्, पतितमिति भावः। **बर्हम्** - पिच्छम्, **भवानी** - गौरी, **पुत्रप्रेम्णा** - सुतस्नेहेन, **कुवलयदलप्रापि** - नीलकमलपत्रप्राप्यम्, यथा स्यात्तथा, **कर्णे** - कर्णे, **करोति** - आदधाति। **हरशशिरुचा** - शिवशशित्विषा, **धौतापाङ्गम्** - धवलितनयनप्रान्तम्, **पावकेः** - कार्तिकेयस्य, **तम्** - वर्णितम्, **मयूरम्** - बर्हिणम्, **पश्चात्** - स्कन्दाभिषेकानन्तरम्, **अद्रिग्रहणगुरुभिः** - देवगिरिप्रविध्वनिवद्धिगुणितैः, **गर्जितैः**

- स्तनितैः, **नर्तयेथाः** - नृत्यङ्कारय।

**भावार्थः** - हे मेघ! स्कन्दाभिषेचनानन्तरं कान्तिपङ्क्तिमण्डलान्वितं यस्य पिच्छं पार्वती सुतस्नेहेन नीलपद्मपत्रप्रापि श्रेत्रे धारयति, यस्यापाङ्गैः शिवशशि-चन्द्रिका-धवलितमस्ति। कार्तिकेयस्य तं मयूरं देवगिरिप्रतिध्वनिवर्द्धितैः गर्जितैः नर्तयेथाः।

**समासः** - धौतो अपाङ्गो यस्य तम् (बहुव्रीहि), पावकस्य अपत्यं पुमान्, तस्य, अद्रेः ग्रहणं (षष्ठीतत्पुरुषः) तेन गुरूणि तैः (तृतीयातत्पुरुषः)।

**कोशः** - अपाङ्गो नेत्रयोरन्तौ इत्यमरः।

**आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा**
**सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।**
**व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्**
**स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्।। ४९।।**

**पदच्छेदः** - आराध्य + एनं - आराध्यैनम्। सिद्धद्वन्द्वैः + जलकणभयात् + वीणिभिः + मुक्तमार्गः - सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।

**अन्वयः** - एनम् शरवणभवम् देवम् आराध्य वीणिभिः सिद्धद्वन्द्वैः जलकणभयात् मुक्तमार्गः उल्लङ्घिताध्वा सुरभितनयाऽऽलम्भजाम् भुवि स्रोतोमूर्त्या परिणताम् रन्तिदेवस्य कीर्तिम् मानयिष्यन् व्यालम्बेथाः।

**अन्वयार्थः** - **एनम्** - पूर्वोक्तम्, **शरवणभव** - बाणतृणारण्यजातम्, **देवम्** - सुरम्, कार्तिकेयमिति भावः। **आराध्य** - सम्पूज्य, **वीणिभिः** - वीणावद्भिः, **सिद्धद्वन्द्वैः** - सिद्धयुगलैः, **जलकणभयात्** - तोयबिन्दुभीतेः, **मुक्तमार्गः** - उज्झिताध्वा, (सन्) **उल्लङ्घिताध्वा** - निस्तृतपथः, **सुरभितनयाऽऽलम्भजाम्** - गवालम्भनजाताम्, **भुवि** - अवनौ, **स्रोतोमूर्त्या** - नदीरूपेण, **परिणताम्** - परिवर्तिताम्, **रन्तिदेवस्य** - एतन्नामकस्य दशपुरनरेशस्य, **कीर्तिम्** - यशः, 'चर्मण्वती' नाम्नी नदीमित्यर्थः, **मानयिष्यन्** - सत्कुर्वन्, **व्यालम्बयेथाः** - अवतरेः।

**भावार्थः** - हे मेघ! पूर्ववर्णितं भगवन्तं कार्तिकेयं संपूज्य वीणावद्भिः सिद्धमिथुनैः तोयपतनभयात् परित्यक्तपथः अतिक्रान्ताध्वा (त्वम्) दशपुरनरेशस्य यशोमूर्तिं गवालम्भनोद्भवां भूमौ नदीरूपेण परिणतां चर्मण्वतीं सत्कुर्वन् नीचैः अवतरेः।

**समासः** - शरवणे भवो यस्य तम् - शरवणभवम् (व्यधिकरण)। जलस्य कणाः - जलकणाः (षष्ठीतत्पुरुषः) तेभ्यः भयात् - जलकणभयात् (षष्ठीतत्पुरुषः)। त्यक्तः मार्गो यस्य सः त्यक्तमार्गः (बहुव्रीहि)। उल्लङ्घितोऽध्वा येन सः - उल्लङ्घिताध्वा (बहुव्रीहि)। सुरभेः तनयाः - सुरभिततनयाः (षष्ठीतत्पुरुषः) तासाम् आलम्भनम् सुरभितनयालम्भनम् (षष्ठीतत्पुरुषः) तस्मात् जाताम् - सुरभितनयालम्भजाम् (षष्ठीतत्पुरुषः)। स्रोतसः मूर्तिः - स्रोतोमूर्तिः (षष्ठीतत्पुरुषः) तया।

**कोशः** - शरो बाणे बाणतृणे इति शब्दार्णवः। शरजन्मा षडाननः इत्यमरः। अयनं वर्त्ममार्गाध्व इत्यमरः। सुरभिर्गवि च स्त्रियाम् इत्यमरः।

**अलङ्कारः** - अतिशयोक्ति।

**त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे**
**तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।**
**प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-**
**रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्।। ५०।।**

**पदच्छेदः** - त्वयि + आदातुं -त्वय्यादातुम्। जलं + अवनते - जलमवनते। दृष्टीः + एकं - दृष्टीरेकम्।

**अन्वयः** - शार्ङ्गिणः वर्णचौरो त्वयि जलम् आदातुम् अवनते पृथुमपि दूरभावात् तनुम् तस्याः सिन्धोः प्रवाहम् गगनगतयः दृष्टीः आवर्ज्य एकम् स्थूलमध्येन्द्रनीलम् भवः मुक्तागुणम् इव नूनम् प्रेक्षिष्यन्ते।

**अन्वयार्थः** - **शार्ङ्गिणः** - श्रीकृष्णस्य, **वर्णचौरे** - कान्तिचौरे, समानवर्णके इति भावः। **त्वयि** - मेघे, **जलम्** - तोयम्, **आदातुम्** - ग्रहीतुम्, **अवनते** - लम्बिते सति, **पृथुमपि** - स्थूलमपि, **दूरभावात्** - विप्रकृष्टत्वात्, **तनुम्** - सूक्ष्ममिवाभासमानम्, **तस्याः** - पूर्वकथितायाः, **सिन्धोः** - एतन्नामिकायाः नद्याः, **प्रवाहम्** - वेगम्, **गगनगतयः** - खेचराः,

सिद्धादयः इत्यर्थः, **दृष्टीः** - नेत्राणि, **आवर्ज्य** - संनियम्य, **एकम्** - एकयष्टिकम्, **स्थूलमध्येन्द्रनीलम्** - पृथुमध्यमणीभूतेन्द्रनीलम्, **भुवः** - पृथिव्याः, **मुक्तागुणम्** - मौक्तिकहारम्, **इव** - यथा, **नूनम्** - अवश्यम्, **प्रेक्षिष्यन्ते** - अवलोकयिष्यन्ति।

**भावार्थः** - हे मेघ! कृष्णसमानवर्णके त्वयि तोयाऽऽदातुमवनते सति गगनचारिणः सिद्धादयः विशालमपि विप्रकृष्टत्वात् सिन्धोः तनुमिव प्रतीयमानं प्रवाहम्, एकयष्टिकामिन्द्रनीलमणियुक्तां पृथिव्याः मालामिव त्वां दृष्टीः नियम्य प्रेक्षिष्यन्ते।

**समासः** - गगने गतिर्येषान्ते - गगनगतयः (बहुव्रीहि)। मध्यश्चासौ इन्द्रनीलः - मध्येन्द्रनीलः (कर्मधारयः), स्थूलः मध्येन्द्रनीलो यस्य तम् - स्थूलमध्येन्द्रनीलम् (बहुव्रीहि)। मुक्तायाः गुणम् मुक्तागुणम् (षष्ठीतत्पुरुषः)। वर्णस्य चौरः वर्णचौरः तस्मिन् (षष्ठीतत्पुरुषः)।

**कोशः** - चापः शाङ्र्गमुरारेस्तुः इत्यमरः। विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् इत्यमरः। स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु इत्यमरः।

**अलङ्कारः** - निदर्शना, उत्प्रेक्षा।

**तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां**
**पक्ष्मोत्क्षेपादुपरिविसत्कृष्णशारप्रभाणाम्।**
**कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं**
**पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहरानाम्।।५१।।**

**पदच्छेदः** - तां उत्तीर्य - तामुत्तीर्य।

**अन्वयः** - ताम् उत्तीर्य आत्मबिम्बम् परिचितभ्रूलताविभ्रमाणाम् पक्ष्मोत्क्षेपात् उपरिविलसत्कृष्ण-शारप्रभाणाम् कुन्दक्षेपाऽनुगमधुकरश्रीमुषाम् दशपुरवधूनेत्रकौतूहलानाम् पात्रीकुर्वन् ब्रज।

**अन्वयार्थः** - (हे मेघ) **ताम्** - चर्मण्वतीम्, **उत्तीर्य** - पारङ्कृत्वा, **आत्मबिम्बम्** - स्वस्वरूपम्, **परिचितभ्रूलताविभ्रमाणाम्** - अवगतभ्रूवल्लीविलासानाम्, **पक्ष्मोत्क्षेपात्** - नेत्रलोनोन्नमनात्, **उपरि-विलसत्कृष्णशारप्रभाणाम्** - ऊर्ध्वभागविराजितनीलशबलकान्तीनाम्, **कुन्दक्षेपाऽनुगमधुकरश्रीमुषाम्** - माध्यपुष्पेतस्ततः गमनानुगभ्रमरं शोभापहारिणाम्, **दशपुरवधूनेत्रकौतूहलानाम्** - रन्तिदेवनगरी-वनिताक्षिकौतूहलानाम्, **पात्रीकुर्वन्** - भाजनीकुर्वन्, **व्रज** - गच्छ।

**भावार्थः** - हे मेघ! त्वं चर्मण्वतीं नदीमुत्तीर्य स्वात्मबिम्बमवलोकनाय ऊर्ध्वाननां भ्रूविलासज्ञानां दशपुरवनितानां नेत्राणां कौतूहलविषयीकुर्वन् गच्छ।

**समासः** - आत्मनः बिम्बम् - आत्मबिम्बम् (षष्ठीतत्पुरुषः) भ्रुवः लता इव - भ्रूलता (उपमितकर्मधारयः), भ्रूलतानां विभ्रमाः - भ्रूलताविभ्रमाः (षष्ठीतत्पुरुषः) परिचिता भ्रूलताविभ्रमा येषु तानि परिचरितभ्रूलताविभ्रमाणि तेषाम् (बहुव्रीहि)। पक्ष्मणाम् उत्क्षेपः पक्ष्मत्क्षेपः (षष्ठीतत्पुरुषः) तस्मात्। कृष्णाश्च ताः शाराः - कृष्णशाराः (कर्मधारयः) उपरिविलसन्त्यः (सुप्सुपेतिसमासः) उपरिविलसन्त्यः कृष्णशाराः प्रभा येषां तानि तेषाम् - उपरिविलसत्कृष्णशारप्रभाणाम् (बहुव्रीहि)। दशपुराणि यत्र तत् दशपुरम् (बहुव्रीहि)।

**कोशः** - पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जत्के नेत्रलोमनि इति विश्वः। कृष्णे नीलासितश्याम-कालश्यामलमेचकाः इत्यमरः। कृष्णरक्तसिताशाराः इति यादवः। माध्यं कुन्दम् इत्यमरः। वधूर्जायाष्नुषा स्त्री च इत्यमरः।

**अलङ्कारः** - उपमा।

**ब्रह्मावर्तं जनपदमथच्छायया गाहमानः**
**क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।**
**राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा**
**धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि।।५२।।**

**पदच्छेदः** - जनपदं + अथ - जनपदमथ। शितशरशतैः + यत्र - शितशरशतैर्यत्र। धारापातैः + त्वं + इव - धारापातैस्त्वमिव। कमलानि + अभ्यवर्षन् + मुखानि - कमलान्यभ्यवर्षन्मुखानि।

**अन्वयः** - 'अथ ब्रह्मावर्तम्' जनपदम् छायया गाहमानः छत्रप्रधनपिशुनम् तत् कौरवं क्षेत्रम् भजेथाः। यत्र गाम्डीवधन्वा शितशरशतैः राजन्यानाम् मुखानि धारापातैः कमलानि त्वम् इव अभ्यवर्षत्।

**अन्वयार्थः** - **अथ** - अनन्तरम्, **ब्रह्मावर्तम्** - ब्रह्मावर्तनामानम्, **जनपदम्** - देशम्, **छायया** - अनातपमण्डलेन, **गाहमानः** - प्रविशन्, **क्षत्रप्रधनपिशुनम्** - राजन्यरणसूचकम्, **तत्** - प्रसिद्धम्, **कौरवम्** - कुरुसम्बन्धि, **क्षेत्रम्** - स्थानम्,

कुरुक्षेत्रमित्यर्थः, **भजेथाः** - गच्छेः। **यत्र** - कुरुक्षेत्रे, **गाण्डीवधन्वा** - अर्जुनः। **शितशरशतैः** - अत्यन्ततीक्ष्णबाणसहस्रैः, **राजन्यानाम्** - नृपानाम्, योद्धानामिति भावः। **मुखानि** - वदनानि, **धारापातैः** - आसारैः, **कमलानि** - पद्मानि, **त्वम्** - मेघः, **इव** - यथा, **अभ्यवर्षत्** - अभिमुखं दृष्टवान्, बाणप्रहारैः शिरांसि पातयामासेत्यर्थः।

**भावार्थः** - हे मेघ! पश्चात् छायारूपेण ब्रह्मावर्तनामकं देशं प्रविश्य कौरवयुद्धसूचककुरुक्षेत्रं गच्छ। यत्र अर्जुनः स्वतीक्ष्णबाणसहस्रैः प्रतिभटानां शिरांसि धारासंपातैः यथा त्वं कमलानि पातयसे तथैव पातयामास।

**समासः** - क्षत्राणां प्रधनं - क्षत्रप्रधनम् (षष्ठीतत्पुरुषः) तस्य पिशुनम् - क्षत्रप्रधनपिशुनम् (षष्ठीतत्पुरुषः)। शिताश्च ते शराः शितशराः (कर्मधारयः) तेषां शतानि तैः (षष्ठीतत्पुरुषः) - शितशरशतैः। गाण्डीवं धनुर्यस्य गाण्डीवधन्वा (बहुव्रीहि)। धाराणां पाताः - धारापाताः (षष्ठीतत्पुरुषः) तैः।

**कोशः** - नीबृज्जनपदो देशः इत्यमरः। युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् इत्यमरः। कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसकौ इत्यमरः। मूर्धाभिषिक्तो राजन्यः इत्यमरः।

**अलङ्कारः** - उपमा।

**हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां**
**बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।**
**कृत्वा तासामभिगममपां सौम्य सारस्वतीना-**
**मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः।। ५३।।**

**पदच्छेदः** - तासां + अभिगमं + अपां - तासामभिगममपाम्। सरस्वतीनां + अन्तःशुद्धः + त्वं + अपि - सरस्वतीनामन्तःशुद्धस्त्वमपि।

**अन्वयः** - बन्धुप्रीत्या समरविमुखः लाङ्गली अभिमतरसाम् रेवतीलोचनाङ्काम् हालाम् हित्वा याः सिषेवे। हे सौम्य! त्वम् अपि तासाम् सारस्वतीनाम् अपाम् अभिगमम् कृत्वा अन्तःशुद्धः वर्णमात्रेण कृष्णः भविता।

**अन्वयार्थः** - **बन्धुप्रीत्या** - संबन्धिस्नेहेन, न तु भीरुतया, **समरविमुखः** - युद्धपराङ्मुखः, **लाङ्गली** - बलरामः, **अभिमतरसाम्** - इष्टस्वादाम्, **रेवतीलोचनाङ्काम्** - स्वप्रियानयनाङ्कितम्, **हालाम्** - मदिराम्, **हित्वा** - त्यक्त्वा, **याः** - सरस्वत्यापः, **सिषेवे** - पूर्वकथितानाम्। **सारस्वतीनाम्** - सरस्वतीसंबन्धिनीनाम्, **अपाम्** - तोयानाम्, **अभिगमम्** - सम्मुखगमनम्, पानमित्यर्थः, **कृत्वा** - विधाय, **अन्तःशुद्धः** - निर्मलान्तःकरणः सन्, **वर्णमात्रेण** - शारीरिकरूपेणैव, **कृष्णः** - श्यामः, न तु हृदयेनापि कृष्णः पापी इति भावः। **भविता** - भविष्यसि।

**भावार्थः** - हे सौम्य! बान्धव प्रेम्णा समरपराङ्मुखो हलधरः अभीष्टस्वादां स्वप्रियानयनप्रतिबिम्बितां मदिरां त्यक्त्वा याः सारस्वतीः अपः पपौ। त्वमपि तेषां सारस्वतीनाम् अपां पानं कृत्वा निर्मलान्तःकरणः सन् रूपेणैव (न तु हृदयेन) श्यामो भविता।

**समासः** - बन्धूनां प्रीतिः - बन्धुप्रीतिः (षष्ठीतत्पुरुषः) तया। समरात् विमुखः समरविमुखः (पञ्चमीतत्पुरुषः)। अभिमतो रसो यस्या सा अभिमतरसा (बहुव्रीहि) ताम्। रेवत्याः लोचने एव अङ्कं यस्या सा रेवतीलोचनाङ्का (बहुव्रीहि) ताम्।

**कोशः** - रेवती रमणो रामः इत्यमरः। कलङ्काङ्कौ लाञ्छनं च इत्यमरः। सुरा हलिप्रिमा हाला इत्यमरः। तालांको मुसली हली इत्यमरः।

**तस्मात् गच्छेरनुकनखलं शैलनाजावतीर्णां**
**जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिम्।**
**गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः**
**शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता।। ५४।।**

**पदच्छेदः** - गच्छेः + अनुकनखलं - गच्छेरनुकनखलम्। विहस्य + इव - विहस्येव। केशग्रहणं + अकरोत् + इन्दुलग्नोर्मिहस्ता - केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता।

**अन्वयः** - तस्मात् अनुकनखलम् शैलराजाऽवतीर्णाम् सगरतनयस्वर्गसोपानपंक्तिम् जह्नोः कन्याम् गच्छ। या गौरीवक्त्रभ्रुकुटिरचनाम् फेनैः विहस्य इव इन्दुलग्नोर्मिहस्ता शम्भोः केशग्रहणम् अकरोत्।

**अन्वयार्थः** - **तस्मात्** - कुरुक्षेत्रात्, **अनुकनखलम्** - कनखलतीर्थसमीपे, **शैलराजाऽवतीर्णाम्** - हिमालयनिःसृताम्, **सगरतनयस्वर्गसोपानपंक्तिम्** - सगरपुत्रव्योमगमनारोहणश्रृङ्खलाम् स्वर्गसाधनभूतामिति भावः। **जह्नोः** - एतन्नामकस्य

राज्ञः, **कन्याम्** - पुत्रीम्, जाह्नवीं गङ्गामित्यर्थः। **गच्छेः** - यायाः। **या** - जाह्नवी, **गौरीवक्त्रभ्रुकुटिरचनाम्** - पार्वतीवदनभ्रूभङ्गनिर्मिताम्, **फेनैः** - डिण्डिरैः **विहस्य इव** - उपहासं कृत्वेव, **इन्दुलग्नोर्मिहस्ता** - चन्द्रसंलग्नविचिकरा (सती) **शम्भोः** - शंकरस्य, **केशग्रहणम्** - जटाग्रहणम्, **अकरोत्** - चकार।

**भावार्थः** - हे मेघ! कुरुक्षेत्रादग्रे कनखलतीर्थसमीपे सगरपुत्राणां कृते स्वर्गसोपानभूतां जाह्नवीं गच्छ। या जाह्नवी (पतिशिरःस्थितत्वात्) पार्वतीमुखे उत्पन्नभ्रुकुटिरचनां फेनैः उपहासं कृत्वेव चन्द्रसंस्पर्शेन शिलोर्मिकरा (सती) शिवजटाजूटग्रहणं कृतवती।

**समासः** - कनखलस्य समीपे अनुकनखलम् (अव्ययीभावः)। सगरस्य तनयाः - सगरतनयाः (षष्ठीतत्पुरुषः), सोपानानां पङ्क्तिः - सोपानपङ्क्तिः (षष्ठीतत्पुरुषः) स्वर्गस्य सोपानपंक्तिः - सगरतनयस्वर्गसोपानपंक्तिः (षष्ठीतत्पुरुषः)। गौर्याः वक्त्रम् - गौरीवक्त्रम् (षष्ठीतत्पुरुषः) भ्रुकुटेः रचना भ्रुकुटिरचना, गौरीवक्त्रभ्रुकुटिरचना (सप्तमीतत्पुरुषः) ताम्। इन्दौ लग्नाः - इन्दुलग्नाः (सप्तमीतत्पुरुषः), इन्दुलग्नाः ऊर्मय एव हस्ताः यस्याः सा इन्दुलग्नोर्मिहस्ता (बहुव्रीहि) ताम्। केशानां ग्रहणम् केशग्रहणम् (षष्ठीतत्पुरुषः)।

**कोशः** - गङ्गा विष्णुपदी जह्नुतनया पुरनिम्नगा इत्यमरः। वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् इत्यमरः।

**अलङ्कारः** - उत्प्रेक्षा, रूपकम्।

**तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी**
**त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।**
**संसर्पन्त्या सपदि भवतः स्रोतसिच्छाययाऽसौ**
**स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा।। ५५।।**

**पदच्छेदः** - चेत् + अच्छस्फटिकविशदं - चेदच्छस्फटिकम्। तर्कयेः + तिर्यक् + अम्भः - तर्कयेस्तिर्यगम्भः। छायया + असौ - छाययासौ। स्यात् + अस्थानोपगतयमुनासङ्गमा + इव + अभिरामा - स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा।

**अन्वयः** - सुरगज इव व्योम्नि पश्चार्द्धलम्बी त्वम् अच्छस्फटिकविशदम् तस्याः अम्बः तिर्यक् पातुम् तर्कये चेत् सपदि स्रोतसि संसर्पन्त्यां भवतः छायया असौ अस्थानोपगतयमुना सङ्गमा इव अभिरामा स्यात्।

**अन्वयार्थः** - **सुरगजः** - देवहस्ती, **इव** - यथा, **व्योम्नि** - नभसि, **पश्चार्द्धलम्बी** - पश्चिमभागार्धापनतः, **त्वम्** - मेघः, **अच्छस्फटिकविशदम्** - निर्मलस्फटिकधवलम्, **तस्याः** - गङ्गायाः, **अम्भः** - तोयम्, **तिर्यक्** - तिरश्चीनं यथा स्यात्तथा, **पातुम्** - पानङ्कर्तुम्, **तर्कयेः** - विचारये, **चेत्** - तर्हि, **सपदि** - सहसा, **स्रोतसि** - प्रवाहे, **संसर्पन्त्या** - संक्रामन्त्या, **भवतः** - मेघस्य, **छायया** - प्रतिबिम्बेन, **असौ** - गङ्गा, **अस्थानोपगतयमुनासंगमा** - प्रयागभिन्नस्थलप्राप्तकालिन्दीसमागमा, **इव** - यथा, **अभिरामा** - मनोहरा, **स्यात्** - भवेत्।

**भावार्थः** - हे मेघ! दिग्गज इवाकाशे पाश्चार्धेण स्थितः पूर्वार्द्धेन त्वं यदा गङ्गायाः स्वच्छस्फटिकधवलं जलं पातुं चिन्तयसे तदा सहसा प्रवाहे त्वच्छाया संयुक्ततया गंगा प्रयागेतरस्थाने प्राप्तयमुनासमागममेव मनोहरा भवेत्।

**समासः** - अपरम् अर्धम् - पश्चार्द्धम् (कर्मधारयः) पश्चार्द्धेन लम्बते तच्छीलः इति पश्चार्द्धलम्बी (उपपदसमासः)। अच्छासौ स्फटिकः अच्छस्फटिकः (कर्मधारयः) तदिव विशदम् - अच्छस्फटिकविशदम् (उपमानकर्मधारयः)। न स्थानम् - अस्थानम् (नञ्समासः) अस्थाने उपगतः - अस्थानोपगतः (सप्तमीतत्पुरुषः) यमुनायाः संगमः - यमुनासंगमः (षष्ठीतत्पुरुषः) अस्थानोपगतः यमुना संगमो यस्याः सा - अस्थानोपगतयमुनासंगमा (बहुव्रीहि)।

**कोशः** - प्रसन्ने भल्लुकेऽच्छः इत्यमरः। विशदश्वेतपाण्डुराः इत्यमरः। स तिर्यङ् यस्तिरोऽञ्चति इत्यमरः। सद्मः सपदि तत्क्षणे इत्यमरः। छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः इत्यमरः।

**आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां**
**तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।**
**वक्ष्यस्यध्वश्रमविनयने तस्य श्रृङ्गे निषण्णः**
**शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्।। ५६।।**

**पदच्छेदः** - नाभिरन्ध्रैः + मृगाणाम् - नाभिरन्ध्रैर्मृगाणाम्। वक्ष्यसि + अध्वश्रमविनयने - वक्ष्यस्यध्वश्रमविनयने।

**अन्वयः** - आसीनानाम् मृगाणाम् नाभिगन्धैः सुरभितशिलम् तस्याः एव प्रभवम् तुषारैः गौरम् अचलम् प्राप्य अध्वश्रमविनयने तस्य श्रृङ्गे निषण्णः (सन्) शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् शोभाम् वक्ष्यसि।

**अन्वयार्थः** - **आसीनानाम्** - स्थितानाम्, **मृगाणाम्** - कुरङ्गाणाम्, गन्धमृगाणामिति भावः। **नाभिगन्धैः** - कस्तूरिकागन्धैः, **सुरभितशिलम्** - सुगन्धितप्रस्तरम्, **तस्याः** - गङ्गायाः, एव **प्रभवम्** - उत्पत्तिस्थलम्, **तुषारैः** - हिमैः, **गौरम्** - धवलम्, **अचलम्** - पर्वतम्, **प्राप्य** - आसाद्य, हिमालयं गत्वेत्यर्थः, **अध्वश्रमविनयने** - मार्गपरिश्रमापनोदने, **तस्य** - हिमालयस्य, **श्रृङ्गे** - सानौ, **निषण्णः** - उपविष्टः, (सन्, त्वम्) **शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्** - श्वेतशिववृषभविदारितकर्दमतुल्याम्, **शोभाम्** - श्रियम्, **वक्ष्यसि** - धारयिष्यसि।

**भावार्थः** - हे मेघ! तदनन्तरमुपविष्टानां गन्धमृगाणां कस्तूरिकागन्धैः सुरभितप्रस्तरे गङ्गापितरि हिमशुक्ले पर्वते हिमालये मार्गपरिश्रमापनोदनायोपविष्टस्त्वं शिवस्य श्वेतनन्दिनोत्खातकर्दमशोभां प्राप्स्यसि।

**समासः** - सुरभिताः शिला यस्य स सुरभितशिलः (बहुव्रीहि) तम्। नाभीनां गन्धाः - नाभिगन्धाः (षष्ठीतत्पुरुषः) तैः। अध्वनः श्रमः अध्वश्रमः (षष्ठीतत्पुरुषः) तस्य विनयनम् - अध्वश्रमविनयनम् (षष्ठीतत्पुरुषः) तस्मिन् अध्वश्रमविनयने। त्रिनयनस्य वृषः - त्रिनयनवृषः (षष्ठीतत्पुरुषः) शुभ्रश्चासौ त्रिनयनवृषः - शुभ्रत्रिनयनवृषः (कर्मधारयः) शुभ्रत्रिनयनवृषेण उत्खातः शुभ्रत्रिनयनवृषोत्खातः (तृतीयातत्पुरुषः) स चासौ पङ्कः (कर्मधारयः) शुभ्रत्रिनयनवृषोत्खातपंकेनोपमेयाम् - शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् (तृतीयातत्पुरुषः)। त्रीणि नयनानि यस्य स त्रिनयनः (बहुव्रीहि)।

**कोशः** - मृगनाभिर्मृगमदः कस्तूरी च इत्यमरः। नाभिः प्रधाने कस्तूर्यां मदे च क्वचिदीरितः इति विश्वः। अवदातः सितो गौरः इत्यमरः। सुकृतं वृषभे वृषः इत्यमरः। शुभ्रमुद्दीप्तशुक्लयोः इत्यमरः।

**अलङ्कारः** - उपमा।

**तं चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा**
**बाधेतोल्कक्षपितचमरीबालभारो दवाग्निः।**
**अर्हस्येनं शमयितुमलं वारिधारासहस्रै-**
**रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।। ५७।।**

**पदच्छेदः** - चेत् + वायौ - चेद्वायौ। अर्हसि + एनं - अर्हस्येनम्। शमयितुं + अलम् - शमयितुमलम्। वारिधारासहस्रैः +आपन्नार्तिप्रशमनफलाः - वारिधारासहस्रैरापन्नार्तिप्रशमनफलाः। हि + उत्तमानां - ह्युत्तमानाम्।

**अन्वयः** - वायो सरति सरलस्कन्धसंघट्टजन्मा उत्काक्षपितचमरीबालभारः दवाग्निः तम् बाधेव चेत् एनम् वारिधारासहस्रैः अलम् शमयितुम् अर्हसि हि उत्तमानाम् सम्पदः आपन्नार्तिप्रशमनफलाः।

**अन्वयार्थः** - **वायोः** - पवने, **सरति** - वाति सति, **सरल स्कन्धसंघट्टजन्मा** - देवदारुप्रकाण्डसंघर्षणोद्भवः, **उत्काक्षपितचमरीबालभारः** - स्फुल्लिङ्गप्रदग्धचमरीकेशसमूहः, **दवाग्निः** - अरण्यवह्निः, **तम्** - हिमालयम्, **बाधेत** - पीडयेत् चेत् (तर्हि) **एनम्** - वह्निम्, **वारिधारासहस्रैः** - जलसंपातैः, **अलम्** - पर्याप्तं यथास्यात्तथा **शमयितुम्** - निर्वापयितुम्, **अर्हसि** - योग्योऽसि, **हि** - यतः, **उत्तमानाम्** - महताम्, **सम्पदः** - समृद्धयः, **आपन्नार्तिप्रशमनफलाः** - पीडितपीडानिवारण हेतुकाः (भवन्ति)।

**भावार्थः** - हे मेघ! वायौ सरति यदि देवदारुप्रशाखासंघर्षणोत्पन्नः उल्कया चमरीपुच्छकेशदग्धको दवाग्निः हिमालयं पीडयेत् तर्हि त्वं जलधारसहस्रैः दवाग्निमुपशामयेः। यतो हि महतां समृद्धयः पीडितपीडानिवारणहेतुकाः भवन्ति।

**समासः** - सरलानां स्कन्धाः - सरलस्कन्धाः (षष्ठीतत्पुरुषः) तेषां संघट्टनं सरलस्कन्धसंघट्टनम् (षष्ठीतत्पुरुषः) सरलस्कन्धसंघट्टनेन जन्म यस्य सरलस्कन्धसंघट्टजन्मा (बहुव्रीहि) उल्काभिः क्षपिताः - उल्काक्षपिताः (तृतीयातत्पुरुषः) चमरीणां बालभाराः - चमरीबालभाराः (षष्ठीतत्पुरुषः) उल्काक्षपिताः चमरीबालभाराः येन स उल्काक्षपिताचमरीबालभाराः (बहुव्रीहि)। वारीणां धाराः वारिधाराः (षष्ठीतत्पुरुषः) वारिधाराणां सहस्रैः वारिधारासहस्रैः (षष्ठीतत्पुरुषः)। आपन्नानाम् आर्तिः आपन्नार्तिः (षष्ठीतत्पुरुषः) तस्याः प्रशमनम् - आपन्नार्तिप्रशमनम् (षष्ठीतत्पुरुषः) तदेव फलं यासां ता आपन्नार्तिप्रशमनफलाः (बहुव्रीहि)।

**कोशः** - अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोः इत्यमरः। उल्का स्यान्निर्गतज्ज्वाला इत्यमरः। वने च वनवह्नौ च दवो दाव इतीष्यते इति यादवः। दवो दावो वनवह्निः इत्यभिधानचिन्तामणिः।

**अलङ्कारः** - अर्थान्तरन्यासः।

**ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्**
**मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम्।**

**तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णात्**

**को वा न स्युः परिभवपदं निष्फलारम्भयत्नाः।। ५८।।**

**पदच्छेदः** - लङ्घयेयुः + भवन्तम् - लङ्घयेयुर्भवन्तम्। तान् + कुर्वीथाः + तुमुल + करकावृष्टिपातावकीर्णात् - तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णात्।

**अन्वयः** - तस्मिन् संरम्भोत्पतनरभसाः ये शरभाः मुक्ताध्वानम् भवन्तम् सपदि स्वाङ्गभङ्गाय लङ्घयेयुः तान् तुमुलकरकावृष्टिपाताऽवकीर्णान् कुर्वीथाः निष्फलारम्भयत्नाः के वा परिभवपदम् न स्युः।

**अन्वयार्थः** - **तस्मिन्** - हिमालये, **संरम्भोत्पतनरभसाः** - क्रोधोत्प्लवनवेगशालिनः, ये **शरभाः** - अष्टापदमृगविशेषाः, **मुक्ताध्वानम्** - परित्यक्तमार्गम्, **भवन्तम्** - मेघम्, **सपदि** - सहसा, **स्वाङ्गभङ्गाय** - निजगात्रत्रोटनाय, **लंघयेयुः** - अतिक्रमणं कुर्युः, **तान्** - शरभान्, **तुमुलकरकावृष्टिपाताऽवकीर्णान्** - भीषणोपलवर्षणविकीर्णान्, **कुर्वीथाः** - कुरुष्व, **निष्फलारम्भयत्नाः** - विफलव्यापारसंलग्नाः, **के वा** - जन्तवः, **परिभवपदम्** - तिरस्कारपात्राः, **न स्युः** - न भवेयुः, सर्वे भवत्येवेति ध्वनिः।

**भावार्थः** - हे मेघ! क्रोधेणोत्पतनत्वात् वेगशीलाः शरभाः त्यक्तमार्गं भवन्तं यदि निजगात्रविक्षताय अतिक्रमणं कुर्युस्तर्हि त्वमपि करकानां तुमुलवृष्टिभिस्तान् विप्रकीर्णान् कुरुष्व। व्यर्थव्यापारसंलग्नाः के प्राणिनः तिरस्कारभाजनाः न भवन्ति। अर्थात् सर्वेऽपि भवन्त्येवेतिभावः।

**समासः** - संरम्भेण उत्पतनम् - संरम्भोत्पतनम् (तृतीयातत्पुरुषः) संरम्भोत्पतने रभसः येषान्ते संरम्भोत्पतनरभसः (बहुव्रीहि)। मुक्तः अध्वा येन स मुक्ताध्वा (बहुव्रीहि) तम्। अङ्गानां भङ्गः अङ्गभङ्गः (षष्ठीतत्पुरुषः) स्वस्य अङ्गभङ्गः स्वाङ्गभङ्गः (षष्ठीतत्पुरुषः) तस्मै। तुमुलाश्च ताः करकाः - तुमुलकरकाः (कर्मधारयः) तासां वृष्टिः तुमुलकरकावृष्टिः (षष्ठीतत्पुरुषः) तस्याः पातः (षष्ठीतत्पुरुषः) तेन अवकीर्णाः तुमुलकरकावृष्टिपाताऽवकीर्णाः (तृतीयातत्पुरुषः) तान्। आरम्भेषु यत्नः - आरम्भयत्नः (सप्तमीतत्पुरुषः) निष्फल आरम्भयत्नः येषान्ते निष्फलारम्भयत्नाः (बहुव्रीहि)। परिभवस्य पदम् परिभवपदम् (षष्ठीतत्पुरुषः)।

**कोशः** - रभसो हर्षवेगयोः इति विश्वः। द्राक्झटित्याजसाह्नाय द्राङ्मंक्षु सपदिद्रुते इत्यमरः, सद्यः सपदि तत्क्षणे इति च। तुमुलं रणसंकुले इत्यमरः। स्युर्पुनर्वै वेत्यवधारणवाचकाः इत्यमरः। वर्षोपलस्तु करकोकरकाऽपि च दृश्यते इत्यमरः, इति रुद्रः।

**अलङ्कारः** - अर्थान्तरन्यास।

**तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः**

**शश्वत् सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः।**

**यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः**

**कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः।। ५९।।**

**पदच्छेदः** - चरणन्यासं + अर्धेन्दुमैलेः - चरणन्यासमर्धेन्दुमौलेः। सिद्धैः + उपचितबलिं - सिद्धैरुपचितबलिम्।

**अन्वयः** - तत्र दृषदि व्यक्तम् शश्वत् सिद्धैः उपचितबलिम् अर्धेन्दुमौलेः चरणन्यासम् भक्तिनम्रः परीयाः यस्मिन् दृष्टे उद्धूतपापाः श्रद्दधानाः करणविगमात् ऊर्ध्वम् स्थिरगणपदप्राप्तये कल्पिष्यन्ते।

**अन्वयार्थः** - **तत्र** - हिमालये, **दृषदि** - प्रस्तरे, **व्यक्तम्** - स्पष्टम्, **शश्वत्** - स्थायी, **सिद्धैः** - गन्धर्वैः, **उपचितबलिम्** - विरचितपूजाविधिम्, **अर्धेन्दुमौलेः** - इन्दुशेखरस्य, शिवस्येत्यर्थः, **चरणन्यासम्** - पादचिह्नम्, **भक्तिनम्रः** - भवत्यावनतः, (सन्) **परीयाः** - प्रदक्षिणां कुर्याः, **यस्मिन्** - पदन्यासे, **दृष्टे** - अवलोकिते, **उद्धूतपापाः** - मुक्तकिल्बिषाः, (सन्तः) **श्रद्दधानाः** - भक्ताः, **करणविगमात्** - शरीरत्यागात्, **ऊर्ध्वम्** - अनन्तरम्, **स्थिरगणपदप्राप्तये** - स्थायिप्रमथस्थानलब्धये, **संकल्पन्ते** - समर्थाः भवन्ति।

**भावार्थाः** - हे मेघ! तत्र हिमालये कस्मिंश्चित् पाषाणे स्पष्टं स्थायि सिद्धैः रचितपूजाविधिं शिवस्य चरणचिह्नं भक्तिविनम्रः सन् प्रदक्षिणां कुर्याः। यस्मिन्नवलोकिते भक्ताः निष्कल्मषाः सन्तः शिवप्रमथेषु स्थायिस्थानं प्राप्तुं समर्थाः भवन्ति।

**समासः** - चरणयोः न्यासः चरणन्यासः (षष्ठीतत्पुरुषः) तम्। उपचितः बलिर्यस्य तम् उपचितबलिम् (बहुव्रीहि) तस्य। अर्धश्चासौ इन्दुः अर्धेन्दुः (कर्मधारयः) अर्धेन्दुः मौलो यस्य सः अर्धेन्दुमौलिः (बहुव्रीहि) तस्य। उद्धूतानि पापानि

येषान्ते उद्धूतपापाः (कर्मधारयः)। गणानां पदं गणपदम् (षष्ठीतत्पुरुषः) स्थिरञ्च तत् गणपदम् - स्थिरगणपदम् (कर्मधारयः) तस्य प्राप्तिः स्थिरगणपदप्राप्तिः (षष्ठीतत्पुरुषः) तस्मै।

**कोशः** - सिद्धिर्निष्पत्तियोगयोः इति विश्वः। बलिः पूजोपहारयोः इति यादवः। अधः खण्डे समेंऽशके इति विश्वः। करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि इत्यमरः। गणः प्रमथसंख्यौघाः इति वैजयन्ती। पापं किल्बिषं कल्मषम् इत्यमरः।

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः**
**संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।**
**निर्ह्लादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्**
**संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः।। ६०।।**

**पदच्छेदः** - संसक्ताभिः + त्रिपुरविजयः - संसक्ताभिस्त्रिपुरविजयः। निर्ह्लादः + ते - निर्ह्लादस्ते। पशुपतेः + तत्र - पशुपतेस्तत्र।

**अन्वयः** - अनिलैः पूर्यमाणाः कीचकाः मधुरम् शब्दादयन्ते संसक्ताभिः किन्नरीभिः त्रिपुरविजयः गीयते कन्दरेषु ते निर्ह्लादः मुरजे ध्वनिः इव स्यात् तत्र पशुपतेः समयः संगीतार्थः भावी ननु।

**अन्वयार्थः** - (हे मेघ!) **अनिलैः** - पवनैः, **पूर्यमाणाः** - पूरिताः, **कीचकाः** - वेणुविशेषा, **मधुरम्** - श्राव्यम्, **शब्दायन्ते** - स्वनन्ति, **संसक्ताभिः** - संयुक्ताभिः, **किन्नरीभिः** - किन्नरकामिनीभिः, **त्रिपुरविजयः** - त्रिपुरासुरवधः, **गीयते** - स्तूयते, **कन्दरेषु** - गुहासु, **ते** - मेघस्य, **निर्ह्लादः** - निर्घोषः, **मुरजे** - मृदंगे, **ध्वनिः** - शब्दः, **इव** - यथा, **स्यात्** - भवेत्, **तत्र** - चरणन्याससमीपम्, **पशुपतेः** - शिवस्य, **संगीतार्थः** - संगीतवस्तु, **समग्रः** - सम्पूर्णः **भावी** - भविष्यति, **ननु** - खलु।

**भावार्थः** - हे मेघ! वायुपूरिताः कीचकाः कर्णप्रियं शब्दं कुर्वन्ति। संयुक्ताः किन्नरवनिताः शिवस्य त्रिपुरविजयं गायन्ति। गुहासु तव निर्घोषः मृदंगे ध्वनिरिव यदि भवेत् तर्हि शंकरस्य संगीतार्थः सम्पूर्णो भविष्यति।

**समासः** - त्रीणि पुराणि यस्य त्रिपुरः (बहुव्रीहि) वा त्रयाणां पुराणां समाहारः त्रिपुरम् (समाहारद्विगुः)। त्रिपुरस्य विजयः - त्रिपुरविजयः (षष्ठीतत्पुरुषः) पशूनां पतिः पशुपतिः (षष्ठीतत्पुरुषः) तस्य, संगीतस्य अर्थः संगीतार्थः (षष्ठीतत्पुरुषः)।

**कोशः** - काचको दैत्यभेदे स्याच्छुष्कवंशे द्रुमान्तरे इति विश्वः। दरी तु कन्दरो वास्त्री इत्यमरः। तौर्यत्रिकं तु संगीतं न्यायारम्भे प्रसिद्धके। तूर्याणां त्रितये च इति शब्दार्णवः। तौर्यत्रिकं नृत्यगीतं वाद्यनाट्यमिदं त्रिषु इत्यमरः। अथोऽभिधेये रैवस्तु प्रयोजननिवृत्तिषु इत्यमरः।

**अलङ्कारः** - पर्याय, उपमा।

**प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्**
**हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्।**
**तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी**
**श्यामः पादोवलिनियमनाभ्युद्यतस्येव विष्णोः।। ६१।।**

**पदच्छेदः** - प्रालेयाद्रेः + उपतटमतिक्रम्य - प्रालेयाद्रेरुपतटमतिक्रम्य। तान् + तान् + विशेषान् - तांस्तान्विशेषान्। दिशं + अनुसरेः + तिर्यगायामशोभी - दिशमनुसरेस्तिर्यगायामशोभी।

**अन्वयः** - प्रालेयाद्रेः उपतटम् तान् विशेषान् अतिक्रम्य हंसद्वारम् भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् तेन वलिनियमनाऽभ्युद्यतस्य विष्णोः श्यामः पाद इव तिर्यगायामशोभी उदीचीम् दिशम् अनुसरेः।

**अन्वयार्थः** - (हे मेघ!) **प्रालेयाद्रेः** - हिमालयस्य, **उपतटम्** - तटस्य समीपे, तान् तान्, **विशेषान्** - प्रसिद्धान्, पदार्थान्, **अतिक्रम्य** - उल्लङ्ख्य, **हंसद्वारम्** - चक्राङ्गद्वारम्, **भृगुपतियशोवर्त्म** - परशुरामकीर्तिमार्गम्, **यत् क्रौञ्चरन्ध्रम्** - यत्क्रौञ्चाख्यविलम्, **तेन** - विलेन, **वलिनियमनाभ्युद्यतस्य** - वलिनिबन्धोत्सुकस्य, **विष्णोः** - वामनस्य, **श्यामः** - कृष्णः, **पादः इव** - चरण इव, **तिर्यगायामशोभी** - तिरञ्चीनदैर्घ्यशोभी (सन् त्वम्) **उदीचीम्** - उत्तराम्, **दिशम्** - आशाम्, **अनुसरेः** - अनुगच्छ।

**भावार्थः** - हे मेघ! हिमालयतटनिकटे दर्शनीयान् पदार्थान् दृष्ट्वा हंसद्वारेण परशुरामयशःसूचकेन क्रौञ्चाख्यपर्वतविलेन त्वम् वलिनिबन्धनतत्परस्य वामनस्य वक्रदीर्घश्यामपाद इव शोभायमानः सन् उत्तरां दिशम् गच्छ।

**समासः** - तटानां समीपम् - उपतटम् (अव्ययीभावः)। हंसानां द्वारम् - हंसद्वारम् (षष्ठीतत्पुरुषः)। भृगूणां पति - भृगुपतिः (षष्ठीतत्पुरुषः) भृगुपतेः यशः - भृगुपतियशः (षष्ठीतत्पुरुषः) भृगुपतियशसः वर्त्म भृगुपतियशोवर्त्म (षष्ठीतत्पुरुषः)

क्रौञ्चस्य रन्ध्रम् - क्रौञ्चरन्ध्रम् (षष्ठीतत्पुरुषः)। वलेः नियमनम् वलिनियमनम् (षष्ठीतत्पुरुषः) तस्मिन् अभ्युद्यतः - वलिनियमनाभ्युद्यतः (षष्ठीतत्पुरुषः) तस्य। तिर्यक् चासौ आयामः तिर्यगायामः (कर्मधारयः) तेन शोभते तच्छील इति तिर्यगायामशोभी।

**कोशः** - प्रालेयं मिहिका चाथ इत्यमरः। विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनि इति शब्दार्णवः। दैर्घ्यमायाम आनाहः इत्यमरः।

**अलङ्कारः** - रूपकम्, उपमा।

**गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः**
**कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।**
**श्रृङ्गाच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं**
**राशीभूतः प्रतदिनमिव त्र्यम्बकस्याट्टहासः।।६२।।**

**पदच्छेदः** - च + ऊर्ध्वं - चोर्ध्वम्। त्रिदशवनितादर्पणस्य + अतिथिः -त्रिदशवनितादर्पणस्यातिथिः। त्र्यम्बकस्य + अट्टहासः - त्र्यम्बकस्याट्टहासः।

**अन्वयः** - ऊर्ध्वं च गत्वा दशमुखभजोच्छ्वासित प्रस्थसन्धेः त्रिदशवनितादर्पणस्य कैलासस्य अतिथिः स्याः। यः कुमुदविशदैः श्रृङ्गोच्छ्रायैः खं वितत्य प्रतिदिनम् राशीभूतः त्र्यम्बकस्य इव स्थितः।

**अन्वयार्थः** - (हे मेघ!) **ऊर्ध्वं च** - उपरि च, **गत्वा** - प्राप्य, **दशमुखभुजोच्छ्वासितप्रस्थसन्धेः** - रावणबाह्वालिङ्गितसानुसन्धेः, **त्रिदशवनितादर्पणस्य** - देवललनामुकुरस्य, **कैलासस्य** - शिवाद्रेः, **अतिथिः** - आगन्तुकः, **स्याः** - भवेः। **यः** - कैलासः, **कुमुदविशदैः** - श्वेतपद्मधवलैः, **श्रृङ्गोच्छ्रायैः** - शिखरोनत्यैः, **खम्** - नभः, **वितत्यः** - व्याप्य, **प्रतिदिनम्** - दिने दिने, **राशीभूतः** - पुञ्जीभूतः, **त्र्यम्बकस्य** - शङ्करस्य, **अट्टहास इव** - अतिहास इव, **स्थितः** - विद्यमानो वर्तते इति भावः।

**भावार्थः** - (हे मेघ!) क्रौञ्चबिलान्निर्गत्य ऊर्ध्वं च गत्वा, रावणबाहूद्वारप्रस्थितश्रृङ्ग सन्धेः देवललनामुकुरभूतस्य कैलासस्य आगन्तुको भवेः। यः कैलासः श्वेतपद्मवदुज्ज्वलैः श्रृङ्गोच्चैराकाशमभिव्याप्य पुञ्जीभूतः शिवस्य अट्टहास इव वर्तमानोऽस्ति।

**समासः** - दशमुखानि यस्य सः दशमुखः (बहुव्रीहि), दशमुखस्य भुजाः - दशमुखभुजाः (षष्ठीतत्पुरुषः) तैः उच्छ्वासिताः दशमुखभुजोच्छ्वासिताः (तृतीयातत्पुरुषः) प्रस्थसन्धयो यस्य सः दशमुखभुजोच्छ्वासितप्रस्थसन्धिः (बहुव्रीहि) तस्य। तिस्रो दशाः येषान्ते - त्रिदशाः (बहुव्रीहि) तेषां वनिताः - त्रिदशवनिताः (षष्ठीतत्पुरुषः) तासां दर्पणः - त्रिदशवनितादर्पणः (षष्ठीतत्पुरुषः) तस्य। श्रृङ्गाणाम् उच्छ्रायैः - श्रृङ्गोच्छ्रायैः (षष्ठीतत्पुरुषः) कुमुदानीव विशदाः - कुमुदविशदाः (उपमानकर्मधारयः) तैः, दिने दिने इति - प्रतिदिनम् (अव्ययीभावः)। त्रीणि अम्बकानि यस्य सः - त्र्यम्बकः (बहुव्रीहि) त्रयाणाम् (लोकानाम्) अम्बकः (पिता) त्र्यम्बकः (षष्ठीतत्पुरुषः) त्रीन् (वेदान्) अम्बते (उच्चार्यते) इति त्र्यम्बः त्र्यम्ब एव त्र्यम्बकः स्वार्थे कन् (द्वितियातत्पुरुषः)।

**कोशः** - अमरा निर्जरादेवास्त्रिदशा विबुधाः सुराः इत्यमरः। विरूपाक्षस्त्रिलोचनः इत्यमरः। अट्टावतिशयक्षोभौ इति यादवः। विशदश्वेतपाण्डुराः इत्यमरः।

**अलङ्कारः** - उपमा, उत्प्रेक्षा।

**उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे**
**सद्यः कृत्तद्विरददशनच्छेद गौरस्य तस्य।**
**शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-**
**मसंन्यस्ते सति हलभृतो मेचके वाससीव।।६३।।**

**पदच्छेदः** - शोभां + अद्रेः - शोभामद्रेः। भवित्रीम् + असंन्यस्ते - भवित्रीमसंन्यस्ते। वाससि + इव - वाससीव।

**अन्वयः** - स्निग्धभिन्नाऽञ्जनाऽऽभे त्वयि तटगते सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य अद्रेः मेचके वाससि असंन्यस्ते सति हलभृत इव स्तिमितनयनप्रेक्षणीयाम् शोभाम् भवित्रीम् उत्पश्यामि।

**अन्वयार्थः** - **स्निग्धभिन्नाऽञ्जनाऽऽभे** - चिक्कणमर्दितकज्जलकान्तौ, **त्वयि** - मेघे, **तटगते** - सानुगते, (सति) **सद्यः** - तत्क्षणम्, **कृत्तद्विरददशनच्छेदगौरस्य** - छिन्नहस्तिदन्तवच्छुभ्रस्य, **तस्य** - पूर्वोक्तस्य, **अद्रेः** - पर्वतस्य,

कैलासस्येतिभावः। **मेचके** - श्यामे, **वाससि** - वस्त्रे, **असंन्यस्ते** - अपरित्यक्ते, स्कन्धस्थापित इत्यर्थः। **इव** - बलरामस्येव, **स्तिमितनयनप्रेक्षणीयाम्** - निश्चलनयनदर्शनीयाम्, **भवित्रीम्** - भाविनीम्, **शोभाम्** - श्रियम्, **उत्पश्यामि** - तर्कयामि।

**भावार्थः** - आर्य मेघ! चिक्कणमर्दितकज्जलशोभे त्वयि कैलाससमीपगते सति तत्क्षणकृत्तहस्तिदन्तवच्छुक्लस्य तस्य कैलासपर्वतस्य श्यामवसनन्यस्तस्कन्धस्य बलरामस्य निश्चलनयनदर्शनीयां शोभां तर्कयामि।

**समासः** - स्निग्धं च तद्भिन्नम् - स्निग्धभिन्नम् (कर्मधारयः) स्निग्धभिन्नञ्च तदञ्जनम् - स्निग्धभिन्नाञ्जनम् (कर्मधारयः) तस्येव आभा यस्य स स्निग्धभिन्नाञ्जनाऽभः (बहुव्रीहि) तस्मिन्। तटंगतः - तटगतः (द्वितीयातत्पुरुषः) तस्मिन्। द्वौ रदौ यस्य स द्विरदः (बहुव्रीहि) द्विरदस्य दशनः - द्विरददशनः (षष्ठीतत्पुरुषः) सद्यः कृत्तः - सद्यः कृत्तः (सुप्सुपेतिसमासः) सद्यः कृत्तश्चासौ द्विरददशनः - सद्यः कृत्तद्विरददशनः (कर्मधारयः) तस्याच्छेदः (षष्ठीतत्पुरुषः) तदिव गौरः - सद्यः कृत्तद्विरददशनच्छेदगौरः (उपमानकर्मधारयः) तस्य। स्तिमिते च ते नयने - स्तिमितनयने (कर्मधारयः) ताभ्यां प्रेक्षणीयाम् - स्तिमितनयनप्रेक्षणीयाम् (तृतीयातत्पुरुषः)।

**कोशः** - चिक्कणं मसृणं स्निग्धम् इत्यमरः। सद्यः सपदि तत्क्षणे इत्यमरः। रदना दशना दन्ताः इत्यमरः। कृष्णे नीलासितश्यामकालस्यामलमेचकाः इत्यमरः। स्कन्धोभुजशिरोसोऽस्त्री इत्यमरः।

**अलङ्कारः** - उपमा।

**हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता**
**क्रीडाशैले यदि च विचरेत्पादचारेण गौरी।**
**भङ्गी भक्त्या विरचितवपुःस्तम्भितान्तर्जलौघः**
**सोपानत्वं कुरु मणितटारोहणायाग्रयायी।। ६४।।**

**पदच्छेदः** - विचरेत् + पादचारेण - विचरेत्पादचारेण।

**अन्वयः** - तस्मिन् क्रीडाशैले शम्भुना भुजगवलयम् हित्वा दत्तहस्ता गौरी पादचारेण विचरेत् यदि अग्रयायी स्तम्भिताऽन्तर्जलौघः भङ्गीभक्त्या विरचितवपुः मणितटाऽरोहणाय सोपानत्वम् कुरु।

**अन्वयार्थः** - **तस्मिन्** - पूर्वोक्ते, **क्रीडाशैले** - केलिपर्वते, कैलास इति यावत्। **शम्भुना** - शिवेन, **भुजगवलयम्** - अहिकङ्कणम्, **हित्वा** - परित्यज्य, **दत्तहस्ता** - कराऽबलम्बा, (सती) **गौरी** - पार्वती, **पादचारेण** - चरणःसंचारेण, **विचरेत्** - चलेत्, **यदि** - चेत् (तर्हि), **अग्रयायी** - अग्रेसरः, **स्तम्भितान्तरजलौघः** - अवरुद्धाभ्यन्तरतोयवेगः **भङ्गीभक्त्या** - पर्वरचनया, **विरचितवपुः** - निर्मितशरीरः, (त्वम्) **मणितटाऽऽरोहणाय** - रत्नतटाऽऽरोहणाय, **सोपानत्वम्** - श्रृङ्खलाभावम्, **कुरु** - विधेहि। सोपानरूपस्त्वं भव इति भावः।

**भावार्थः** - हे मेघ! तस्मिन् केलीपर्वते कैलासे (भयापनोदनाय) कङ्कणं परित्यज्य शिवेन प्राप्तकरावलम्बा पार्वती यदि पद्भ्यां विहरेत् तर्हि अग्रेसरः अवरुद्धान्तर्जलसमूहस्त्वं स्वशरीरेण पर्वरचनां कृत्वा मणितटारोहणाय सोपानरूपो भव।

**समासः** - क्रीडायाः शैलः - क्रीडाशैलः (षष्ठीतत्पुरुषः) तस्मिन्। भुजग एव वलयम् - भुजगवलयम् (कर्मधारयः) दत्तः हस्तो यस्यै सा दत्तहस्ता (बहुव्रीहि)। जलानाम् ओघः - जलौघः (षष्ठीतत्पुरुषः)। अन्तःस्थितः जलौघः - अन्तर्जलौघः (मध्यमपदलोपी) स्तम्भितः अन्तर्जलौघः येन सः स्तम्भितान्तर्जलौघः (बहुव्रीहि)। विरचितं वपुर्येन सः विरचितवपुः (बहुव्रीहि) भङ्गीनां भक्ति - भङ्गीभक्तिः (षष्ठीतत्पुरुषः) तया। मणीनां तटम् - मणितटम् (षष्ठीतत्पुरुषः) मणितटे आरोहणं मणितटारोहणम् (षष्ठीतत्पुरुषः) तस्मै।

**कोशः** - आवापकः परिहार्यः कटकी वलयोऽस्त्रियाम् इत्यमरः। निकरव्रातवारसंघातसञ्चयाः इत्यमरः। आरोहणं स्यात् सोपानम् इत्यमरः।

**अलङ्कारः** - रूपकम्।

**तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं**
**नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।**
**ताभ्यो मोक्षस्तव यदि सखे! धर्मलब्धस्य न स्यात्**
**क्रीडालोलाः श्रवणपरुषैः गर्जितैर्भाययेस्ताः।। ६५।।**

**पदच्छेदः** - तत्र + अवश्यं - तत्रावश्यम्। मोक्षः + तव - मोक्षस्तव। श्रवणपरुषैः + गर्जितैः + भाययेः + ताः - श्रवणपरुषैर्गर्जितैर्भाययेस्ताः।

**अन्वयः** - तत्र अवश्यम् सुरयुवतयः वलयकुलिशोद्घट्टनोद्गीर्णतोयम् त्वाम् यन्त्रधारागृहत्वम् नेष्यन्ति। हे सखे! धर्मलब्धस्य तव ताभ्यः मोक्षः न स्यात् क्रीडालोलाः ताः ताः श्रवणपरुषैः भाययेः।

**अन्वयार्थः** - (हे मेघ!) **तत्र** - कैलासे, **अवश्यम्** - नूनम्, **सुरयुवतयः** - देवललनाः, **वलयकुलिशोद्घट्टनोद्गीर्णतोयम्** - कङ्कणकोटिताटनोत्सृष्टजलम्, **त्वाम्** - मेघम्, **यन्त्रधारागृहत्वम्** - कृत्रिमधारागेहत्वम्, **नेष्यन्ति** - प्रापयिष्यन्ति। **हे सखे!** - हे मित्र! **धर्मलब्धस्व** - आतपप्राप्तस्य। **तव** - मेघस्य, **ताभ्यः** - देवयुवतिभ्यः, **मोक्षः** - मुक्तिः, **न स्यात्** - न भवेत् (चेत्) 'तर्हि' **क्रीडालोलाः** - केलिचपलाः, **ताः** - सुरयुवतीः, **श्रवणपरुषैः** - कर्णकटुभिः, **गर्जितैः** - स्तनितैः, **भाययेः** - त्रासयेः।

**भावार्थः** - हे मेघ! कैलासे सुरयुवतयः कङ्कणप्रहारैरुत्सृष्टजलं त्वां कृत्रिमजलधारागृहत्वं नूनं विधास्यन्ति। हे सखे! यदि ते ताभ्यो देवललनाभ्यो मुक्तिर्न स्यात् तर्हि त्वं कर्णकठोरैर्गर्जनैस्ताः त्रासयेः।

**समासः** - वलयानां कुलिशानि - वलयकुलिशानि (षष्ठीतत्पुरुषः) उद्गीर्णं तोयं येन सः उद्गीर्णतोयः (बहुव्रीहि) वलयकुलिशैः उद्घट्टनानि - वलयकुलिशोद्घट्टनानि (तृतीयातत्पुरुषः) वलयकुलिशोद्घट्टनैः उद्गीर्णतोयः वलयकुलिशोद्घट्टनोद्गीर्णतोयः। सुराणां युवतयः - सुरयुवतयः (षष्ठीतत्पुरुषः)। यन्त्रेषु धाराः - यन्त्रधाराः (सपत्मीतत्पुरुषः) यन्त्रधाराणां गृहत्वम् - यन्त्रधारागृहत्वम् (षष्ठीतत्पुरुषः)। धर्मे लब्धः - धर्मलब्धः (सप्तमीतत्पुरुषः) तस्य। क्रीडायां लोलाः - क्रीडालोलाः (सप्तमीतत्पुरुषः) श्रवणयोः परुषाणि - श्रवणपरुषाणि (सप्तमीतत्पुरुषः) तैः।

**कोशः** - कटको वलयोऽस्त्रियाम् इत्यमरः। चलनं कम्पनं चलं लोलं चलाचलम् इत्यमरः। अथ मित्रं सखा सुहृत् इत्यमरः। निष्ठुरं परुषम् इत्यमरः।

**हेमाम्भोजप्रसवि सलिलं मानसस्याददानः**
**कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य।**
**धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-**
**र्नानाचेष्टैर्जलद! ललितैर्निर्विशेस्तं नगेन्द्रम्।। ६६।।**

**पदच्छेदः** - मानसस्य + आददानः - मानसस्याददानः। क्षणमुखपटप्रीतिं + ऐरावतस्य - क्षणमुखपटप्रीतिमैरावतस्य। धुन्वन् + कल्पद्रुमकिसलयानि + अंशुकानि + इव - धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव। वातैः + नानाचेष्टैः + जलद - वातैर्नानाचेष्टैर्जलद। ललितैः + निर्विशेः + तं - ललितैर्निर्विशेस्तम्।

**अन्वयः** - हे जलद! हेमाम्भोजप्रसवि मानसस्य सलिलम् आददानः एरावतस्य क्षणमुखपटप्रीतिम् कुर्वन् अंशुकानि इव कल्पद्रुमकिसलयानि वातैः धुन्वन् नानाचेष्टैः ललितैः तम् नगेन्द्रम् कामम् निर्विशेः।

**अन्वयार्थः** - **हे जलद!** - हे मेघ! **हेमाम्भोजप्रसवि** - स्वर्णपद्मोत्पादकम्, **मानसस्य** - मानससरोवरस्य, **सलिलम्** - तोयम्, **आददानः** - गृह्णन् पिबन् इति भावः, **ऐरावतस्य** - एतन्नामक इन्द्रगजस्य, **क्षणमुखपटप्रीतिम्** - मुहूर्तवदनवस्त्रानन्दम्, **कुर्वन्** - विदधत्, **अंशुकानि इव** - मसृणवस्त्राणीव, **कल्पद्रुमकिसलयानि** - कल्पवृक्षपल्लवानि, **वातैः** - पवनैः, **धुन्वन्** - कम्पयन्, **नानाचेष्टैः** - अनेकक्रीडितैः, **ललितैः** - विलासैः, **तम्** - पूर्वोक्तम्, **नगेन्द्रम्** - पर्वतराजम् कैलासमित्यर्थः, **कामम्** - पर्याप्तम्, **निर्विशेः** - उपभुङ्क्ष्व।

**भावार्थः** - हे मेघ! स्वर्णपद्मोत्पत्तिस्थानभूतं मानससरोवरजलं पिबन्, किञ्चिन्ममुहूर्तं यावत् इन्द्रहस्तिनः ऐरावतस्यानानावगुण्ठनानन्दं प्रयच्छन् मसृणवस्त्राणीव कल्पद्रुमपल्लवानि पवनैः कम्पयन् अनेकप्रकारैः क्रीडितैः कैलासं यथेष्टमुपभुङ्क्ष्व।

**समासः** - हेम्नः अम्भोजानि (षष्ठीतत्पुरुषः) हेमाम्भोजानां प्रसवि यत् तत् - हेमाम्भोजप्रसवि (षष्ठीतत्पुरुषः)। कल्पद्रुमाणां किसलयानि - कल्पद्रुमकिसलयानि (षष्ठीतत्पुरुषः)। नाना चेष्टा येषां येषु वा तैः, नानाचेष्टैः (बहुव्रीहि)।

**कोशः** - अंशुके वस्त्रमात्रे स्यात्परिधानोत्तरीययोः इति शब्दार्णवः। नाभावभेदे स्त्रीनृत्ये ललितं त्रिषु सुन्दरे अस्त्रियां प्रमदागारे क्रीडिते जातिपल्लवे इति शब्दार्णवः। निर्वेशो भृतिभोगयोः इत्यमरः। निर्वेश उपभोगः इत्यमरः।

**अलङ्कारः** - उत्प्रेक्षा।

**तस्योत्सङ्गे प्रणयिन इव स्त्रस्तगंगादुकूलां**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।**
**यावः काले वहति सलिलोद्गारमुच्चैर्विमाना**
**मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्।। ६७।।**

**पदच्छेदः** - तस्य + उत्सङ्गे - तस्योत्सङ्गे। पुनः + अलकां - पुनरलकाम्। सलिलोद्गारं + उच्चैः + विमाना - सलिलोद्गारमुच्चैर्विमाना। मुक्ताजालग्रथितं + अलकं - मुक्ताजालग्रथितमलकम्। कामिनी + इव + अभ्रवृन्दम् - कामिनीवाभ्रवृन्दम्।

**अन्वयः** - हे कामचारिन् प्रणयिन इव तस्य उत्सङ्गे स्रस्तगंगादुकूलाम् अलकाम् दृष्ट्वा त्वं पुनः न ज्ञास्यसे न। उच्चैर्विमाना या वः काले सलिलोद्गारम् अभ्रवृन्दम् कामिनी मुक्ताजालग्रथितम् अलकमिव वहति।

**अन्वयार्थः** - **हे कामचारिन्** - हे स्वेच्छाचारिन्! **प्रणयिनः** - प्रियतमस्य, **इव** - यथा, **तस्य** - कैलासस्य, **उत्सङ्गे** - क्रोडे, **स्रस्तगङ्गादुकूलाम्** - च्युतजाह्नवीवस्त्राम्, **अलकाम्** - कुबेरनगरीम्, प्रियामिवेति शेषः। **दृष्ट्वा** - विलोक्य, **त्वं** - मेघः, **पुनः** - भूयः, **न** - नहि, **ज्ञास्यते** - परिचेष्यसे (इति) तु **न** - नहि, अर्थात् अवश्यं ज्ञास्यसे इति ध्वनिः। **उच्चैर्विमाना** - उन्नतसप्तभूमिभवनवती, **या** - अलका, **वः** - युष्माकम्, **काले** - समये वर्षतो इत्यर्थः। **सलिलोद्गारम्** - जलोत्सर्जनम्, **अभ्रवृन्दम्** - मेघनिचयम्, **कामिनी** - वनिता, **मुक्ताजालग्रथितम्** - मौक्तिकप्रचुरैर्गुम्फितम्, **अलकमिव** - केशपाशमिव, **वहति** - धारयति।

**भावार्थः** - हे स्वेच्छाचारिन्! प्रणयिनः इव कैलासस्योत्सङ्गे च्युतगंगावस्त्राम् अलकां प्रियतमस्याङ्के अवस्रस्तक्षौमा प्रेयसीमिव विलोक्य अवश्यं परिचेष्यसे। या सप्तोन्नतभवना अलका वर्षासमये जलवर्षके मेघसमूहं क्रोधरहिता रमणी मुक्तासमूहानुस्यूतं केशपाशमिव धारयति।

**समासः** - अलकापक्षे - गङ्गा दुकूलमिव - इति गङ्गादुकूलम् (उपमितं व्याघ्रादिभिः सामान्याप्रयोगे)। कामिनी पक्षे - गङ्गा इव दुकूलम् (उपमानानि सामान्यवचनैः) स्रस्तं गङ्गादुकूलं यस्याः सा - स्रस्तगङ्गादुकूला (बहुव्रीहि) ताम्। उच्चैः विमानानि यस्याः सा उच्चैर्विमाना (बहुव्रीहि) इत्यलकापक्षे। कामिनीपक्षे तु विगतः मानो यस्याः सा विमाना (बहुव्रीहि) अतिशयेन विमाना उच्चैर्विमाना (कुगतिप्रादयः)। अभ्राणां वृन्दम् - अभ्रवृन्दम् (षष्ठीतत्पुरुषः)। मुक्तानां जालम् - मुक्ताजालम् (षष्ठीतत्पुरुषः) सलिलम् उद्गिरतीति सलिलोद्गारः (उपपदसमासः) तम्।

**कोशः** - उत्सङ्गोमुक्तसंयोगे सक्थन्यूर्ध्वतलेऽपि च, इति मालतीमालायाम्। दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके इति शब्दार्णवः। विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि इति यादवः। पुंश्चल्यां मौक्तिके मुक्ता इति यादवः। अलकाश्चूर्णकुन्तला इत्यमरः।

**अलङ्कारः** - उपमा, संसृष्टि।

**इति पूर्वमेघः**

# सहायकग्रन्थाः


१. *संस्कृतसाहित्येतिहासः*, आचार्य लोकमणि दाहलः।

२. *केरलीयसंस्कृतसन्देशकाव्यसमीक्षा*, एन्. पि. उण्णी।

३. *History of Classical Sanskrit Literature*, M. Krishnamacharyar.

४. *History of Sanskrit Literature*, A. B. Keith.

५. *History of Sanskrit Literature*, M. Winternitz.

६. *संस्कृतसाहित्यचरित्रम्,* साहित्य अक्कादमी।

७. *मेघदूतं इन्दुकला व्याख्यानम्*, वैद्यनाथ झा शास्त्री।

८. *मेघदूतम् चन्द्रकलाव्याख्यानम्*, श्रीशेषराजशर्मा।

९. *मेघसन्देशम्* (मलयालविवर्तनम्), कुट्टिक्कृष्णमारार्।

१०. *मेघदूतरहस्यम्*, रामशंकरमिश्रा।

११. *मेघदूतम्,* श्री केदारनाथशर्मा, *मेघदूतम्, सञ्जीवनी-चारित्रवर्द्धिनी, भावबोधिनी-सौदामिनी* व्याख्याचतुष्टयोपेतम्।


*****